Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीदेवसुन्दरशिष्याचार्यश्रीकुलमण्डनसूरिभिः समुद्धृतो विविधसूत्रालापोद्धारमयः

# श्रीविचारामृतसारसंग्रहः।

जिनदर्शनसूत्रार्थपाक्षिकचातुर्मासिकादिमुखवस्त्रिकादिस्थापनान्तविषयसूत्रालापकमयः

मुद्रयिता—पादलिप्तनगरे आगमोद्धारकश्रीसागरानंदसूरीश्वरविहितोपाध्यायश्रीमाणेकसागरउ. कुमुदविजयपं. भक्तिविजय-
पं.पद्मविजयाचार्यपदनिमित्तं साध्वीचंपाश्रीताराश्र्युपदिष्टश्रेष्ठिमाणेकचन्द्रजयचन्द्रश्राविकावर्गविहितार्थसाहाय्येन
मालवदेशान्तर्गतरत्नपुरीयश्रीऋषभदेवजीकेशरीमलजीइत्याख्या श्वेतांबरसंस्था ।

मुद्रणस्थानम्—श्रीफकीरचन्द मगनलाल बदामी 'इत्यनेन स्वकीये 'श्रीजैनविजयानन्द' प्रीन्टींग प्रेस'
(कणपीठबजार, सुरत.) इति यन्त्रालये मुद्रितः

प्रतयः ५०० ] विक्रमसम्वत् १९९३ (सर्वेऽधिकाराः स्वायत्ताः) वीरसम्वत् २४६३ पण्यं रु. १–४–० इ. स. १९३६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# विचारामृतसारसंग्रहे विषयानुक्रमः


| | विषयः | पृष्ठः |
|---|---|---|
| १ | जिनप्रवचनस्वरूपं (चतुर्दशावान्तरविचारयुतं) | १७ |
| २ | पाक्षिकविचारः | २९ |
| ३ | चातुर्मासिकविचारः | ३३ |
| ४ | पर्युषणाविचारः | ४२ |
| ५ | सामायिकविचारः | ४६ |
| ६ | श्रावकप्रतिक्रमणं | ५७ |
| ७ | वर्धमानस्तुतित्रयं | ५८ |
| ८ | श्रुतदेवताद्युत्सर्गः | ५९ |
| ९ | रात्रिकाद्युच्चारः | ६० |
| १० | उज्जिंतेति स्तुतिः | ६१ |
| ११ | वैयावृत्त्योत्सर्गः | ६२ |
| १२ | स्तुतित्रयोत्सर्गः | ६३ |
| १३ | चूलिकास्तुतयः | ६५ |
| १४ | श्रावकचैत्यवन्दनं | ६७ |
| १५ | प्रणिपातदंडकः | ७० |
| १६ | ज्येष्ठवन्दनादि | ७४ |
| १७ | वन्दनप्रत्याख्यानादि | ७६ |
| १८ | नमस्कारः | ७९ |
| १९ | पौषधभोजनं | ८१ |
| २० | पर्वान्यदिनपौषधः | ८३ |
| २१ | सामाचारी | ८७ |
| २२ | उपधानानि | ९३ |
| २३ | कल्याणकादितपः | ९५ |
| २४ | रोहिण्यादितपः | ९६ |
| २५ | श्रावकमुखवस्त्रिका | १०५ |


For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अर्हम् ।

आचार्यपुरन्दरश्रीमत्कुलमण्डनसूरिसंकलितः

# श्रीविचारामृतसंग्रहः ।

श्रीवर्द्धमानसूर्यो जीयाद् यस्येह वचनकिरणगणाः । भावतमोजाड्यहृतः प्रबोधमातन्वते जगताम् ॥१॥
स्वान्ययोः संशयोच्छित्त्यै, करोम्याप्तवचोऽम्बुधेः । उद्धृतस्वपरिमितविचारामृतसंग्रहम् ॥२॥
इत्थ अणाभोगेणं अन्नाणेण अबहुस्सुयत्तेणं । संमं गुरुवयणाणवगमेण मइमंदयाए वा ॥३॥
जं किंपि य जिणगणहरपुव्वायरियवयणाण पडिकूलं । तं इह सोहेयव्वं अरत्तदुट्ठेहिं गीएहिं ॥४॥

जिनप्रवचनस्वरूपविचारः १ पाक्षिकविचारः २ चातुर्म्मासिकविचारः ३ पर्युषणाविचारः ४ सामायिकविचारः ५ श्रावकाणां प्रतिक्रमणविचारः ६ वर्द्धमानस्तुतित्रयविचारः ७ श्रुतदेवतादिकायोत्सर्गविचारः ८ रात्रिकदैवसिकोच्चारविभागविचारः ९ उज्जिंतसेलेत्यादिस्तुतिद्वयविचारः १० वैयावृत्यकरादिकायोत्सर्गविचारः ११ चेइए सव्वहिं थुई तिन्नि इति स्तुतित्रयकायोत्सर्गप्रमा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





...योर्विचारः १२ चूलिकास्तुतिचतुष्कविचारः १३ श्रावकाणां चैत्यवन्दनविचारः १४ प्रणिपातदंडकविचारः १५ पर्यायज्येष्ठादिवन्दनविचारः १६ द्वितीयवन्दनविधिप्रत्याख्यानादिविचारः १७ नमस्कारविचारः १८ पौषधभोजनविचारः १९ पर्वान्यदिवसेष्वपि पौषधग्रहणविचारः २० अशठाचीर्णविचित्रसामाचारीप्रामाण्यविचारः २१ उपधानादिविचारः २२ कल्याणकतीर्थंकरदीक्षाद्यालम्बनविचित्रप्रकीर्णकतपोविचारः २३ रोहिण्यादितपोविचारः २४ श्रावकाणां मुखवस्त्रिकारजोहरणग्रहणविचारः २५॥

इह विचाराः सर्वेऽपि जिनप्रवचनस्वरूपपरिज्ञाने सति विधीयमानाः सुयौक्तिका भवन्तीति प्रथमं तत्स्वरूपं किञ्चिदुच्यते, तथाहि—'तमेव सच्चं नीसंकं जं जिणेहिं पवेइयं। (भग० सू. ३२ आचा० १५३ सू.) आचाराङ्गे भगवत्यां च, तच्च जिनप्रवचनं सूत्रार्थोभयात्मकं १ षड्विधसूत्रप्रकारं २ पूर्वापरसापेक्षसूत्रार्थातिगहनं ३ शेषभेदप्रभेदोपेतनैगमादिसकलनयसमवतारचतुरनुयोगव्याख्याक्षमम् ४ ओघपदविभागदशविधरूपत्रिविधसामाचार्यां साधूद्देशेनोपदर्शितबहुसूत्रं ५ क्वचिन्नष्टसूत्रमनष्टार्थं ६ मन्तर्भूतबद्धाबद्धश्रुतार्थं ७ संगृहीतनियतानियतश्रुत ८ मुपदिष्टासावद्यरूपजीतपर्यन्तपञ्चव्यवहारं ९ संप्रदायावगम्यसूत्रविषयिविभागं १० पञ्चकल्पजीतकल्पक्षेत्रसमाससंग्रहणिविशेषणवतीविशेषावश्यकऋषिभाषितवसुदेवहिंडियोनिप्राभृताजितशान्तिस्तवकर्म्मप्रकृतिव्याकरणकर्म्मग्रन्थचैत्यवन्दनभाष्यादिसंमत्यादिदर्शनशास्त्रउमास्वातिवाचकश्रीहरिभद्रसूरिकृतप्रकरणाद्यनेकग्रन्थरूपविस्तृतसर्वतोमुखशाखाप्रशाखं ११ ललितविस्तरादिवृत्तिचूर्णिचित्रसामाचारीउपदेशमालायोगशास्त्रदिनकृत्याद्यनेकप्रकरणजिनादिचरित्रपवित्रप्रसूनप्रकरं १२ सूत्रलक्षणोपेतसूत्रार्थचूर्णिवृत्तिप्रकरणसंप्रदायादिप्रामाण्यसुप्रतिष्ठपीठबधं १३ गुरुतमेभ्योऽपि दृश्यमानश्रीसंघगुरुतमत्वम् १४ ॥



For Private And Personal Use Only

तथाहि—कथं जिनप्रवचनमेवंविधमिति चेदुच्यते, 'अभिवाहारो कालियसुयंमि सुत्तत्थतदुभएणंति । दव्वगुणपज्जवेहि य दिट्ठीवायंमि बोद्धव्वो ॥१॥" आवश्यके,अभिव्याहरणम्—आचार्यशिष्ययोर्वचनप्रतिवचने अभिव्याहारः,कालिकश्रुते—आचारादौ उत्कालिके दृष्टिवादे मूलवृत्त्येकदेशे। इच्चेयं दुवालसङ्गं गणिपिडगं अतीतकाले अणंता जीवा आणाए विराहित्ता चाउरंतं संसारकंतारं अणुपरियट्टिंसु समवायसूत्रे, इदं हि द्वादशाङ्गं सूत्रार्थोभयभेदेन त्रिविधं, ततश्चाज्ञया—सूत्राज्ञयाऽभिनिवेशतोऽन्यथापाठादिलक्षणया अतीतकालेऽनन्ता जीवाश्चातुरन्तं संसारकान्तारं नारकतिर्यङ्नरामरविविधवृक्षजालदुस्तरं,भवाटवीगहनमित्यर्थः, अनुपरावृत्तवन्तो जमालिवत्, अर्थाज्ञया पुनरभिनिवेशतोऽन्यथाप्ररूपणादिलक्षणया गोष्ठामाहिलवत् , उभयाज्ञया पुनः पञ्चविधाचारपरिज्ञानकरणोद्यतगुर्वादेशादेरन्यथाकरणलक्षणया गुरुप्रत्यनीकद्रव्यलिङ्गधारकानेकश्रमणवत् , सूत्रार्थोभयैर्विराध्येत्यर्थः, अथवा द्रव्यक्षेत्रकालभावापेक्षमागमोक्तानुष्ठानमेवाज्ञा तया, तदकरणेनेत्यर्थः । **सम० वृत्तौ**। एवं सूत्रार्थोभयात्मकं १ ॥

तथा किंचि उस्सगसुत्तं १ अववायसुत्तं २ उस्सग्गाववाइयं ३ अववाउस्सग्गियं ४ उस्सग्गुस्सग्गियं ५ अववायाववाइयं ६ ॥ इमं उस्सग्गसुत्तं 'गोयरग्गपविट्ठो उ, न निसीइज्ज कत्थई। कहं च न पबंधिज्जा, चिट्ठित्ताण व संजए ॥१॥' १ इमं आववाइयं—कप्पइ निग्गंथाण वा २ आमे तालपलंबे भिण्णे पडिगाहित्तए २, उस्सग्गाववाइयं 'नो कप्पति निग्गंथाण वा २ रातो वा वियाले वा सिज्जासंथारयं पडिगाहित्तए, नन्नत्थेगेण पुव्वपडिलेहिएणं सिज्जासंथारएणं ३ अववाउस्सग्गियं 'कप्पइ निग्गंथाणं वा २ पक्के तालपलंबे भिण्णे पडिगाहित्तए, सेऽवि य विहिभिण्णे, नो चेव णं अविहिभिण्णे, अववादेण गहणे पत्ते जं अविधिभिण्णस्स पडिसेहं करेइ एस अववाए उस्सग्गो ४ इमं उस्सग्गुस्सग्गियं 'जे भिक्खू असणं वा० पढमाए पोरिसीए पडिगाहित्ता पच्छिमं पोरिसिं उवाइ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१ जिनवचने सूत्रार्थगहनता

णाविंति उवाइणाविंतं वा साइज्जति, से य आहच्च उवायणाविए सिया जो तं भुंजति भुंजंतं वा साइज्जति ५ अववायाववाइयं जेसु अववाओ सुत्तेसु निबद्धो तेसु चेव सुत्तेसु अत्थतो पुणो अणुन्ना पवत्तति एए अववायाववाइया सुत्ता, जत्तो सा चेव वितियाण्णा सुत्तत्थाणुगया इति नि० उ १६ चूर्णिगतमिति, षड्विधसूत्रप्रकारं २ ॥

तथा 'सुत्तस्स मग्गेण चरिज्ज भिक्खू, सुत्तस्स अत्थो जह आणवेइ।' किं बहुना?–सर्वत्रैव सूत्रस्य मार्गेण चरेद् भिक्षुरित्यागमोद्देशेन वर्त्ततेति भावः। तत्रापि नौघत एव यथाश्रुतग्राही स्यात्, अपि तु सूत्रस्यार्थः पूर्वापराविरोधितसुयुक्तिघटितः पारमार्थिकोत्सर्गापवादगर्भो यथाऽऽज्ञापयति–नियुङ्क्ते तथा वर्तेत, नान्यथा' दशवै० वृत्तौ, सर्वाण्यप्युत्सर्गापवादपदानि परस्परसापेक्षाणि,'कामं सव्वपदेसुऽवि उस्सग्गववादधम्मया जुत्ता। मोत्तुं मेहुणधम्मं न विणा सो रागदोसेहिं ॥१॥' नि० भाष्यपीठे, 'जावइया उस्सग्गा तावइया चेव हुंति अववाया। जावइया अववाया उस्सग्गा तत्तिया चेव ॥१॥' कल्पपीठे। तथा अतिदेशेषु पूर्वापरापेक्षा 'आयारे अंगंमि य पुव्वुद्दिट्ठो चउक्कनिक्खेवो। नवरं पुण नाणत्तं भावायारंमि तं वुच्छं ॥१॥ क्षुल्लिकाचारकथायामाचारस्य पूर्वोद्दिष्टो निक्षेपोऽगस्य तु चतुरङ्गाध्ययने इति आचा० नि० वृत्तौ। एवं, जाव, तहेव, इच्चाइ, वण्णओ, सेसं जहा, इत्याद्यनेकप्रकारपदाभिव्यंग्या अतिदेशा अलब्धसंख्या दृश्यन्ते। 'कत्थइ देसग्गहणं कत्थइ भण्णंति निरवसेसाइं। उक्कमकमजुत्ताइं कारणवसओ निउत्ताइं ॥१॥' नि० भा० उ० १६, अत एव पूर्वापरसापेक्षाऽर्थोतिगहनम् ३ ॥

तथा 'इक्किक्को य सयविहो सत्त नयसया हवंति एवं तु। अन्नोऽविय आएसो पंचेव सया नयाणं तु ॥१॥ पंचतयानां शब्दादीनामेकत्वाद् एकैकस्य च शतविधत्वादिति हृदयम्, अपिशब्दात् षट् चत्वारि द्वे वा शते, तत्र षट् शतानि नैगमस्य संग्र-

॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





द्व्यवहारद्वयान्तः प्रवेशादेकैकस्य च शतभेदत्वात्, तथा चत्वारि शतानि संग्रहव्यवहारऋजुसूत्रशब्दाद्येकतयानां शतविधत्वात्, शतद्वयं तु नैगमादीनां ऋजुसूत्रपर्यन्तानां द्रव्येण मूकत्वात् शब्दादीनां च पर्यायेण मूकत्वात्, तयोश्च शतभेदत्वात्, एएहिं दिट्ठिवाए परूवणा सुत्तअत्थकहणा य। इह पुण अणब्भुवगमो अहिगारो तीहिं ओसन्नं ॥१॥ इह पुनः—कालिकश्रुतेऽनभ्युपगमो नावश्यं नयैर्व्याख्या कार्येति, किन्तु श्रोत्रपेक्षं कार्या, तत्राप्यधिकारस्त्रिभिराद्यैरुत्सन्नः—प्रायश इति। नत्थि नएहिं विहूणं सुत्तं अत्थो य जिणमए किंचि। आसज्ज उ सोयारं नए नयविसारओ बूया ॥१॥ मूढनइयं सुयं कालियं तु न नया समोयरंति इहं। अपुहुत्ति समोयारो नत्थि पुहुत्ते समोयारो ॥१॥ 'अविभागत्था' मूढाः, अपृथक्त्वं—चरणधर्मसंख्याद्रव्यानुयोगानां प्रतिसूत्रमविभागेन वर्त्तनं, नास्ति पृथक्त्वे समवतारः, पुरुषविशेषापेक्षं वाऽवतार्यन्ते इति। जावंति अज्जवयरा अपुहुत्तं कालियाणुओगस्स। तेणारेण पुहुत्तं कालियसुय दिट्ठिवाए य ॥१॥ कालिकग्रहणं प्राधान्यख्यापनार्थं, अन्यथा सर्वानुयोगस्यैवापृथक्त्वमासीदिति। अपुहुत्ते अणुओगे चत्तारि दुवार भासई एगो। पुहुत्ताणुओगकरणे ते अत्था तउ य विच्छिन्ना ॥१॥ अनुयोगे चत्वारि द्वाराणि—चरणधर्मकालद्रव्याख्यानि भाषते एकः। देविंदवंदिएहिं महाणुभागेहिं रक्खियज्जेहिं। जुगमासज्ज विभत्तो अणुओगो तो कओ चउहा ॥१॥ दुर्बलिकापुष्पमित्रं प्राज्ञमप्यतिगुपिलत्वादनुयोगस्य विस्मृतसूत्रार्थमवलोक्य युगमासाद्य प्रवचनहिताय विभक्तः—पृथक् पृथग् व्यवस्थापितः। कालियसुयं च इसिभासियाइं तइआ य सूरपन्नत्ती। सव्वोऽवि दिट्ठिवाओ चउत्थओ होइ अणुओगो ॥१॥ आवश्यके, गाथावृत्तिपदानि—अहवा चोएइ नयाणुओगनिण्हवणओ कहं गुरवो। न य निण्हयत्ति? भण्णइ जओ न जंपंति नत्थित्ति ॥१॥ न य मिच्छभावणाए वयंति जो पुण पयंपि निण्हवइ। मिच्छाभिनिवेसाओ स निण्हओ बहुरयाइव्व ॥२॥' विशेषावश्यके, इत्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





**शेषनैगमादिनयचतुरनुयोगव्याख्याक्षमम्** ४। तथा ओघसामाचार्यां पंचमहव्वयजुत्तो अणलस माणपरिवज्जियमई य। सं- विग्गनिज्जरट्ठी किइकम्मकरो हवइ साहू ॥१॥ **आव०** पदविभागसामाचार्यां–नाणे दंसण चरणे तवे य विरिए य भावमायारो। अट्ठट्ठट्ठदुवालस विरियमहाणी उ जा तेसिं ॥१॥ **निशी० पीठे**। पंचसमियस्स मुणिणो आसज्ज विराहणा जइ हविज्जा। रीयं- तस्स गुणवओ सुव्वत्तमबंधओ सो उ ॥१॥ **नि० पीठे**। दशविधसामाचार्यां–जस्स य इच्छाकारो मिच्छाकारो य परिचिया दोऽवि। तइओ य तहकारो न दुल्लहा सुग्गई तस्स ॥१॥ एयं सामायारिं जुंजंता चरणकरणमाउत्ता। साहू खवंति कम्मं अणेगभवसंचिय- मणंतं ॥२॥ **आवश्यके**, इत्यादि बहुस्थानेषु साधोरेवाभिधानेऽपि साध्व्यादयोऽपि ज्ञेयाः, तेषामपि तत्राधिकारित्वस्यागमे प्रसि- द्धत्वात् इति, त्रिविधसामाचार्यां **साधूद्देशेन भणितबहुसूत्रमिति** ५।

तथा 'नट्ठंमि उ सुत्तंमी अत्थंमि अणट्ठि ताहि सो कुणइ। लोगणुओगं च तहा पढमणुओगं च दोऽवेए ॥ १ ॥ बहुहा निमित्त तहियं पढमणुओगे य हुंति चरियाइं। जिणचक्किदसाराणं पुव्वभवाइं निबद्धाइं ॥२॥ ते काऊणं तो सो पाडलिपुत्ते उवट्ठिओ संघं। बेई कयं मि किंची अणुग्गहट्ठाइ तं सुणह ॥३॥ तो संघेण निसंतं सोऊण य से पडिच्छितं तं तु। तो तं पतिट्ठितं तू नगरंमी कुसुम- नामंमि ॥ ४ ॥ एमादीणं करणं गहणनिज्जूहणा पकप्पो य। संगहणीण य करणं अप्पाहाराण उ पकप्पो ॥५॥ पंचकल्पे, इति **नष्टसूत्रमनष्टार्थं** ६ ॥

तथा 'बद्धमबद्धं तु सुयं बद्धं तु दुवालसंग निद्दिट्ठं। तव्विवरीयमबद्धं निसीहमनिसीह बद्धं तु ॥१॥ एवं बद्धमबद्धं आएसाणं हवंति पंचसया। जह एगा मरुदेवा अच्चंतं थावरा सिद्धा ॥२॥ **सामायिकनिर्यु०** १ तथा "सुयकरणं दुविहं–लोइयं च लोउत्तरियं च,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इक्किकं दुविहं—बद्धं च अबद्धं च, बद्धं नाम जस्स सत्थेसु उवनिबंधो अत्थि, अबद्धं जं एवं चेव परीति, नत्थि उवनिबंधो। तत्थि बद्धसुयकरणं दुविहमित्यादि। अरिहप्पवयणे पंच आदेससयाणि, इत्थ एगं मरुदेवा नवि अंगे नवि उवंगे पाढो अत्थि एवं—मरुदेवा अणादिवणस्सतिकाइया अणंतरं उव्वट्टिता सिद्धत्ति, तथा सयंभूरमणमच्छाण पउमपत्ताण य सव्वसंठाणाणि वलयसंठाणं मोत्तुं, करडउक्करडा य कुणालाए" आव० सामा० आवश्यकवृत्तावप्येषोऽर्थोऽस्ति। विहूणुस्स सातिरेगं जोयणसयसहस्सविउव्वणमित्यादि विशेषितः। इत्यन्तर्भूतबद्धाबद्धश्रुतार्थम् ७ ॥

नायज्झयणाहरणा इसिभासियमो पण्णगसुया य। एते हुंति अनियया नियतं पुण सेसमुस्सन्नं ॥१॥ कल्पपीठे।' इति संगृहीतनियतानियतश्रुतं ८ ॥

सो पुण पंचवियप्पो आगम सुय आण धारणा जीए। व्यव० भा० उ० १०, आगमव्यवहारिणः षड्विधाः—केवल १ मनःपर्याय २-अवधिज्ञानि ३ चतुर्दश ४ दश ५ नव ६ पूर्विणः १ आचारप्रकल्पाद्यष्टमपूर्वांतश्रुतधारिणः श्रुतव्यवहारिणः २ देशान्तरस्थितयोर्गीतार्थयोर्गूढार्थसंदेशकेन लिखित्वा वाऽऽलोचनाऽऽज्ञाव्यवहारः, गीतार्थाचार्यप्रदत्तप्रायश्चित्तमवधार्यान्योऽपि तादृशेष्वेवापराधद्रव्यादिषु तदेव प्रायश्चित्तं ददाति यद्वा स्पर्धकपत्यादेः समस्तच्छेदश्रुतानर्हस्य गुरुः कानिचिदुद्धृतप्रायश्चित्तपदानि कथयति स तान्यवधार्योद्धृतपदालोचनं ददाति, एष धारणाव्यवहारः ४ पूर्वं महाप्रायश्चित्तशोध्येऽपराधे सांप्रतं संहननादिहानिमासाद्य तदु-

---

१ करडुकरडाण निरओ वीरंगुट्ठेण चालिओ मेरू। तह मरुदेवी सिद्धा अच्चंतं थावरा होउं ॥१॥ वलयागारं मुत्तुं सयंभुरमणंमि सव्व आगारा। मीणपउमाण एवं बहु आएसा सुअअबद्धा ॥२॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चितेन तपसा यां शुद्धिं निर्दिशन्ति गीतार्थाः तज्जीतमुच्यते, जीतवृत्त्यनुसारि जीतमिति, कोऽर्थः ?, जं बहूहिं गीयत्थेहिं आइण्णं तं जीतं, उचितमाचिन्नमित्यनर्थान्तरं व्यव० चू० पीठे, जीतं नाम प्रभूतानेकगीतार्थकृता मर्यादा, तत्प्रतिपादको ग्रन्थोऽप्युपचारात् जीतम् । व्यव० वृ० पीठे० जं जस्स पच्छित्तं आयरियपरंपराइ अविरुद्धं । जोगा य बहुविहीया एसो खलु जीयकप्पो उ ॥१॥ 'जोगा य बहुविहा य'त्ति जहा नाइलकुलच्चयाणं आयाराओ आढवित्ता जाव दसाओ ताव नत्थि अंबिलं, निव्विगिइएणं पढंति, वियाहाए आयरियाणुण्णातं काउस्सग्गं काउं परिभुंजंति विगइं, तहा कप्पववहाराणं केसिंचि अणागाढं, एवं सुरपन्नत्तीएऽवि । व्य० भाष्यचूर्णिपीठे । वत्तणुवत्तपवत्तो बहुसो अणुवत्तिओ महाणेणं । एसो य जीयकप्पो पंचमओ होइ ववहारो ॥६८२॥ वत्तो नामं इक्कसिं, अणुवत्तो जो पुणो बिइयवारा । तइयव्वारि पवत्तो परिग्गहिओ महाणेणं ॥८२॥ धीरपुरिसपन्नत्तो पंचमओ आगमो वियपसत्थो । पियधम्मवज्जभीरू पुरिसजायाणुचिन्नो वा ॥१॥ धीरपुरिसा तित्थयरा तेहिं पन्नत्तोत्ति, विउणो—चउद्दसपुव्विणो तेहिं कालं पडुच्च पसंसिओ—अभिनंदिओ पियधम्मादीहिं आचिन्नो तेण पच्चओ भवइ—सत्यमेतदिति । बहुओ बहुस्सुएहिं जो वत्तो न य निवारिओ होइ । वत्तणुवत्तपमाणं जीएण कयं हवइ एयं ॥ १ ॥ यद्यनृतं स्याद् बहुसो बहुस्सुएहिं वारिओ हुंतो, जम्हा न निवारिओ तम्हा सद्दहियव्वं सत्यमेतदिति व्यव० भा० चू० उ० १॥ जं जीयं सावज्जं न तेण जीएण होइ ववहारो । जं जीयमसावज्जं तेण उ जीएण ववहारो ॥१॥ व्यव० भा० उ० १० । इत्युपदिष्टासावद्यरूपजीतपर्यंतपंचव्यवहारम् ९ ॥

सूत्राणि ह्यमूनि विचित्राभिप्रायकृतानीति सम्यक्संप्रदायादवसातव्यानि, संप्रदायश्च यथोक्तस्वरूप इति न काचिदनुपपत्तिः, न च सूत्राभिप्रायमज्ञात्वाऽनुपपत्तिरुद्भावनीया, महाशातनायोगतो महानर्थप्रसक्तेः, सूत्रकृतो हि भगवन्तो महीयांसः प्रमाणीकृताश्च



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





महीयस्तरैस्तत्कालवर्त्तिभिरन्यैर्विद्वद्भिः, ततो न तत्सूत्रेषु मनागप्यनुपपत्तिः, केवलं संप्रदायावसाये यत्नो विधेयः, यत्तु सूत्राभिप्रायमज्ञात्वा यथाकथंचिदनुपपत्तिमुद्भावयन्ति ते महतो महीयस आशातयन्तीति दीर्घदीर्घतरसंसारभाजः, आह च **टीकाकारः**— "विचित्राभिप्रायाणि सूत्राणि सम्यक्संप्रदायादवसेयानीति अविज्ञाय तदभिप्रायं नानुपपत्तिनोदना कार्या, महाशातनायोगतो महानर्थप्रसङ्गादिति। एवं च ये संप्रति दुष्षमानुष्टात्सुविहितसाधुषु मत्सरिणस्तेऽपि वृद्धपरंपरायातसंप्रदायावसेयं सूत्राभिप्रायमपास्योत्सूत्रं प्ररूपयन्तो महाशातनाभाजः प्रतिपत्तव्या अपकर्णयितव्याश्च दूरतस्तत्त्ववेदिभि"रिति **जीवा॰ वृत्तौ॰ श्रीमलयगिरिकृ**तायां । इति **संप्रदायावगम्यसूत्रविषयविभागं** १० ॥

पञ्चकल्पः पूर्वगतधारिसंघदासवाचककृतः जीतकल्पक्षेत्रसमाससंग्रहणिविशेषणवतीमहाभाष्यादीनि **पूर्वगतधारिजिनभद्रक्षमाक्षमणकृतानि** ऋषिभाषितानि सातिशयज्ञानमहर्षिकृतानि 'भगवंपि तेअलीअज्झयणं भासइ जहा को कं ठावेइ ? अन्नत्थ सगाइं कम्माइं' एवमादि जहा **रिसिभासिएसु** पच्छा सिद्धे, आव॰ चू॰ उपो॰, वसुदेवहिंडिप्रथमखंडं **पूर्वगतधारिसंघदास**वाचककृतं, एगुणतीसं लंभया संघदासवायएणं उवनिबद्धा, एगसत्तरिं च वित्थारभीरुणा कहामज्झे ठविया, ततोऽहं लोइयसिंगारकहापसंसणं असहमाणो आयरियसगासे अवधारेऊणं पवयणाणुरागेणं आयरियनिओएण तेसिं मज्झिल्ललंभयाणं **गंथणत्थे** अब्भुज्जओऽहं तं सुणह **वसुदेव॰ द्वितीयखंडे**, इहलोए धम्मिलोदाहरणं जहा **वसुदेवहिंडीए आव॰ चू॰ अध्य॰ ६** । **योनिप्राभृतं** पूर्वश्रुतगतं—अग्गेणिपुव्वनिग्गय पाहुडसत्थस्स मज्झयारंमि । किंचिउद्देसदेसं **धरसेणो** वज्जियं भणइ ॥४॥ गिरिउज्जितठिएणं पच्छिमदेसे सुरट्ठगिरिनयरे। बुड्डंतं उद्धरियं दूसमकालप्पयावंमि ॥॥६॥ **प्रथमखंडे** । अट्ठावीस सहस्सा गाहाणं जत्थ



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वन्निया सत्थे। अग्गेणिपुव्वमज्झे संखेवं वित्थरे मुत्तुं ॥१॥ चतुर्थखंडप्रान्ते योनिप्राभृते, निसीहमादिस्स छेयसुयस्स जो अत्थो आगतो सुत्तं वा मोकलाणि वा पच्छित्तविहाणाणि मंतादि वा जोणीपाहुडं वा गाहिंतो अन्नत्थ वा गाहेइ निशी० चू० उ० १७। चेइयाइं वंदित्ता संतिनिमित्तं अजितसंतित्थओ परियट्टिज्जति, आव० चूर्णौ पारि०। "वड्डउ"इत्यादि, पूर्वगतं सूत्रमन्यच्च विनेयान् वाचयंतीति वाचकास्तेषां वंशः–क्रमभाविपुरुषप्रवाहः स वर्द्धतां इत्यादि, यशोवंशो मूर्तो यशसो वंश इव–पर्वप्रवाह इव यशोवंशः, अनेनापयशःप्रधानपुरुषवंशव्यवच्छेदमाह, तथा हि अपयशःप्रधानानामपारसंसारसरित्पतिश्रोतःपतितानां परममुनिजनोपधृतलिङ्ग-विडंबकानामलं संतानपरिवृद्ध्येति, केषां संबंधी वाचकवंशः परिवर्द्धतामित्याह–आर्यनागहस्तिनामार्यनंदिलक्षपणशिष्याणां, कथंभूतानामित्याह–'व्याकरणे'त्यादि, तत्र व्याकरणं च प्रश्नव्याकरणं वा करणं च पिण्डविशुद्ध्यादि, उक्तं च–'पिंडविसोही०' भंगी भंगबहुलं श्रुतं कर्म्मप्रकृतिः प्रतीता, एतेषु प्ररूपणामधिकृत्य प्रधानानां" नंदिवृत्तौ। शतकादिकर्म्मग्रन्थाः शिवशर्म्मसूर्यादि-भिरग्रायणीयादिपूर्वेभ्यः समुद्धृता इति। चैत्यवंदनभाष्यादीनां न चानागमत्वं, यदुक्तं–वंदणंपि कायव्वं तिसंझं, तंपिय विहिणा आगमभणिएण, भणियं च–'तिन्नि निसीही तिन्नि य पयाहिणा' इत्यादि उत्त० १० लघुवृत्तौ। संमत्यादिदर्शनशास्त्राणि श्रीसिद्ध-सेनमल्लवादिश्रीदेवसूर्याद्यनेकबहुश्रुतग्रथितानि द्रव्यानुयोगरूपाणि, यदुक्तं द्रव्यानुयोगः सदसत्पर्यालोचनारूपः, स च दृष्टिवादः संमत्यादिरूपश्च ओघ० वृत्तौ गा० ७। श्रावकप्रज्ञप्तिप्रशमरतितत्त्वार्थादीनि पञ्चशतप्रमाणानि प्रकरणानि उमास्वातिवा-चककृतानि, स च पूर्वधरो वाचकविशेषितत्वात्, यदुक्तं–पूर्वगतं सूत्रमन्यच्च विनेयान् वाचयन्तीति वाचकाः, नंदिवृ०, वादी य खमासमणे दिवायरे वायगत्ति एगट्ठा। पुव्वगयंमि उ सुत्ते एए सद्दा पयट्टंति ॥१॥ कथावलीगंथे, प्रमाणभूतश्चासौ पूर्वबहुश्रुतानां,

जिनवचने
पंचकल्पादि
प्रामाण्यं ११



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तथाहि–तथा चाह भगवानुमास्वातिवाचकः–"सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग" इति नंदिवृत्तौ, धर्मसंग्रहण्यनेकान्तजयपताकापञ्चवस्तुकोपदेशपदलग्नशुद्धिलोकतत्त्वनिर्णययोगबिन्दुधर्मबिन्दुपञ्चाशकषोडशकाष्टकादिप्रकरणानि चतुर्दशशतमितानि पूर्वश्रुतव्युच्छेदकालानंतरं पंचपंचाशता वर्षैर्दिवंगतैः श्रीहरिभद्रसूरिभिर्विरचितानि। गुरुतमैरपि तेषां गुरुत्वमुक्तं, तथाहि–'वृद्धव्याख्यानुसारेण, वृत्तिं वक्ष्ये समासतः। पंचाशकाह्वशास्त्रस्य, धर्मशास्त्रशिरोमणेः ॥१॥ इह हि विस्फुरन्निखिलातिशयतेजोधामनि दुष्षमाकालविपुलजलपटलावलुप्यमानमहिमनि नितरामनुपलक्ष्यीभूतपूर्वगतादिबहुतमग्रन्थतारकानिकरे पारगतगदितागमांबरे पटुतमबोधलोचनतया सुगृहीतनामधेयो भगवान् श्रीहरिभद्रसूरिः तथाविधपुरुषार्थसिद्ध्यर्थिनामपटुदृष्टीनामुन्नमितजिज्ञासाबुद्धिकन्धराणामैदंयुगीनमानवानामात्मनोपलक्ष्यमाणान् विवक्षितार्थसार्थसाधनसमर्थान् कतिपयप्रवचनार्थतारतारकविशेषानुपदिदर्शयिषुः पंचाशद्गाथापरिमाणतया पंचाशकाभिधानानि प्रकरणानि चिकीर्षु'रित्यादि पंचाशकवृत्तौ नवाङ्गवृत्तिकारकश्रीअभयदेवसूरयः ॥ "सूर्यप्रकाश्यं क नु मण्डलं दिवः?, खद्योतकः कास्य विभासनोद्यमी ?। क धीशगम्यं हरिभद्रसद्वचः?, काधीरहं तत्र विभावनोद्यतः ? ॥१॥ अष्टकवृत्तौ। "तथा चावाचि प्रकरणचतुर्दशशतीसमुत्तुंगप्रासादपरम्परासूत्रणैकसूत्रधारैरगाधसंसारवारिधिनिमज्जज्जन्तुजातसमुत्तारणप्रवणप्रधानधर्म्मप्रवहणप्रवर्तनकर्णधारैर्भगवत्तीर्थकरप्रवचनावितथतत्त्वप्रबोधप्रसूतप्रवरप्रज्ञाप्रकाशतिरस्कृतसमस्ततीर्थिकचक्रप्रवादप्रचारैः प्रसूतनिरतिशयस्याद्वादविचारैः श्रीहरिभद्रसूरिभिः" स्याद्वादरत्नाकरे श्रीदेवसूरयः, इति पंचकल्पजीतकल्पक्षेत्रसमाससंग्रहणिविशेषणवतीविशेषावश्यककऋषिभाषितवसुदेवहिंडियोनिप्राभृतअजितशांतिस्तवकर्म्मप्रकृतिसंस्कृतप्राकृतव्याकरणकर्म्मग्रन्थचैत्यवंदनभाष्यादिसंमत्यादिदर्शनशास्त्रउमास्वातिवाचकश्रीहरिभद्रसूरिकृतानेकप्रकरणाद्यनेकग्रन्थरूपविस्तृतसर्वनोमु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खशाखाप्रशाखम् ११ ॥

ललितविस्तरादिवृत्तिचूर्ण्योऽपि सूत्रसंबद्धत्वात् तथाविधबहुश्रुतदृष्टत्वाच्चावश्यकनंद्यादिवृत्तिचूर्णिवदेव प्रमाणयितव्याः, यत एकत्राप्रमाणत्वप्रतिपत्तौ अन्यत्रापि तत् प्रसज्यते, विशेषाभावात्, विचित्रसामाचारीविहितार्था अपि प्रमाणं, यदुक्तं–'अत्थि णं भंते! समणा णिग्गंथा कंखामोहणिज्जं कम्मं वेइंति?, हंता' अत्थि, कहंनं भंते!०, गो०! तेहिं तेहिं नाणंतरेहिं दंसणंतरेहिं चरित्तंतरेहिं लिंगंतरेहिं पवयणंतरेहिं कप्पंतरेहिं मग्गंतरेहिं मयंतरेहिं नियमंतरेहिं पमाणंतरेहिं संकिया कंखिया विचिगिच्छिया भेयसमावन्ना कलुससमावन्ना एवं खलु समणा निग्गंथा कंखामोहणिज्जं कम्मं वेइंति' अत्र 'मग्गंतरेहिं'ति पदस्येयं वृत्तिः–मार्गः–पूर्वपुरुषक्रमागता सामाचारी तत्र केषांचित् द्विश्चैत्यवंदनानेकविधकायोत्सर्गकरणादिकाऽऽवश्यकसामाचारी, तदन्येषां तु न तथेति किमत्र तत्त्वमिति, समाधिश्च गीतार्थाशठप्रवर्तिताऽसौ सर्वापि न विरुद्धा, आचरितलक्षणोपेतत्वाद्, आचरितलक्षणं चेदं–'असढेण समाइन्नं जं कत्थइ केणई असावज्जं। न निवारियमन्नेहिं बहुमणुमयमेयमायरियं ॥१॥'ति भग० प्रथ० शतक उ० ३। तथोपदेशमालायोगशास्त्रदिनकृत्याद्यनेकप्रकरणानि जिनादिचरित्राणि च प्रमाणं, परंपरागतार्थसंग्रहात्मकत्वात् बहुश्रुताशठकृतत्वात् बहुश्रुतैश्च प्रमाणीकृतत्वात् संग्रहणिवत्, यच्चोक्तहेतुत्रयशून्यं न तत्प्रमाणं कल्पितकथाविचारादिवत्, ननु तेषु कियन्तोऽप्यर्थाः पूर्वशास्त्रेष्वदृष्टा कैश्चित् प्रकरणादिषु निबद्धाः संभाव्यन्ते वर्तमानागमे तेषामनुपलभ्यमानत्वात्, मैवमुच्यतां, यतस्तेषां ग्रन्थकाराणां काले यावन्ति श्रुतानि पूर्वाद्युद्धृतान्यभूवन् तेषु कियंत्येव सन्ति, न सर्वाणि, तथा च सति बहुश्रुतकृतेषु परःसहस्रप्रवचनहृदयज्ञगीतार्थप्रमाणीकृतेषु जिनाज्ञैकरसिकपरोलक्षसंविग्नजनानुष्ठीयमानार्थेषु जिनप्रवचनप्राप्तप्रौढप्रतिष्ठेषु प्रकरणादिशास्त्रेषु पूर्वशा-

जिनवचने-ललितविस्तरादिप्रामाण्यं १२



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्वादृष्टार्थनिबंधरूपित्वभाषिणः कथं न मिथ्यावादित्वं इति ललितविस्तरादिवृत्तिचूर्णीविचित्रसामाचारीउपदेशमालायोगशास्त्रदिनकृत्याद्यनेकप्रकरणजिनादिचरित्रपवित्रप्रसूनप्रकरम् १२ ॥

एवं च जिनप्रवचने महासमुद्रवद्गंभीरे व्यवस्थिते सति कानि शास्त्राणि सूत्रलक्षणोपेतानि कानि च नेति?, उच्यते, श्रूयतां तावत् सूत्रलक्षणं–अप्पगंथमहत्थं बत्तीसादोसविरहियं जं च। लक्खणजुत्तं सुत्तं अट्ठहि य गुणेहिं उववेयं ॥१॥ अलियमुवघायजणयं निरत्थगमवत्थयं छलं दुहिलं। निस्सारमहियमूणं पुणरुत्तव्वाहतमजुत्तं ॥२॥ कमभिन्नवयणभिण्णं विभत्तिभिण्णं च लिंगभिण्णं च। अणभिहियमपयमेव य सभावहीणं ववहितं च ॥३॥ कालजतीछविदोसा समयविरुद्धं च वयणमित्तं च। अत्थावत्ती दोसो हवंती असमासदोसो य ॥४॥ उवमारूवगदोसो परप्प(अत्था)वत्ती असंधिदोसो य। एए उ सुत्तदोसा बत्तीसं होंति नायव्वा ॥५॥ निद्दोसं सारवंतं च, हेउजुत्तमलंकियं। उवणीतं सोवयारं च, मितं मधुरमेवय ॥६॥ कल्पभाष्यपीठे। गणधरादिकृतं च शास्त्रं सूत्रलक्षणोपेतं भवति, तथाहि–"सुत्तं गणहररइयं तहेव पत्तेयबुद्धरइयं च। सुअकेवलिणा रइअं अभिन्नदसपुव्विणा रइयं ॥१॥ संग्रहण्यां, अथ सूत्रलक्षणोपेतशास्त्राणि नामग्राहमुच्यन्ते, तद्यथा–अंग ११ उपांग १२ आवश्यकदशवैकालिकपिण्डनिर्युक्तिउत्तराध्ययनरूपमूलग्रन्थ ४ दशाश्रुतस्कंधकल्पव्यवहारनिशीथमहानिशीथलक्षणच्छेदग्रन्थ ५ रूपग्रन्थानां ३२ निश्चितं सूत्रत्वं, गणधरादिकृतत्वस्य सुप्रसिद्धत्वात्, पाक्षिकसूत्रोक्तत्वात्, सप्ताष्टानां नंद्यादिवर्तमानग्रन्थानां च, ऋषिभाषितान्यपि सूत्ररूपाणि, परं तानि चतुःपञ्चषट्सप्तादिप्रतिनियतगाथादिप्रमाणानि दृश्यन्ते, सांप्रतं योगविधानादिषु च तेषां योगविधिर्न दृश्यते, भाष्यवृत्त्यादि च न श्रूयते, क्वापि योगविधौ २१ प्रकीर्णकानि दृश्यन्ते, तेषु च प्रतिनियतानामेव जीतकल्पादीनां च रचयितारो नामग्राहं ज्ञायंते,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ते च जिनभद्रगणक्षमाश्रमणादयो दशपूर्वधराद्यन्यतरा न भवन्ति, पूर्वगतश्रुतधारकादित्वेन प्रसिद्धत्वात्, येषां च कर्तारो न ज्ञायन्ते तानि गणधरादिकृतानि तदपरबहुश्रुतकृतानि वेति निर्णयः कर्तुं न शक्यते, वक्तुं च न युज्यते, यदुक्तं–"अइयंमि उ कालंमि, पच्चुपन्नमणागये। जमट्ठं तु न जाणिज्जा, एवमेयंति नो वए ॥१॥ दशवै०। यच्चार्थात् सूत्रस्य बलवत्त्वं प्रतिपद्यते तन्न, यदुक्तं–तित्थयरत्थाणं खलु अत्थो सुत्तं तु गणहरत्थाणं। अत्थेण य वंजिज्जइ सुत्तं तम्हा उ सो बलवं ॥१॥ व्यव० उ० ४ भाष्यं, सुत्तइत्ताओ अत्थइत्तो महड्ढिओ व्यव० चू०, अवि रायत्थाणीओ तित्थगरो, अत्थमंडलीए उवविट्ठो आयरिओ तित्थगरत्थाणीओ, एवं अत्थवायओ बलिओ" व्यव० चू० उ० ६। अर्थश्च निर्युक्त्यादिरूपः, यदुक्तं–'निक्खोभा निकंपा सुत्तत्था' निःक्षोभो वादिना क्षोभयितुं–चलयितुमशक्यत्वात्, निष्प्रकम्पौ-स्वरूपतोऽपीषद्व्यभिचारलक्षणाभावात्, कावित्याह–'सूत्रार्थौ' सूत्रं च अर्थश्च–निर्युक्तिभाष्यसंग्रहणिचूर्णिपंजिकादिरूपः सूत्रार्थः" समवायवृत्तौ सूत्रकृदंगवर्णने, व्युच्छिन्नाव्युच्छिन्नसूत्रपूर्वांगादित उद्धृतानि कर्मग्रन्थसंग्रहण्याद्यनेकप्रकरणानि अर्थरूपतां न व्यभिचरन्ति, कथंचित् संग्रहणिलक्षणत्वात्, तथा कदाचित् कोऽप्येवं वक्ष्यति–गणधरादिकृतमेव प्रमाणतया स्वीक्रियते, नापरं चूर्ण्यादि, तदयुक्तं "यतश्चूर्ण्यादीनि सूत्रव्याख्यारूपाणि, तेषामप्रामाण्ये सूत्रेषु प्रतिपदं प्रतिनियतार्थप्रतिपत्तिर्न भवति, सर्वथाप्यर्थानवगमो वा, चूर्ण्याद्यनपेक्षतथाविधार्थधारणाबलोपेतपुरुषपरम्परामायाताम्नायस्य क्वाप्यनुपलंभात्, अपरं च–प्रव्रज्योपस्थापनाद्यनेककृत्येषु वंदनककायोत्सर्गादिबहुविधानुष्ठानं प्रतिनियतं सूत्रेऽदृश्यमानं चूर्ण्याद्युपदिष्टं विधीयमानमुत्सूत्रं भवेद्, एवं च तस्य सर्वसंयमव्यापाराणामप्रामाण्यं प्रसज्यते, अथ चूर्णयः प्रमाणं, न वृत्त्यादीनि, एवं चेत्तदा निशीथचूर्णौ भाद्रपदसितचतुर्थ्यां पर्युषणा व्यवहारचूर्ण्यां चतुर्दश्यां पाक्षिकत्वं आवश्यकचूर्णौ श्रावकाणां सामायिकादावौ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पग्रहिकरजोहरणादि देशपौषधे भोजनं प्रथमद्वितीयवंदनाया निष्क्रमणवर्जः सर्वोऽपि विधिः सदृशं जिनानां बलित्वं पाक्षिकचूर्णौ साधूनामष्टमीचतुर्दश्योरुपवासकरणमित्यादीनां यथास्थानं लेशतो दर्शयिष्यमाणानां प्रामाण्याप्रतिपत्तौ जिनाज्ञाभङ्गः स्ववचनविरोधश्च कथं न भवति?, वृत्त्यादीनां चाप्रामाण्ये सूत्रस्य प्रतिनियतार्थावगमाभावः सर्वथा सर्वथाऽर्थानवगमो वा प्रसज्यते। किंच– चैत्यवन्दनकायोत्सर्गाणामष्टोच्छ्वासमानत्वं ललितविस्तरादौ व्यंजितं दृश्यते इत्यकरणीयं स्यादिति। अथ वृत्तयोऽपि प्रमाणं, न पुनः संप्रदायप्रकरणानि इतिचेत् तदा सूत्रकृदंगवृत्तौ पूर्णिमापरिहारेण चतुर्दश्याः पौषधपर्वत्वं कल्याणिकतपश्च सूत्रसंबद्धललितविस्तरावृत्त्यादिषु चतुःस्तुत्यादिविधानेन देववंदनमित्यादीनि निर्विवादं प्रतिपत्तव्यानि। यच्च संप्रदायप्रकरणार्थानां प्रामाण्यं न स्वीक्रियते तदप्ययुक्तं, यतः–श्रावकाणां सामायिकदंडके भणेणं वायाए इत्यादि सूत्रमखंडं आवश्यचूर्णीवृत्त्यादिषु सुव्यक्ताक्षरमदृश्यमानं १ गृहस्थानामुपवासादिप्रत्याख्यानेषु पारिट्ठावणिए इत्याद्याकारोच्चारणं २ तेषां चालोचिताचाराणां व्यक्त्या यथार्हालोचनादिदशविधप्रायश्चित्तान्यतरापत्तिः ३ पृथक् पृथक् पुरिमार्द्धैकाशनादिप्रायश्चित्तप्रदानप्रकारश्च ४ निर्विकृतिकैकासनानां त्रयेण चतुष्केणाभक्तार्थप्रवेशनं ५ आपत्तावपि केवलस्य निर्विकृतिकस्याप्रदानं ६ संयतीत्रयस्य छेदग्रंथेषु गोचरचर्यादौ गमननिर्देशेऽपि तद्द्वयस्यापि तत्र गमनं ७ संयतासंयतीनां सुव्यक्तं विभिन्नो देहप्रतिलेखनादिविधिः ८ योगेषु पात्रकादिविषयसंघट्टकादिसत्यापनं ९ विभिन्नाकारफलकपात्रादीनां विभिन्नप्रतिनियतप्रतिलेखप्रमार्जने १० संविग्नसंप्रदायरूढयोगविधौ स्पष्टदृश्यमानक्रमकालमंडलस्वाध्यायप्रस्थापनाकालग्रहणादिविधिः ११ योगाप्रवेशानंतरं दिनत्रयावस्थानमेव १२ क्वचिदाचाम्लपाल्यामपि योगेषु निर्विकृतिकानुग्रहः १३ केषांचिद्योगेषु निर्विकृतिकमेकासनमेव केषांचिदन्यथापि १४ चतुःशरणप्रकीर्णकादीनां योगविधिः संघट्टकादिविशेषविधिविरहितः १५ जिनप्रतिमा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सूरिवाचकवाचनाचार्यादिपदप्रतिष्ठाविधिः १६ लौकिकटिप्पनाभिप्रायेण दीक्षोपस्थापनादिषु तिथिवारादिकरणसंध्यागतादिनक्षत्र-प्रथमादिनक्षत्रचन्द्रग्रहचारादिशुद्धमुहूर्त्तादानं पर्युषणापर्वकरणं च १७ पौषधादिग्रहणपारणविधिः १८ पौषधोच्चारदंडकः १८ पौष-धशय्यासंस्तारकादीनां प्रतिनियतप्रतिलेखनप्रमार्जनविधिः २० सूरिमंत्रकल्पादिषु दृश्यमाना विविधाम्नायास्तत्साधनार्थं विचित्र-तपप्रकारश्च २१ इत्यादीनि बहुसंमतान्यनेकानि धर्मकृत्यानि दृश्यन्ते, एवं सूत्रनिर्युक्तिभाष्यचूर्णीवृत्तिप्रकरणादीनि संप्रदायश्च सर्वाण्यपि प्रमाणतया प्रतिपत्तव्यानि, तदुपदिष्टकर्तव्यानां सर्वत्रापि प्रमाणत्वात्, यानि च 'तित्थयरवयणकरणे आयरियाणं पए कयं होइ' इत्याद्योघनिर्युक्त्याद्यक्षरश्रवणमात्रसंजातवैमत्येन 'पंचविहायारायरणसीलस्स गुरुणोऽपि उवएसवयणं आणा, तम-न्नहा आयरंतेण गणिपडिगं विराहियं भवइ'त्ति नंदिचूर्ण्याद्यनेकवचनान्यवगणय्य संप्रदाया न प्रमाणमित्युच्यते संप्रदायादिदृष्टानि बहून्यपि कृत्यानि क्रियन्ते स तन्मतेनापि जिनप्रवचनबाह्यकृत्यकारित्वात् कथं नोत्सूत्रचारी ?, अथवा 'आयरियपरंपरए समा-गयं जो उ छेयबुद्धिए' इत्यादि० मू० निर्यु०, को कत्ता ?, सत्था, तित्थकरेण कयं न कोविज्जइत्ति वुत्तं भवति, एवं सो गीयत्थो कत्तात्र विहीए करिंतो अकोप्पो भवइ, कत्ता इव—तीर्थकर इवेत्यर्थः। नि० चू० उ० १६। गुरूणं भंते! कइ पडिणीया पन्नत्ता?, गो०! तओ पडिणीया पं०, तं०—आयरियपडियाणीए उवज्झायपडिणीए थेरपडिणीए, समूहं नं भंते! पडुच्च कइ पडिणीया पं०?, गो०! तओ पडि०—कुलपडिणीए गणपडि० संघपडि०, प्रतीत्य—आश्रित्य प्रत्यनीकमिव—प्रतिसैन्यमिव प्रतिकूलतया ये ते प्रत्यनीकाः। समूहं—साधुसमुदायं प्रतीत्य, तत्र कुलं—चान्द्रादिकं तत्समूहो गणः—कोटिकादिस्तत्समूहः संघः प्रत्यनीकता चैतेषामव-र्णवचनादिभिरिति। कुलादिलक्षणं चेदम् "इत्थ कुलं विण्णेयं एगायरियस्स संतई जा उ। तिण्ह कुलाण मिहो पुण साविक्खा गं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





गणो होइ ॥१॥ सव्वोऽवि नाणदंसणचरणगुणविभूसियाण समणाणं । समुदाओ पुण संघो गुणसमुदाउत्ति काउणं ॥२॥" भग० शत ८ उ० ८, सूत्रवर्त्ती, इत्यादिवचनैराचार्यपरंपरासंप्रदायाद्यप्रामाण्यवादिनो जिनप्रवचनप्रत्यनीकत्वं साक्षादेवोक्तं दृश्यते इति **सूत्रलक्षणोपेतसूत्रार्थचूर्णिवृत्तिप्रकरणसंप्रदायादिप्रामाण्यसुप्रतिष्ठपीठबंधम् १३ ॥**

**गरीयस्तरेभ्योऽपि श्रीसंघस्य निग्रहानुग्रहसमर्थतया च गुरुतमत्वं दृश्यते,** तथा हि–तंमि य काले बारसवारिसिओ दुकालो जातो, संजताइओ तओ य समुद्दतीरे अच्छित्ता पुणरवि पाडलिपुत्ते मिलिया, अण्णस्स उद्देसो अण्णस्स खंडं एवं संघातिताणि संघातंतेहिं इकारस अंगाणि, दिट्ठिवाओ नत्थि, णेमालवत्तणीए य भद्दबाहू अच्छंति चोद्दसपुव्वी, तेसिं संघेण संघाडओ पत्थविओ, दिट्ठिवायं वाएहत्ति, गंतूण निवेइयं संघकज्जं, ते भणंति–दुकालणिमित्तं महापाणं न पविट्ठोमि, इदाणिं पविट्ठो, तो ण जाइ वायणं दाउं, पडिणियत्तेहिं संघस्स अक्खायं, तेहिं अण्णो संघाडओ विसज्जिओ, जो संघस्स आणं वतिक्कमति तस्स को दंडो ?, ते गया, कहियं, भणइ–उग्घाडिज्जइ, ते भणंति–ता खाइं उग्घाडिज्जह, भणति–मा उग्घाडेह, पेसेह मेहावी, सत्त पडिपुच्छाओ देमि, भिक्खायरियाए आगओ १ कालवेलाए २ सण्णाए आगओ ३ वेयालिए ४ आवस्सए उ तिण्णि ७, महापाणं किर जया अइगओ भवति तदा उप्पन्ने कज्जे अंतोमुहुत्तेण चोद्दस पुव्वाणि अवगाहति" आव० वृत्तौ योगसंग्रहेषु इति, **गुरुतरेभ्योऽपि दृश्यमानश्रीसंघगुरुतमत्वं जिनप्रवचनं १४ ॥ जिनप्रवचनस्वरूपविचारः १ ॥**

ननु चतुर्दश्यां पाक्षिकं कस्मात् क्रियते ?, उच्यते, यत् चतुर्दश्यां पाक्षिके सति नाम तत्कृत्यानि चागमे दृश्यन्ते, न पञ्चदश्यामिति, तथाहि–विन्नाणं परिवाडी पव्वे पव्वे य दिंति आयरिया । मासद्धमासियाणं पव्वं पुण होति मज्झं तु ॥ १ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





आचार्याः पर्वणि २ विद्यानां परिपाटीर्ददति, विद्याः परावर्तन्त इति भावः अथ पर्व किमुच्यते ?, तत आह–मासार्धमासयोर्मध्यं पुनः पर्व भवति। एतदेवाह–पक्खस्स अट्ठमी खलु मासस्स य पक्खियं मुणेयव्वं। अण्णंपि होइ पव्वं उवरागो चंदसूराणं ॥१॥ अर्द्धमास्यस्य–पक्षात्मकस्य मध्यमष्टमी मासस्य मध्यं पाक्षिकं–पक्षेण निर्वृत्तं, तच्च कृष्णचतुर्दशीरूपमवसातव्यं। तत्र प्रायो विद्यासाधनोपचारभावादिति। चाउद्दसीगहो होति कोइ अहवावि सोलसिग्गहणं। वत्तं तु अणज्जंतो होइ दुरायं तिरायं वा ॥१॥ कोऽपि विद्याग्रहः चतुर्दश्यां, अथवा षोडश्यां–शुक्लपक्षप्रतिपदि, एकदिनेन व्यक्तमज्ञायमाने विद्याग्रहणाय भवति द्विरात्रं त्रिरात्रं वा विष्वग्वसनमिति। व्यव० वृ० उ० ६ 'विज्जाणं' गाहा। 'पव्वस्स' विभासा। 'मज्झं' गाहा। पक्खस्स मज्झं अट्ठमी बहुलाइया मासत्तिकाउं, मासस्स मज्झं पक्खियं किण्हपक्खस्स चउद्दसीए विज्जासाहणोवयारो। आह–यद्येवं तेणं एगरायग्गहणं कायव्वं, दुरायं तिरायं वेति न वत्तव्वयं, अत उच्यते–'चाउद्द' गाहा कंठ्या। व्यव० चू० उ० ६, अत्र वृत्तौ चूर्णौ च पाक्षिकशब्देन चतुर्दश्येव व्याख्याता, विद्यासाधने विशेषोपयोगित्वाच्चेह मासमध्यगतायास्तस्या ग्रहणं, वृत्तिचूर्णिकृद्भ्यां तथैव समर्थित्वात्। 'पक्खियं पोसहिएसु' इति पदं व्याख्यानतया केवलं पाक्षिकं प्रथमव्याख्याने भणितं, तच्च चतुर्दशीरूपमुन्नीयते, अन्यथा द्वितीयव्याख्याने पाक्षिकं 'पक्खियपोसहिएसु समाहिपत्ताणं' दशासूत्रे 'पक्खियं–पक्खियमेव, पक्खिए पोसहो चाउद्दसि अट्ठमीसु वा समाधिपत्ताणं'ति दशाचूर्ण्योः संगृहीतं न स्यात्, तथा च सति पक्खियपोसहिएसुंति पदं व्याख्यातं न स्यात्। पाक्षिकसप्ततिवृत्तौ श्रीमुनिचंद्रसूर्यादिभिरेवमेवैतद्विचारितमस्ति। चउमासपडिक्कमणं पक्खियदिवसंमि चउविहो संघो। नवसयतेणउएहिं आयरणं तं पमाणंति ॥१॥ संदेहविषौ० अत्रोक्तप्रकारेण पाक्षिकशब्देन चतुर्दशी लभ्यते, पाक्षिकदिने च पाक्षिकप्रतिक्रमणं कार्यं, तथाहि–



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पडिक्कमणं देसियं राइयं च, दिवसओ देवसियस्स रातो राइयस्स पक्खिए पक्खियस्स चाउम्मासिए चाउमासियस्स संक्खरिए संवच्छरियस्स आव० चू०, जो पज्जोसवणाए इत्तरियंऽपाहारं आहारेइ आहारितं सावज्जति नि०, इत्तरियंपाहारं पज्जोसवणाइ जो उ आहारे। तयभूइबिंदुमादी सो पावति आणमाईणि ॥१॥ उत्तरकरणं एगग्गया य आलोय चेइवंदणया। मंगल धम्मकहाविय पव्वेसुं तवगुणा हुंति ॥२॥ अट्ठमछट्ठचउत्थं संवरच्छचाउमासि पक्खियए। पोसहिय तवे भणिए वितियं असहू गिलाणे य ॥३॥ नि०भा० 'इत्तरियं नाम थोवं एगसित्थमवि अट्ठलंबणादि वा, अहवा आहारे तताभित्तं सादिमे मिरियचुण्णगादि भूतिमित्तं तएति तिलतुसतिभागमित्तं भूतिरिति यत्प्रमाणं अंगुष्ठप्रदेशिनीसंदंशकेन भक्तोपगृह्यते पानके बिन्दुमात्रमपि, आदिग्रहणतो खादिमंपि थोवं जो आहारेति पज्जोसवणाए सो आणादोसे पावति, पव्वेसु तवं करिंतस्स इमो गुणो भवति। 'उत्तरकरणं' गाहा, उत्तरकरणं कतं भवति। एगग्गता य कता भवति। पज्जोसवणासु य वरिसिया आलोयणा दायव्वा, चेइयवंदणपरिवाडी य कायव्वा, वरिसाकालस्स य आदीए मंगलं कयं भवति। सड्ढाण य धम्मकहा कायव्वा, पज्जोसवणादिएसु पव्वेसु एए तवोगुणा भवंति, सो य इमो तवो—'अट्ठमछट्ठ' गाहा। पज्जोसवणाए जदि अट्ठमं न करेति तो पच्छित्तं, जम्हा एते दोसा तम्हा जहा भणिओ तवो कायव्वो, 'बितियं'ति न करेज्जावि, उववासस्स असहू न करिज्जा, गिलाणो वा न करिज्जा, गिलाणपडियरगो वा, सो उववासं वेयावच्चं च दोऽवि काउं असमत्थो, एवमादिएहिं कारणेहिं पज्जोसवणाए आहारंतो विसुद्धो नि० चू० उ १०,३३९। कितिकम्मस्साकरणे काउस्सग्गे तहा अपडिलेहा। पोसहिय तवे य तहा अवंदणे चेइसाहूणं ॥ १ ॥ पोसहियतवे य इति व्याख्यानयति—चउत्थछट्ठट्ठमकरणे पक्षे—पाक्षिके चतुर्थस्याकरणे चतुर्म्मासे षष्ठस्याकरणे सांवत्सरिकेऽष्टमस्याकरणे प्रायश्चित्तं, तथा एतेषु चाष्टम्यादिषु दिव-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सेषु चैत्यानामन्यवसतिगतसुसाधूनां चावंदने प्रत्येकं प्रायश्चित्तं व्य० वृ० पीठे०, अट्ठमीए चउत्थं पक्खिए चउत्थं चाउम्मासिए छट्ठं संवच्छरिए अट्ठमं न करेति पच्छित्तं, चशब्देन एएसु चेव चेतिया साहुणो व जे अण्णाए वसहीए ठिया ते न वंदति पच्छित्तं व्यव० पी० चू०, इह निशीथव्यवहारचूर्ण्यादौ चैत्यपरिपाटिसुसाधुवंदनचतुर्थादीनि यानि पाक्षिकसंबंधीनि विशेषकृत्यानि भणितानि तानि चागमे चतुर्दश्यां दृश्यन्ते। तथाहि—"अट्ठमीचउदसीसु अरहंता साहुणो य वंदियव्वा।" आव० चू० का० नि०, संते बलवीरियपुरिसयारपरक्कमे अट्ठमीचाउद्दसीनाणपंचमीपज्जोसवणाचाउम्मासिए चउत्थट्ठमछट्ठे न करिज्जा पच्छित्तं। महानिशीथे अध्य०। इच्छामि खमासमणो! पियं च मे इत्यादि, गुरू भणइ—एयं पोसहियत्ति अट्ठमीचउद्दसीउववासकरणं सेसं कंठ्यं, पाक्षिकचूर्णौ। पाक्षिकविशेषकृत्यानां चतुर्दश्यामभिधानात् पाक्षिकप्रतिक्रमणमपि तत्रायाति, यत उभयान्यपि आवश्यके निशीथव्यवहारचूर्ण्यादिषु निर्विशेषं पाक्षिकदिने एव कथितानि, उक्तं चात्र देवसूरीणां गुरुभिः श्रीमुनिचंद्रसूरिभिः पाक्षिकसप्तत्यां—'चेइयजइवंदणतवदिणंमि पडिक्कमणमत्थओ एइ। नय पुण सुत्ते दीसइ जह पंचदसीइ पडिक्कमणं ॥१॥' तथा "बहूहिं सीलव्वयगुणवेरमणपच्चक्खाणपोसहोववासेहिं चाउद्दसट्ठमुद्दिट्ठपुन्निमासिणीसु पडिपुन्नं पोसहं सम्मं अणुपालेमाणा" भगवत्यां श० २, इहोद्दिष्टा—अमावास्येति वृत्तिः, एवं भगवत्याद्यागमेषु श्रावकधर्मप्रक्रमे यच्च चतुर्दश्यादिचतुष्पर्वीग्रहणं तत् एतासु प्रतिपूर्णपौषधो विधेय इत्यस्यार्थप्रख्यापनार्थं, यतोऽत्र चतुर्दश्यां पञ्चदश्यां वा पाक्षिकविधिर्विशेष्योक्तो न दृश्यते, तथा यस्मिंश्च दिने साधूनां पाक्षिकप्रतिक्रमणविधिस्तस्मिन्नेव दिने श्रावकाणामपि स युक्तः, चतुर्दशीमतिक्रम्य पञ्चदश्यामागमे पाक्षिकप्रतिक्रमणस्यादृश्यमानत्वात्, तपःप्रभृतिविशेषकृत्यानि चतुर्दश्यां श्रावकाणामपि दृश्यन्ते, तथाहि—फासुगचारी किणिऊण दिज्जइ, एवं पोसिज्जंति, सो य



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सावओ अट्ठमीचउद्दसीसु उववासं करेइ पुत्थयं च वाएइ, तेऽवि तं सोऊण भद्दया जाया, उवसंता सण्णिणो, जद्दिवसं सावओ न जेमेइ तद्दिवसं तेऽवि न चरंति" आव०चू०, "सागरचंदो कमलामेलावि सामिसगासे धम्मं सोऊण गहियाणुव्वयाणि सावगाणि संवुत्ताणि, ततो सागरचंदो अट्ठमीचउद्दसीसु सुण्णघरेसु मसाणेसु वा एगराइयं पडिमं ठाइ" आव० चू०। चंपाए सुदंसणो सेट्ठिपुत्तो अट्ठमीचाउद्दसीसु(सुण्ण)घरेसु उवासगपडिमं पडिवज्जइ, सो महादेवीए पडियरिज्जमाणो निच्छइ, आव०चू० कायो०। अट्ठमीचउद्दसीसु पभावई भत्तिराएण सतमेव रातो नट्टोवयारं करेति, रायावि तदणुवत्तीए मुरवे पवादेति, अण्णदा पभावईए नट्टोवयारं करंतीए रण्णो सिरछाया न दिट्ठा" निशी० चू० उ १०। राया अट्ठमीचउद्दसीसु पोसहं करेति आव० चू० ५०४ ३४, वृत्तौ च, इत्यादीनि। तथा सव्वेसुवि कालपव्वेसु सुपसत्थो जिणमए तहा जोगो। अट्ठमीपन्नरसीसु य नियमेण हविज्ज पोसहिओ ॥१॥ आव० चू०। अट्ठमी-चउद्दसीसुं इति पुस्तकांतरे, अत्र प्रथमपाठेऽपि उपलक्षणाच्चतुर्दशी नेया, अन्यथा 'से णं चाउद्दसिअट्ठमिपुन्निमासिणीसु पडिपुन्नं पोसहं संमं अणुपालित्ता भवति' आव० चू० श्राद्धप्रतिमाऽधिकारे इत्यादिभिः सहास्या गाथाया विसंवादः स्यात्, यत आवश्यक-चूर्णौ प्रथमप्रतिमायां शीलव्रतगुणादीनां द्वितीयस्यां सामायिकदेशावकाशिकयोः तृतीयस्यामष्टमीचतुर्दशीपौर्णिमासु पौषधस्य नो संमं अणुपालिता भवतीति वचनादनियतकरणत्वमुक्तं, चतुर्थ्यां तु 'सम्मं अणुपालिता भवती'ति भणनात् नियतकरणत्वमभाणि, यद्वा भाद्रपदशुक्लपञ्चम्यां संवत्सरवत् पूर्वचतुर्दशीतो द्वितीयचतुर्दश्याः प्रायः पञ्चदशे दिने संभवाद् यदि पञ्चदशीशब्देन चतुर्दशी विवक्षिताऽत्र स्यात् तदाऽस्या गाथाया अर्थस्य पूर्वलिखितैर्जिनदासश्राद्धादिविषयालापकैः सह संवादः स्यात्, अन्यथा वाऽऽगमानु-वादेन विचार्यं, तथा 'से णं लेवए गाहावती समणोवासते अभिगयजीवाजीवे इत्यादि सूत्रदेशस्य वृत्तिरियं, तद्यथा—चतुर्दश्यष्टम्या-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दिषु तिथिषु उद्दिष्टासु—महाकल्याणिकसंबंधितया पुण्यतिथित्वेन प्रत्याख्यातासु तथा पौर्णमासीषु च, तिसृष्वपि चतुर्मासकतिथिष्वित्यर्थः, एवंभूतेषु धर्मदिवसेषु सुष्ठु—अतिशयेन प्रतिपूर्णो यः पौषधो—व्रताभिग्रहविशेषस्तं प्रतिपूर्णमाहारशरीरब्रह्मचर्याव्यापाररूपं पौषधमनुपालयन् संपूर्णश्रावकधर्ममनुचरति" सूत्रकृदंगे द्वितीयश्रुतस्कंधेऽध्य० ७ लेपश्रावकवर्णके पत्र ३१२, "चतुर्दश्यष्टमीपौर्णमाणीषु संपूर्णं पौषधं" सूय० द्वि० श्रुतस्कंधेऽध्य० ७ पत्र ३२१, इहापि चामावास्यायाः पर्वत्वं निर्दिष्टं न दृश्यते, एवं च श्रावकाणामपि पाक्षिकप्रतिक्रमणविधिः चतुर्दश्यां समेति, यदुक्तं पाक्षिकसप्तत्यां—जंमि दिणे साहूणं जुत्तो सो तंमि सावयाणंपि। पक्खपडिकमणविही तवाइतुल्लत्तभावातो ॥ १ ॥ अट्ठमछट्ठचउत्थं संवच्छरचाउमासपक्खेसुं" इत्यादि, अत्र पाक्षिके चतुर्थस्यावस्थितत्वात् पाक्षिकं चतुर्दश्यामेवावसीयते, यदि पुनः पञ्चदश्यां स्यात्तदा चतुर्दश्यामुपवासस्य पाक्षिकचूर्णिमहानिशीथाद्युक्तत्वेन सर्वसंमतत्वात् पञ्चदश्यां च पाक्षिकत्वेन तस्य सद्भावात् पाक्षिकमपि षष्ठेन स्यात्, तथा च अट्ठमछट्ठमछट्ठमिति पठ्येत, अथ चतुर्दश्युपवासश्चतुर्दशीसत्क एव न पाक्षिकप्रतिबद्धस्तर्हि चतुर्मासकेऽपि प्रथमोपवासस्य चतुर्दशीपर्वप्रतिबद्धत्वेन द्वितीयोपवासस्यैव चतुर्मासकसत्कत्वेन अट्ठमचउत्थचउत्थमिति स्यात् इत्यादि, ततः पाक्षिकचतुर्थोपदेशाच्च चतुर्दशीपाक्षिकयोरैक्यमेव तेषां पूर्वर्षीणां सम्मतमिति निर्णीयते, यत्र ह्यालापके चतुर्दशी गृहीता न तत्र पाक्षिकं यत्र च पाक्षिकं न तत्र चतुर्दशीति, तथाहि—'अट्ठमीचउद्दसीसु उववासकरण'मिति पाक्षिकचूर्णौ 'सो य सावओ अट्ठमीचउद्दसीसु उववासं करेइ' आव० चू० 'अट्ठमीचउद्दसीसु अरहंता साहुणो य वंदियव्वा' आव० चू० 'चउत्थछट्ठट्ठऽकरणे अट्ठमीपक्खचउमासवरिसे य लहु गुरु०' भाष्यपीठे 'अट्ठमीचउद्दसीनाणपंचमीचउमाससंवच्छरिएसु०' महानिशीथे० अथ 'कत्थइ देसग्गहणं कत्थइ घिप्पंति निरवसेसाइं। उक्कमकमजुत्ताइं सुत्ताणि



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विचित्तभावाओ ॥१॥ इति वचनात् क्कापि चतुर्दश्याः क्कापि पाक्षिकस्योपादानमिति चेन्नैवं, यतो महानिशीथे स्थितसर्वपर्वसंग्रहे चतुर्दश्युपादाने पृथक् पाक्षिकं नाभिधीयते, किं च प्रांजलं पन्थानमनास्थाय कत्थइ देसग्गहणमिति वक्रेण पथा तदा प्रस्थीयेत यदि पञ्चदशी पाक्षिकं कुतोऽपि सिद्धं स्यात्, न चामुद्रेऽप्यागमसमुद्रे प्रत्यक्षरमीक्षमाणैरपीक्ष्यते एतदिति विमुच्याभिनिवेशावेशं संनिगृह्याग्रहं चतुर्दश्युपवास एव पाक्षिकचतुर्थमित्यास्थीतां, विशेषार्थिना पाक्षिकसप्ततिवृत्तिर्विलोक्येति, उपदे० वृत्तौ श्रीदेवसूरिशिष्यश्रीरत्नप्रभसूरिकृतायामेवमर्थोऽस्ति, तथा यदि पूर्णिमामावास्यादिने पाक्षिकं स्यात्तदा चतुर्दश्यां तपश्चैत्यसाधुवन्दनाद्यकरणे भिन्नमेव प्रायश्चित्तमष्टम्यामिवोक्तं स्याद् व्यवहारभाष्यादिषु, न चोक्तं, ततः पाक्षिकचतुर्दश्योरभेदोऽवगम्यते. तथाऽऽह–'पक्खियं चउद्दसीदिणंमि पुव्वं व तत्थ देवसियं' योग० तृ० प्र० वृ० ५१९, यदाह पाक्षिकसप्ततिः–पक्खिय चाउम्मासे आलोयण नियमसो उ दायव्वा। गहणं अभिग्गहाण य पुव्वग्गहिए निवेएउं॥१॥ आवश्यके,'इच्चाइसु सुत्तेसु आलोयण पक्खिए य जा भणिया। तप्पडिसेहोऽमावासाए कह जुज्जई जुत्तं?॥२॥ मोत्तुं दुद्धतिहीउ अमावसिं अट्ठमिं च नवमिं च। छट्ठिं च चउत्थिं बारसिं च आलोयणं दिज्जा ॥३॥ तम्हा चउद्दसी पक्खियंमि वासं न पव्वदुगलेयं। सामन्नओ य पक्खियमाइट्ठं पक्खसंधीए ॥४॥ जह गेहं पइदिवसंपि सोहियं तहवि पक्खसंधीसु। सोहिज्जइ सविसेसं एवं इहयंपि णायव्वं ॥ ५ ॥ चरमदुचरमतिहीणं रुद्धं जइ नाम पक्खसंधित्तं। सविसेसकिच्चभणणा चउद्दसी चेव सो जुत्तो ॥६॥ चो० दिवसाइं अह पनरस चउमासाओ चउद्दसीदिवसे। नो पुज्जंति तओ कहमेईए पक्खपडिकमणं ॥७॥ आचा० बाहुल्लवयणमेयं पक्खे जं हुंति पनरस दियाइं। अन्नह पज्जोसवणाउ पक्खियं कह णु पुज्जिज्जा? ॥ ८ ॥ लोगेऽवि सिद्धमेयं जह किल वरिसंमि हुंति छप्पक्खा। दिणचोद्दसगेण तहा समएवि फुडक्खरं भणियं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥९॥ आसाढबहुलपक्खे भद्दवए कत्तिए य पोसे य। फग्गुण वइसाहेसु य बोद्धव्वा ओमरत्ताओ ॥१०॥ पक्खो य चंदसिद्धो न घिप्पए वच्छरो व इह सुत्ते। किं पुण चउद्दसीओ तिहीउ सो चउद्दसी जाव ॥ ११ ॥ यतो व्यवहारचूर्णौ मासार्धरूपं पाक्षिकं चतुर्दश्यामुक्तं ॥१२॥ परिहारविसुद्धीणं गीयत्थाणं च पुव्वसूरीणं। एस च्चिय आयरणा अलंघणिज्जा जओ भणियं ॥ १३ ॥ आयरियपरंपरए समागयं जो उ आणुपुव्वीए। कोवेइ छेयवाई जमालिनासं स नस्सिहिही ॥१॥ सूत्र० निर्युक्तौ, जइ हुज्ज दुन्नि दिवसे चेइयजइवंदणोववासो य। कस्स नहु नाणुमयं? परं न सुत्तेण संवयइ ॥१५॥ अम्हाणमभिनिवेसो न कोइ इत्थ परमन्नहा सुत्तं। अघडंतंपिव पुव्वावरेण पडिहाइ किं करिमो? ॥१५॥ जं जह सुत्ते भणियं तहेव जइ तव्वियारणा नत्थि। किं कालियाणुओग्गो दिट्ठो दिट्ठिप्पहाणेहिं ॥ १७ ॥ पुव्वावरेण परिभाविऊण सुत्तंपि पासियव्वंति। जं वयणपारतंतं एयं धम्मत्थिणो लिंगं ॥१८॥ एवं तु 'कारणे कालगायरिएहिं चउत्थीए पज्जोसवणं पवत्तियं, समत्थसंघेण य अणुमन्नियं, तव्वसेण य पक्खियाईणि चउद्दसीए आयरियाणि, अन्नह आगमुत्ताणि पुण्णिमाएवि' ठाणावृत्तौ श्रीदेवचंद्रसूरिकृतायां, इह व्यवहारचूर्ण्यादौ चतुर्दश्याः साक्षात्पाक्षिकत्वे दृश्यमाने पूर्णिमायाश्च क्वाप्यागमे साक्षाददृश्यमानेऽपि ग्रन्थकृता आगमोक्तानि पूर्णिमायामिति यदुक्तं तन्न ज्ञायते केनाप्यभिप्रायेण संप्रदायेन वेति, परमेतस्मिन्नपि ग्रन्थे चतुर्थीपर्ववत् आचरितलक्षणोपेतत्वात् चतुर्दश्यां पाक्षिकादीन्यपि प्रमाणीकृतान्येव सन्तीति, इह पाक्षिकविषये जनानां कालदोषविशेषेण द्विवचनप्रवृत्तिर्दृश्यते, परं चतुर्दशीपाक्षिकविषये प्रभूतयुक्तयोऽन्यथानुपपन्नसूत्रार्थसंवादा आगमाक्षराणि वर्तन्ते, तथाहि—पाक्षिके चतुर्थचैत्यसाधुवंदनरूपाणि कृत्यानि व्यवहारादिबहुस्थानेषु कथितानि सन्ति, तथा श्रीमुनिचन्द्रसूरिशतपदीकारादिकालवर्तिपाक्षिकचूर्णौ दशाश्रुतस्कंधचूर्णिमहानिशीथावश्यकचूर्णिसमरादित्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चरित्रादिषु चतुर्दश्यां साधूनामुपवासचैत्यवन्दनादिकृत्यानि सुव्यक्तं प्रोक्तत्वात् सर्वेषां पूर्वगुरुभिरविसंवादेन करणीयतया प्रतिपन्नान्येव संति, शतपदीकारेणापि च—एवं सति यदि पञ्चदश्यां पाक्षिकं स्यात्तर्हि पाक्षिके षष्ठतपः कस्मादागमे न दृश्यते? अथ चतुर्दश्याः पृथक्पर्वत्वात्तदुपवासो न पाक्षिकप्रतिबद्धः, एवं च तर्हि चतुर्मासकमपि चतुर्थतपसा कस्मादागमे नोक्तं ?. युक्तेस्तुल्यत्वादित्यादिविस्तरः पाक्षिकसप्तत्यादौ विलोक्यः, आगमे च परःशतस्थानेष्वष्टम्यादिपर्वाणि तत्तदधिकारेषु नामतो निर्दिष्टानि सन्ति, परं यत्रालापके पर्वनामश्रेण्यां चतुर्दशी कथिता न पाक्षिकं तत्र, यत्र च पाक्षिकं न तत्र चतुर्दशीत्यतो ज्ञायते चतुर्दशीपाक्षिकयोरेकपर्वत्वं, यदि पाक्षिकतपसश्चतुर्दशीतपो भिन्नमभविष्यत्तर्हि चतुर्दश्यां तपोऽकरणे भिन्नं प्रायश्चित्तमागमे प्रोक्तमभविष्यद् अष्टम्यामिव, न चोक्तं, अतो ज्ञायते न चतुर्दशीपाक्षिकयोः पृथक्तपः १३ ॥ क्वाप्यागमे द्वयोर्दिनयोः साधूनां चैत्यसाधुवन्दनक्षपणादिकृत्यानि न दृश्यन्ते, किंतु क्वाप्यालापके चतुर्दशीनाम्ना क्वापि च पाक्षिकनाम्ना, यतीनां पाक्षिककृत्यानि आगमे पाक्षिकशब्दस्य पञ्चदशीतिव्याख्यानं पञ्चदश्यां वा भणितानि न दृश्यन्ते, परं न क्वापि पञ्चदशीनाम्ना समीक्ष्यन्ते इति ४ यस्तु पञ्चदश्यां पाक्षिकं प्रतिपद्यते स दर्शयतु क्वाप्यागमे पञ्चदशीतिव्याख्यानं पञ्चदश्या वा पाक्षिकपर्वेति नाम ५ तथा सूत्रे व्यवहारनिर्युक्तिरूपे श्रीभद्रबाहुस्वामिभिः 'मासस्स य पक्खियं मुणेयव्व'मित्यादिवचनैः पाक्षिकशब्देन चतुर्दशी विवक्षिता, चूर्णिकारादिभिरपि सुव्यक्तं सैव व्याख्याताऽस्ति, एवं च पाक्षिकविषयबहुयुक्तिआगमाक्षरस्वरूपे सति यः कश्चित् पञ्चदशीस्थापनाय पक्षेण निर्वृत्तं पाक्षिकमिति वृत्त्याद्यक्षराणि वक्ति पक्षान्तश्च पञ्चदश्यां स्यादिति युक्तिं चाभिधत्ते तस्येदं कथनीयं स्यात्—यदयं पर्वाधिकारे पक्षादिनिर्देशो दृश्यते न, असौ चन्द्रमाससमाप्त्यपेक्षयैव, अन्यथा पर्युषणायाः सांवत्सरिकेणेतिनाम कथं सुयौक्तिकं स्यात् ?, तथा व्यवहारवृत्तावपि पाक्षिकं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पक्षेण निर्वृत्तमिति निरुक्तिं विधाय चतुर्दशीपर्यायः प्रदत्तोऽस्ति, परमिमां निरुक्तिं कृत्वा क्वापि पञ्चदशीति पर्यायो न दृश्यते, अथ चतुर्मासिकानुसाराद्यदि पञ्चदश्यां पाक्षिकमाद्रियते तर्हि सांवत्सरिकानुसारात् कथं न पञ्चम्यां?, उभयत्र युक्तिप्रवचनानां तुल्यत्वात्, अथ ठाणावृत्तौ कथावलीगतायामन्यस्यामपि कस्यांचित् कालिकाचार्यकथायां पञ्चदश्यां पाक्षिकत्वदर्शनात् अस्माभिस्तदेव मन्यते इति चेत्तदा ते ग्रन्थाः प्रमाणतया मन्यन्ते न वा?, मन्यन्ते चेत्तदा तदुक्ताष्टप्रकारपूजादीनि प्रभृतानि कृत्यानि प्रमाणयितव्यानि भविष्यन्ति, अथ न मन्यन्ते पाश्चात्याचार्यकृतत्वात् तर्हि दर्श्यन्तामपराण्यागमाक्षराणि तद्विषये, अपरं च—ठाणावृत्त्यादिकृद्भिर्यत् पूर्णिमायाश्चतुर्दश्यां पाक्षिकमाचरितमित्युक्तमस्ति तत्र कालिकाचार्यैरिति, समर्थितमस्ति शतपदीकारेणापि बहुयुक्तिभिः, किंच—इयं कालिकाचार्यकथा निशीथचूर्णिपर्युषणाचूर्ण्याद्यागमेषु चतुर्दशी(र्थी)पर्वानयनाधिकारे बहुषु स्थानेषु दृश्यते, परं तत्रामावास्यायां राज्ञीनां केवल उपवास एवोक्तोऽस्ति, न तु पाक्षिकनामापि तत्र दृश्यते, अतो न ज्ञायते जयसिंहदेवराज्यभाविदेवचन्द्रसूरिशिष्टाणावृत्तौ अनिर्णीतसंभवकालभद्रेश्वरसूरिभिः कथावल्यां कालिकाचार्यकथायां कस्यापि शास्त्रस्याधारेण केनापि वाऽऽशयेन पञ्चदशीपाक्षिकमभ्यधायि, यतः सुव्यक्तं क्वाप्यागमे एतन्न दृश्यते, प्रत्युतैवं सूत्रार्थयोरघटमानत्वमापद्यते, कथं?, व्यवहारे पाक्षिकशब्देन चतुर्दशी व्याख्याता तत्रैव च पाक्षिके चतुर्थं भणितं, एवं सति चतुर्दशीक्षपणस्य सर्वसंमतत्वात् पञ्चदश्यां पाक्षिकोपवासस्य संभवात् षष्ठमापद्यते इत्यादियुक्तिभिः पूर्वमेवाघटमानत्वं किंचिल्लिखितमस्ति, किंच—एते ठाणावृत्त्यादिकृतः सूरयोऽर्वाचीनाः सन्ति, तथा चतुर्दश्याः पाक्षिकनामकृत्योपलक्षितत्वं बहुश्रुतमतेषु ग्रन्थेषु दृश्यते, ते च ग्रन्थाः पूर्वपूर्वतरैरर्वाचीनैश्च प्रमाणपुरुषैर्विरचिताः सन्ति, तथाहि—व्यवहारग्रन्थे निर्युक्तिचूर्णिवृत्तिकारैः पाक्षिकस्य चतुर्दशीव्याख्यानं कृतं, आवश्यकचूर्णिकारेण जिनदासश्रेष्ठिउदा-



For Private And Personal Use Only

यिनृपसागरचन्द्रसुदर्शनश्रेष्ठयादीनामष्टमीचतुर्दश्योरेव पौषधग्रहणं भणितं, निशीथचूर्णिकारेण देवाधिदेवप्रतिमाऽग्रतोऽष्टमीचतुर्दश्योः प्रभावत्या नाट्योपहारकरणं प्रोक्तं, षड्वर्षशतपूर्वकालभाविश्रीशीलाचार्यैर्द्वितीयांगवृत्तौ पूर्णिमापरिहारेणाष्टमीचतुर्दश्योः पौषधपर्वत्वमभिहितं, वादिदेवसूरिगुरुश्रीमुनिचन्द्रसूरिभिः पाक्षिकसप्तत्यां चतुर्दश्याः पाक्षिकत्वं, श्रीहेमसूरिभिर्योगशास्त्रवृत्तौ चतुर्दश्यां पाक्षिकप्रतिक्रमणं श्रीरत्नप्रभसूरिभिरुपदेशमालावृत्तौ श्रीजिनभद्र(प्रभ)सूरिभिः श्रीपर्युषणाकल्पवृत्तौ च चतुर्दश्याः पाक्षिकत्वमभिहितमस्तीति, तात्पर्यार्थश्चायं–कैश्चिदर्वाचीनाचार्यैः पूर्णिमापाक्षिकत्वं प्रतिपन्नं. परं तत् क्वापि सूत्रनिर्युक्तिभाष्यचूर्णिवृत्तिटिप्पनकादिभिः सह संवादि नो दृश्यते, युक्तिविचारणां च न क्षमते, तथाऽर्वाचीनानर्वाचीनैश्च बहुभिराचार्यैश्चतुर्दश्यां पाक्षिकं प्रोक्तमस्ति, तथा च कान्यप्यक्षराणि पूर्वापराविरोधयुक्तिविचारणां च न व्यभिचरन्ति, संवादश्च तस्य श्रीभद्रबाहुस्वाम्यादिकृतव्यवहारनिर्युक्तिचूर्णिवृत्तिषु सुव्यक्तं समीक्ष्यमाणोऽस्ति इत्यतो ज्ञायते पूर्वर्षीणां चतुर्दश्यां पाक्षिकं संमतमभवदिति । एवं सत्यपि कश्चिदाह–पाक्षिकं नागमाभिहितं, किन्त्वाचरणागतमित्यस्माभिर्नाद्रीयते, तदसमीचीनं, दृष्टहान्यदृष्टपरिकल्पनारूपदोषद्वयप्रसंगात् , तथाहि–चतुर्दश्यां पाक्षिकनाम्नस्तत्कृत्यानां चागमे साक्षादुपलभ्यमानानां निह्नवाद् दृष्टहानिः,पाक्षिकं चतुर्दश्यामाचरितमित्यभ्युपगमस्यादृष्टस्य परिकल्पनं दृश्यते, कथमिति चेदुच्यते, पूर्वं तावदुच्यतां केनाचार्येण कस्मिन् वा काले चतुर्दश्यां पाक्षिकमाचरितमिति ?, कालिकाचार्येणेति चेत् तन्न, पाक्षिकचूर्ण्यादावन्यत्र वा शास्त्रे कालिकाचार्यकथायां तथाऽनुपलभ्यमानत्वात् , पाश्चात्यपौर्णेतराचार्यादिकृतानां कालिकाचार्यकथानां पाक्षिकादिविषये किंचित् किंचित् विभिन्नार्थानामियत्तां कर्तुं न शक्यते, तासु च या अभिमतराकापाक्षिककविकृताः सन्ति तासां प्रामाण्यं कविप्रामाण्येन श्रीपर्युषणाचूर्ण्यादिमूलग्रंथसंवादेन वा ?, द्वितीयपक्षः पूर्वमेव प्रत्यु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चरितः, प्रथमपक्षे तु ये केचित् श्रीहरिभद्रसूर्युमास्वात्यादीनामपि पूर्वसर्वबहुश्रुतकृतवचसां प्रामाण्यं न प्रतिपद्यते त एव स्वकक्षीकृतपक्षस्थापनाय पाश्चात्यकवीनां तेभ्यः कमधिकं विशेषगुणं निर्धार्य प्रामाण्यं प्रतिपद्यन्त इति सम्यग् विचार्यं १, तथा शतपदीकारेणापि कालिकाचार्यैः चतुर्दश्यां पाक्षिकं नैवाचरितमिति निर्धारितमस्ति, अथान्येन वा केनचिदाचार्येण चतुर्दश्यां पाक्षिकमाचरितमिति चेत्तदपि न घटते, यतोऽमुष्मिन् कालेऽमुकेनाचार्येणेदमाचीर्णमिति क्वापि शास्त्रे संप्रदाये वा न श्रूयते, यथा विक्रमसंवत् ११५९ वर्षे श्रीमुनिचन्द्रसूरिप्रमुखश्रीसंघेऽभिनवमतप्रवर्तनाजिनाज्ञाभंगः प्रवचनाद्युपघातश्चेत्यागमयुक्तिभिर्बहुधा निवारयत्यपि श्रीदेवप्रभाचार्यैः १५ पाक्षिकं प्रवर्तितं, तथा १४ पाक्षिकस्य प्रवर्तयिता निवारयिता च कोऽपि न श्रूयते, इत्यतः प्रवर्तयितुरभावाद् व्यवहारसूत्रकृतांगादिप्रामाण्याच्च १४ पाक्षिकं न जिनगणधरेभ्योऽन्येन प्रवर्तितमित्यवगम्यते, किंच–संप्रदायप्रमाण्यात् १४ पाक्षिकप्रामाण्यं संप्रदायाप्रामाण्ये चाचारंगादीनीमानि तान्येव यानि गणधरादिकृतानीति निर्णयोऽपि न भवेत्, प्रमाणान्तराभावात्, तदनिर्णये च संप्रदायाप्रामाण्यवादिना वक्तुमपि न युक्तं, अथवाऽऽचरितपक्षाऽभ्युपगमेऽपि १४ पाक्षिकस्यागमप्रामाण्यादेवाचरणीयत्वं चतुर्थीपर्युषणावत्, यतः–"असढेण समाइन्नं जं कत्थइ केणई असावज्जं । न निवारियमन्नेहिं बहुमणुमयमेयमायरियं ॥१॥" भाष्ये, इत्याचरितलक्षणानि चत्वार्यपि १४ पाक्षिके न संति, यतः पाक्षिकप्रवर्तयितुर्नामानवगमात् शठत्वं प्रद्विष्टेनापि वक्तुं न शक्यते, शेषाचरणालक्षणत्रयोपपेतत्वादस्य प्रवर्तयिता अशठ एव परिकल्पयितव्यः स्यात्, शठाचीर्णे हि शेषाचरितलक्षणत्रयस्यानुपलभ्यमानत्वात्, चतुर्थीपर्युषणादिवदसावद्यत्वं वाच्यं, तथा पूर्णिममतोत्पत्तिर्लोकरूढ्या ११५९ शतपद्यां तु ११४९ वर्षे श्रूयते, तत्कालात्पूर्वं सकलाचार्यगच्छसंघैरेकमुखमेवाचरणीयतया प्रामाणीकृतत्वादन्यानिवारितत्वं बहुमतत्वं चाविकलमे-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वास्ति, जीतं नाम प्रभूतानेकगीतार्थकृता मर्यादा व्यव० वृत्तौ, जं जीयं सावज्जं न तेण जीएण होइ ववहारो । जं जीयमसावज्जं तेण उ जीएण ववहारो ॥१॥ व्यव० भा० इत्यतो माध्यस्थ्यमवलम्ब्यानभिनिविष्टैर्धर्मार्थिभिरागमयुक्तिभिराचरणापक्षाभ्युपगमेन च विचार्यमाणं १४ पाक्षिकमेव सुव्यवस्थितं स्यादिति पाक्षिकविचारः ॥२॥

'तम्मि पविट्ठा उस्सग्गेण कत्तियपुण्णिमं जाव अच्छंति' नि० चू० उ १०, तथा वासाखित्ते निव्विग्घेण चउरो मासा अच्छिउं कत्तियचउम्मासं पडिकमिउं मग्गसिरबहुलपडिवयाए निग्गंतव्वं, एसेव चउपाडिवउ" नि० चू० उ० १०, इत्याद्यालापकैः निशीथकल्पचूर्ण्याद्यागमेषु चतुर्म्मासकं पूर्णिमायां दृश्यते, यच्च चतुर्दश्यां विधीयते तत्र पूर्वप्रवृत्ताचरणा कारणं, तथाहि—चउमासगाणि पुव्वोइयंमि दिवसे जमन्नहेदाणिं । पायं छट्ठतवस्सासत्तिउ आयरणओ वेगे ॥१॥ पाक्षिकसप्तत्यां, सालाहणेण रन्ना संघाएसेण कारिओ भयवं । पज्जोसवण चउत्थी चाउम्मासं चउद्दसिए ॥१॥ चउमासपडिक्कमणं पक्खियदिवसंमि चउविहो संघो । नवसयतेणउएहिं आयरणं तं पमाणंति ॥२॥ तीर्थोद्गारादिषु भणितमिति संदेहविषौषध्यां, अस्याश्चाचरणायाः संवादकाक्षराणि चूर्णिष्वपि दृश्यन्ते, तथाहि—वसहीवाघाते वा, कत्तियपुण्णिमाए परतो वा साधकं न भवति, अन्नं वा रोहकादि किंचि, एस वाघातं जाणिऊण कत्तियचाउम्मासियं अपडिकमिउं यदा वयंति तदा अतिरित्ता अट्ठमासा भवंति" निशी० चू० उ० १० पत्र ३१६ "आरतो चेव कत्तियचाउमासियस्स निग्गच्छंति इमेहिं कारणेहिं—कत्तियपुण्णिमाए आयरियाणं नक्खत्तं असाहगं, अन्नो वा कोइ तद्दिवसं वाघातो भविस्सति" पर्युषणाकल्पचूर्णौ पत्र ३२, उक्कोसेणं मग्गसिरबहुलदसमीओ जाव तत्थ अच्छियव्वं, किं कारणं इच्चिरं कालं वसंति?, जदि चिरकाला वासं वा पडति तेण इच्चिरं, इहरधा कत्तियपुण्णिमाए चेव निग्गंतव्वं" कल्पसामान्यचूर्णौ विशेषचूर्णौ च उ० ३



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पत्र २९५, वासाखित्तालंभे उद्वाणाईसु पत्तमहिगा उ । साहगवाघाएण व अपडिक्कमिउं जइ वयंति ॥१॥ अस्या निर्युक्तिगाथाया व्याख्यानैकदेशोऽयं–अथवा आयरियाणं कत्तियपुण्णिमाए परतो वा साधगं नक्खत्तं न भवति, चंदबलाइ सुंदरं न भवतीत्यर्थः, अण्णं वा रोधगादि कंचि वाघातं जाणिऊण कत्तियचाउम्मासिकं अपडिक्कमिउं जदा वयंति तदा अतिरित्ता अट्ठ मासा भवंति'' पर्यु० वृत्तौ संदेहविषौषधीनाम्न्यां पत्र १८०, तथा जत्थ अहिगमासो पडति वरिसे तं अभिवड्ढितवरिसं भण्णति, जत्थ न पडति तं चंदवरिसं, सो य अहिमासगो जुगस्स अंते मज्झे वा भवइ, जदि अंते तो नियमा दो आसाढा भवंति, अह मज्झे तो दो पोसा'' निशी० चू० उ० १० पत्र ३१७ 'चंदो चंदो अभिवड्ढिओ अ चंदोऽभिवड्ढिओ चेव । पंचसहियं जुगमिणं दिट्ठं तेलुक्कदंसीहिं ॥१॥ पंचभिर्वर्षैः सहितं पञ्चवर्षात्मकमित्यर्थः, युगं सूर्यसंवत्सरपञ्चकात्मकं, सूर्यमासश्च सार्द्धत्रिंशदहोरात्रप्रमाणः, चन्द्रमास एकोनत्रिंशद्दिनानि द्वात्रिंशच्च द्वाषष्टिभागा दिनस्य, ततः सूर्यसंवत्सरसत्कत्रिंशन्मासातिक्रमे एकश्चन्द्रमासोऽधिको लभ्यते, स च यथा लभ्यते तथाह–चंदस्स जो विसेसो आइच्चस्स य हविज्ज मासस्स । तीसइगुणिओ संतो हवेइ अहिमासगो इक्को ॥१॥ इह विश्लेषे कृते यदवशिष्यते तदप्युपचाराद्विश्लेषः, स त्रिंशता गुण्यते, 'सट्ठीए अइआए हवइ हु अहिमासगो जुगद्धंमि । बावीसे पव्वसए हवइ य तेसुं जुगंतंमि ॥१॥ पक्षाणां षष्टावतीतायामेतस्मिन्नवसरे युगार्द्धे एकोऽधिकमासो भवति, द्वितीयस्तु द्वाविंशत्यधिके पर्वशते–पक्षशतेऽतिक्रान्ते युगान्ते द्वितीयः । बावट्ठिंबावट्ठी [भागात्मकं] दिवसे संजाइ ओमरत्तस्स । बावट्ठिएँ दिवसेहिं ओमरत्तं तओ भवति ॥२॥ एकैकस्मिन् परिपूर्णत्रिंशदहोरात्रमिति कर्ममाससंबंधिदिवसेऽवमरात्रस्य द्वाषष्टिभाग एकैकः संजायते, ततोऽर्वाग् षष्ट्या दिवसैरेकमहोरात्रं भवति, एवं सति य एकषष्टितमोऽहोरात्रस्तस्मिन्नेकषष्टितमा द्वाषष्टितमा च तिथिर्निधनमुपगतेति द्वाषष्टितमा च तिथि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





लोके पतितेति व्यवह्रियते, वर्षाकालस्य चतुर्मासप्रमाणस्य श्रावणादेः तृतीयपर्वणि एकषष्टितमा द्वाषष्टितमा च तिथिर्निधनमुपगतेति प्रथमोऽवमरात्रः, तस्यैव सप्तमे पर्वणि द्वितीयोऽवमरात्रः, तदनन्तरं शीतकालस्य तृतीये पर्वणि मूलापेक्षया एकादशे पर्वणि तृतीयः, ततः शीतकालस्य सप्तमे पर्वणि मूलापेक्षया पंचदशे पर्वणि चतुर्थः, पुनरुष्णकालस्य तृतीये पर्वणि मूलापेक्षया एकोनविंशतितमे षष्ठः, तथा चोक्तं—तइयंमि ओमरत्तं कायव्वं सत्तमंमि पव्वंमि। वासहिमगिम्हकाले चाउम्मासे विधीयंते ॥१॥ इह आषाढाद्या ऋतवो लोके प्रसिद्धिमैयरुस्ततो लौकिकव्यवहारमपेक्ष्याषाढादाराभ्य प्रतिदिवसमेकैकद्वाषष्टिभागहान्या वर्षाकालादिषु गतेषु तृतीयादिषु पर्वसु यथोक्ता अवमरात्राः प्रतिपाद्यन्ते,परमार्थतः पुनः श्रावणबहुलपक्षप्रतिपल्लक्षणयुगादित आरभ्य चतुश्चतुःपर्वातिक्रमे वेदितव्याः। रूवाहिगा उ ओया बिगुणा पव्वा हवंति कायव्वा। एमेव हवइ जुम्मे इक्कत्तीसा जुया पव्वा ॥१॥ तिथयो द्विविधाः—ओजोरूपा युग्मरूपाश्च, ओजो—विषमं युग्मं—समं, तत्र या ओजोरूपास्ताः प्रथमतो रूपाधिकाः क्रियंते, ततो द्विगुणाः, तथा च सति तस्यास्तस्यास्तिथेर्युग्मपर्वाणि समागतानि भवन्ति, 'एमेव हवइ जुम्मे' इति या अपि युग्मरूपास्तिथयस्तास्वपि एवमेव—पूर्वोक्तेनैव प्रकारेण प्रवर्तनीयं, नवरं द्विगुणीकरणानन्तरं एकत्रिंशद्युताः सत्यः ओजः पर्वाणि भवन्ति, इयमत्र भावना—यदाऽयं प्रश्नः—कस्मिन् पर्वणि प्रतिपद्यवमरात्रीभूतायां द्वितीया समापततीति?, तदा प्रतिपत् किलोद्दिष्टा, सा च प्रथमा तिथिरित्येको ध्रियते, स रूपाधिकः क्रियते, जाते द्वे रूपे, ते अपि द्विगुणीक्रियेते, जाताश्चत्वारः, आगतानि चत्वारि पर्वाणि, ततोऽयमर्थः—युगादितश्चतुर्थे पर्वणि प्रतिपद्यवमरात्रीभूतायां द्वितीया समाप्तिमुपयातीति, युक्तं चैतत्, तथाहि—प्रतिपद्युद्दिष्टायां चत्वारि पर्वाणि समागतानि, पर्व च पञ्चदशतिथ्यात्मकं, ततः पञ्चदश चतुर्भिर्गुण्यन्ते, जाता षष्टिः, प्रतिपदि द्वितीया समापततीति द्वे रूपे तत्रा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





धिके प्रक्षिप्ते, जाता द्वाषष्टिः, सा च द्वाषष्टया भज्यमाना निरंशं भागं प्रयच्छति, लब्ध एकक इत्यागतः प्रथमोऽवमरात्र इत्यविसंवादि करणं, यदा तु कस्मिन् पर्वणि द्वितीयायामवमरात्रीभूतायां तृतीया समाप्नोतीति प्रश्नस्तदा द्विको ध्रियते, स रूपाधिकः कृतो, जातानि त्रीणि रूपाणि, तानि द्विगुणीक्रियन्ते, जाताः षट्, द्वितीयायामवमरात्रीभूतायां द्वितीया तिथिः समेति षट् एकत्रिंशद्युताः क्रियन्ते, जाताः सप्तत्रिंशत्, किमुक्तं भवति ?—युगादितः सप्तत्रिंशत्तमे पर्वणि गते द्वितीयायामवमरात्रीभूतायां तृतीया समाप्नोति, इदमपि करणं समीचीनं, तथाहि—द्वितीयायामुद्दिष्टायां सप्तत्रिंशत् पर्वाणि समागतानि, ततः पञ्चदश सप्तत्रिंशता गुण्यन्ते, जातानि पञ्च शतानि पञ्चपञ्चाशदधिकानि ५५५, द्वितीया नष्टा तृतीया जातेति त्रीणि रूपाणि तत्र प्रक्षिप्यन्ते. जातानि पञ्च शतानि अष्टापञ्चादशधिकानि ५५८, एषोऽपि राशिर्द्वाषष्टया भज्यमानो निरंशं भागं प्रयच्छति, लब्धाश्च नवेत्यागतो नवमोऽवमरात्र इति, एवं सर्वास्वपि तिथिषु करणसमीचीनत्वं अवमरात्रसंख्या च स्वयं भावनीया, पर्वनिर्देशमात्रं तु क्रियते, तत्र तृतीयायां चतुर्थी समापतत्यष्टमे पर्वणि गते, चतुर्थ्यां पञ्चमी एकचत्वारिंशत्तमे पर्वणि, पञ्चम्यां षष्ठी द्वादशे पर्वणि, षष्ठ्यां सप्तमी पञ्चचत्वारिंशत्तमे, सप्तम्यामष्टमी षोडशे, अष्टम्यां नवमी एकोनपञ्चाशत्तमे पर्वणि, नवम्यां दशमी विंशतितमे, दशम्यां एकादशी त्रिपञ्चाशत्तमे, एकादश्यां द्वादशी चतुर्विंशतितमे, द्वादश्यां त्रयोदशी सप्तपञ्चाशत्तमे, त्रयोदश्यां चतुर्दशी अष्टाविंशतितमे, चतुर्दश्यां पञ्चदशी एकषष्टितमे, पञ्चदश्यां प्रतिपद् द्वात्रिंशत्तमे इति, एवमेव युगपूर्वार्द्धे, एवं युगोत्तरार्द्धेऽपि द्रष्टव्यं, सूर्यप्रज्ञप्त्यादौ, इहागमोक्तलौकिकव्यवहारापेक्षया परमार्थापेक्षया चावमरात्रभवनं दिङ्मात्रं लिखितमस्ति, एवं सति सूर्यप्रज्ञप्त्यादिदर्शितकालविभागाभिप्रायेणैव यदि चतुर्मासादिपर्वाणि क्रियन्ते तदा युगमध्ये पौषवृद्धौ फाल्गुनचतुर्मासस्य युगान्ते आषाढवृद्धावाषाढचतुर्मासस्य पञ्चमासत्वमेकान्तरितं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्यात्, अभिवर्द्धितपौषाषाढाधारभूतयोर्युगमध्यान्तयोः परावर्तेनैकान्तरमेव संभवात्, तथा यस्मिन् विवक्षिते वर्षे जैनगणिताभिप्रायेण युगांत इतिकृत्वाऽऽषाढो लौकिकटिप्पनाभिप्रायेणाश्वयुक्पूर्णिमायां जैनगणितेन कार्तिकचतुर्मासकं भवति, तथा आषाढबहुलपक्षे इत्याद्यागमोक्तलौकिकव्यवहारापेक्षयैकस्मिन् वर्षे आषाढादिषण्माससत्काः कृष्णा एव षट् पक्षाश्चतुर्दशदिनात्मका भवन्ति, परमार्थापेक्षया तु युगपूर्वार्द्धेऽश्वयुगादिकृष्णपक्षाः पञ्चदश युगोत्तरार्द्धे तु शुक्लपक्षाः पञ्चदशसंख्याश्चतुर्दशदिनात्मका भवन्ति इति चतुर्मासकविचारः ३॥

इत्थ उ पणगं पणगं कारणियं जा सवीसईमासो। सुद्धदसमीठियाण व आसाढी पुण्णिमोसरणं ॥१॥ आसाढपुण्णिमाए ठियाणं जदि डगलादीणि गहियाणि पज्जोसवणाकप्पो य कहितो तो सावणबहुलपञ्चमीए पज्जोसवंति, असति खित्ते सावणबहुलदसमीए, असति खित्ते सावणबहुलस्स पण्णरसीए, एवं पंच २ ओसारिंतेण जाव असति भद्दवयसुद्धपंचमीए, अतो परेणं न वट्टति अतिक्कमेउं, आसाढपुण्णिमाउ आढत्तं मग्गंताणं जाव भद्दवयजोण्हस्स पञ्चमीए एत्थंतरे जइ न लद्धं ताहे जति रुक्खाहे ठितो तोऽवि पज्जोसवेतव्वं, एतेसु पव्वेसु जहा लंभे पज्जोसवेयव्वं, अप्पव्वे न वट्टति, कारणिया चउत्थीवि अज्जकालएहिं पवत्तिया, कहं पुण?, उज्जेणीए नगरीए बलमित्तभाणुमित्तरायाणो, तेसिं भाइणिजो अज्जकालएण पव्वाविओ, तेहिं कालेहिं पदुट्ठेहिं अज्जकालओ निव्विसओ कओ, सो पतिट्ठाणं आगतो, सालवाहणो राया सावओ, तेण समणपूयणच्छणो पवत्तितो, अंतेउरं च भणियं—अमावासाए उववासं काउं अट्ठमीमाइसु उववासं काउं [इति] पाठांतरं पारणए साहूणं दाउं पारिज्जह, अन्नदा पज्जोसवणादिवसे से आसन्ने आगते अज्जकालएण सातवाहणो भणिओ—भद्दवयजुण्हस्स पंचमीए पज्जोसवणा, रन्ना भणितो—तद्दिवसे मम इंदमहो अणुजाणे-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तव्वो होहिति, तो न पज्जुवासिताणि चेतियाणि साहुणो य भविस्संतित्तिकाउं तो छट्ठीए पज्जोसवणा भवतु, आयरिएण भणितं–न वट्टति अतिक्कामेउं, रन्ना भणितं–तो चउत्थीए भवतु, आयरिएण भणियं–एवं होउत्ति चउत्थीए कता पज्जोसवणा, एवं चउत्थीवि जाया कारणिया" पर्यु० चू० पत्र ३२। न चैकस्मिन्नेव वर्षे तस्मिन् कारणिकी चतुर्थी प्रवर्तिताऽभूत्, किन्तु निशीथचूर्णिकारस्य तदनुभाविसर्वबहुश्रुतानां चापरव्युदासेन सैव चतुर्थी आचरणीयत्वेन संमता, तथा च "आसाढपुण्णिमाए पविट्ठा पडिवयाओ आरब्भ पंचदिणा संथारगतणडगलछालमादियं गिण्हंति, तम्मि चेव पणगे राईए पज्जोसवणाकप्पं कहिंति, ताहे सावणबहुलपंचमीए पज्जोसवंति, खित्ताभावे कारणेण पणगे संवुड्ढे दसमीए पज्जोसवंति, एवं पन्नरसीए, एवं पणगवुड्ढी ताव कज्जति जाव सवीसतिमासो पुन्नो, सो य सवीसतिमासो भद्दवयसुद्धपंचमीए पुज्जइ, अह आसाढसुद्धदसमीए वासाखित्तं पविट्ठा अहवा जत्थ आसाढमासकप्पो कतो तं वासपाउग्गं खित्तं अन्नं च नत्थि वासपाउग्गं ताहे तत्थेव पज्जोसविंति, वासं च गाढं अणुवरयं आढत्तं ताहे तत्थेव पज्जोसविंति, एक्कारसीउ आढवेउं डगलादियं गिण्हंति पज्जोसवणाकप्पं च कहिंति, ताहे आसाढपुण्णिमाए पज्जोसविंति, एस उस्सग्गो, सेसकालं पज्जोसविंताणं सव्वो अववादो, अववादेऽवि सति सवीसइरातिमासाउ अइक्कमेउं न वट्टति, सवीसतिराए मासे पुन्ने जदि वासखित्तं न लब्भति तो रुक्खहिट्ठेवि पज्जोसवेयव्वं, तं च पुण्णिमाए पंचमीए दसमीए एवमादिएसु पव्वेसु पज्जोसवेयव्वं, नो अपव्वेसु, सीसो पुच्छति–इदाणिं कहं चउत्थीए अपव्वे पज्जोसविज्जति ?, आयरिओ भणति–कारणिया चउत्थी अज्जकालगायरिएण पवत्तिया, कहं ?, भण्णते कारणं, कालगायरिओ विहरंतो उज्जेणिं गतो, तत्थ वासावासं ठितो, इत्यादि, निग्गता विहरंता पतिट्ठाणनगरं तेण पट्ठिता, पतिट्ठाणसमणसंघस्स य अज्जकालगेहिं संदिट्ठं–जावऽहं आगच्छामि ताव तुब्भेहिं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नो पज्जोसवियव्वं, तत्थ य सालवाहणो राया, सो य सावतो, सो य कालगज्जं एंतं सोऊण निग्गतो अभिमुहो, समणसंघो य, महाविभूईए पविट्ठो कालकज्जो, पविट्ठेहि य भणियं-भद्दवयसुद्धपंचमीए पज्जोसविज्जति, समणसंघेण य पडिवन्नं, ताहे रन्ना भणियं-तद्दिवसं मम लोगाणुवत्तीए इंदमहो अणुजाणेयव्वो होहिइ, तो न पज्जुवासिआणि चेइआइं साहुणो अ भविस्संतित्तिकाउं तो छट्ठीए पज्जोसवणा भवउ, आयरिएण भणियं-न वट्टइ अइक्कामेउं, रन्ना भणिअं-तो चउत्थीए पज्जोसविज्जउ, आयरिएण भणियं-एवं भवउ, ताहे चउत्थीए पज्जोसवियं, एवं जुगप्पहाणेहिं चउत्थी कारणे पवत्तिता, सच्चेव अणुमया सव्वसाहूणं'' नि० चू० उ० १० पत्र ३१७, अत्र इदाणिं कहं चउत्थीए इत्यादिना चतुर्थ्याः परंपरयाऽऽचीर्णत्वं भद्दवयसुद्धपंचमीए पज्जोसविज्जति इत्यनेन भाद्रपदसंबंधित्वं च निवेदितं, सच्चेव अणुमया इत्यवधारणेन शेषपर्युषणाप्रकाराणां व्यवच्छेदश्च प्रकट इति ॥ उक्तं च-'तेणउयनवसएहिं समइक्कंतेहिं वद्धमाणाओ। पज्जोसवण चउत्थी कालगसूरी तो ठविया ॥१॥ वीसहिं दिणेहिं कप्पो पंचगहाणीइ कप्पठवणा य। नवसयतेणउएहिं वुच्छिन्ना संघआणाए ॥२॥त्ति संदेहविषौषध्यां, तथा मूलसूत्रेऽपि च श्रीवीरनिर्वाणात् त्रिनवत्यधिकनवशतवर्षानन्तरं पर्युषणाकल्पस्य चतुर्थ्यां वृत्तिरुक्ता, तथाहि-समणस्स भगवओ महावीरस्स जाव सव्वदुक्खप्पहीणस्स नव वाससयाइं विइक्कंताइं दसमस्स य वाससयस्स अयं असीइमे संवच्छरे काले गच्छति, वायणंतरे पुण अयं तेणउए संवच्छरे काले गच्छति इइ दीसइ पर्यु० सूत्रे, अत्र चेयं वृत्तिः ''नव वाससयाइं-श्रीवीरनिर्वृत्तेर्नवसु वर्षशतेष्वशीत्यधिकेषु व्यतीतेष्वियं वाचना जातेत्यर्थे व्याख्यायमाने न तथा विचारचातुरीचंचूनां चेतसि प्रीतिरस्य सूत्रस्य, श्रीवर्द्धमाननिर्वाणानन्तरं सप्तत्यधिकवर्षशतोत्पन्नेन श्रीभद्रबाहुस्वामिना प्रणीतत्वात्, तस्मादियति काले गते इयं वाचना पुस्तकेषु न्यस्तेति संभाव्यते, श्रीदेवर्द्धिगणक्षमाश्रमणैर्हि श्रीवीरनि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





र्णानावसु वर्षशतेष्वशीत्यधिकेषु व्यतीतेषु ग्रंथान् व्यवच्छिद्यमानान् दृष्ट्वा सर्वग्रन्थानामादिमे नन्द्यध्ययने स्थविरावलिलक्षणं नमस्कारं विधाय ग्रन्थाः पुस्तकेषु लिखिता इत्यत एवात्र ग्रंथे वक्ष्यमाणे स्थविरावलीप्रान्ते देवर्द्धिगणिक्षमाश्रमणस्य नमस्कारं वक्ष्यति, पूर्वं गुरुशिष्याणां श्रुताध्ययनाध्यापनव्यवहारः पुस्तकनिरपेक्ष एवासीत्, केचित्त्विदमाहुः—यदियत्कालातिक्रमे ध्रुवसेननृपस्य पुत्रमरणार्तस्य समाधिमाधातुमानन्दपुरे सभासमक्षमयं ग्रंथो वाचयितुमारब्ध इति, बहुश्रुता वा यथावद्विदन्ति, त्रिनवतियुतवर्षनवशतपक्षे त्वियता कालेन पञ्चम्याः चतुर्थ्यां पर्युषणाकल्पः प्रवृत्ते"संदेहविषौषध्यां, तथा युगे तृतीये पञ्चमे च वर्षे संभवी योऽधिकमासः स्यात् नासौ लोके लोकोत्तरे च चतुर्माससांवत्सरिकादिप्रमाणचिन्तायां क्वाप्युपयुज्यते, लोके दीपोत्सव्यक्षयतृतीयाभूमिदोहादिषु शुद्धद्वादशमासान्तर्भाविषु लोकोत्तरे च चतुर्मासकेषु 'आसाढे मासे दुपया' इत्यादिपौरुषीप्रमाणचिन्तायां षण्मासप्रमाणायां वर्षान्तर्भाविजिनजन्मादिकल्याणकेषु वृद्धावासस्थितस्थविरनवविभागक्षेत्रकल्पनायां च नायं गण्यते, कालचूलात्वादस्य, तथा निशीथे दशकालिकवृत्तौ च चूलाचातुर्विध्यं द्रव्यादिभेदात्, तत्र द्रव्यचूला ताम्रचूडादिः, क्षेत्रचूला मेरोश्चत्वारिंशद्योजनप्रमाणचूलिका, कालचूला युगे तृतीयपंचमयोर्वर्षयोरधिकमासकः, भावचूला तु दशवैकालिकस्य चूलाद्वयं, न च चूला चूलावतः प्रमाणचिन्तायां पृथग् व्याप्रियते, यथा लक्षणयोजनप्रमाणस्य मेरोः प्रमाणचिन्तायां चूलिकाप्रमाणमिति, यश्चाधिकमासको जैनशास्त्रे पौषाषाढरूपः लोकशास्त्रे तु चैत्राद्यश्वयुगंतसप्तमासान्यतरमासरूपोऽभिवर्द्धते नासौ कचित्कृत्ये प्रयुज्यते, यदुक्तं रत्नकोशाख्यज्योतिःशास्त्रे—"यात्राविवाहमंडनमन्यान्यपि शोभनानि कर्माणि। परिहर्तव्यानि बुधैः सर्वाणि नपुंसके मासि ॥१॥ जदि अहिमासओ पडितो तो सवीसतिरायं गिहिनायं कज्जति, किं कारणं ?, अत्थि अहिमासओ चेव मासो गणिज्जति, सो वीसाए समं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सवीसातराता मासो भण्णति चेव" कल्प० चू० पत्र २९५ उ० ३। जम्हा अभिवड्ढियवरिसे गिम्हे चेव सो मासो अइक्कंतो तम्हा वीसदिणा अणभिग्गहियं कीरइ" नि० चू० उ० १० पत्र ३१७। इह कल्पनिशीथचूर्णिकृद्भ्यामपि स्वाभिगृहीतगृहस्थज्ञातावस्थान-व्यतिरिक्तेषु कार्येषु केष्वप्यधिकमासको नामग्राहं प्रमाणीकृतो न दृश्यते इति उक्तप्रकारेण भाद्रपदशुद्धचतुर्थ्यामेव संप्रतिकाले पर्युषणा भवतीति। अथ प्रसङ्गागतत्वात् शेषपर्युषणास्वरूपव्यक्तीकरणाय किञ्चिल्लिख्यते, तथाहि—इत्थ उ अणभिग्गहियं वीसइरायं सवीसईमासं। तेण परमभिग्गहियं गिहिनायं कत्तिओ जाव ॥१॥ असिवाइकारणेहिं अहवा वासं न सुट्ठु आरद्धं। अभिवड्ढियंमि वीसा इयरंमि सवीसईमासो ॥२॥ निशी० भा० उ० १० इति गाथाद्वयलोकनात् श्रावणेऽपि सांवत्सरिकपर्व न संभावनीयं, अन्याधिकारप्रतिबद्धत्वात् तस्य, यतस्तद्वर्षाकालावस्थानलक्षणां पर्युषणां प्रतीत्यावस्थानलक्षणाभिग्रहग्रहणे गृहस्थज्ञातीकरणे च प्रतिबद्धं, न पुनः सांवत्सरिकपर्वक्रियायां सर्वचैत्य १ सर्वसाधुवंदन २ आलोचनादान ३ अष्टमतपःकरण ४ सांवत्सरिकप्रतिक्रमण ५ लक्षणानुष्ठानपंचकरूपायां, यतश्चूर्णौ पर्वानुष्ठानमध्ये एकमप्यनुष्ठानं तत्र न श्रूयते, तथा चैतद्गाथाद्वयचूर्णिः—'इत्थ उ' गाहा, इत्थत्ति आसाढपुण्णिमाए सावणबहुलपंचमीए वा पज्जोसविएवि अप्पणा अणभिग्गहियं, अहवा जदि गिहत्था पुच्छंति—अज्जो! तुब्भे इत्थ वरिसाकालं ठिया अह न ठिया?, एवं पुच्छिएहिं अणभिग्गहितंति संदिग्धं वक्तव्यं, इहान्यत्र वाऽद्यापि निश्चयो न भवतीत्यर्थः, एवं संदिग्धं कियत्कालं वक्तव्यं?, उच्यते, वीसतिरातं मासं जाव अणभिग्गहियं भवति, तेणंति तत्कालात्परतः अप्पणो आभिमुख्येन गृहीतमभिगृहीतं, इह व्यवस्थिता इति गिहीणं पुच्छंताणं कहिंति—इह ठिया मो वरिसाकालंति, किं पुण कारणं वीसतिराते सवीसतिराते वा मासे गते अप्पणो अभिग्गहियं गिहिनायं वा करिंति? आरतो न करिंति?, उच्यते—'असिवादि'गाधा, कदाचि



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





असिवं भवे, आदिग्रहणतो रायदुट्ठादी, वासं वा न सुट्ठ आरद्धं वासिउं, एवमाएहिं कारणेहिं यदि अच्छंति तो आणादिया दोसा, अह न अच्छंति तो गिहत्था भणंति–एते सव्वण्णुपुत्तगा न किंचि जाणंति, मुसावायं च भासंति, ठिया मोत्ति भणित्ता जेण निग्गता, लोगो वा भणिज्ज–साधू इत्थ वरिसारत्तं ठिता अवस्सं वासं भविस्सति, ततो धन्नं विक्किणाति, लोगो घरादीणि छादेति, हलादि-कम्माणि वा संपवित्तंति, अभिग्गहिते गिहिनाए य आरओ कए जम्हा एवमाइया अहिगरणदोसा तम्हा अभिवड्डियवरिसे वीसति-राते गए गिहिनातं करिंति, तिसु चंदवरिसेसु सवीसतिराते मासे गते गिहिनातं करेंति'' निशी० चू० उ० १० पत्र ३१७, किंच पर्युषणाशब्दः सामान्यतो द्व्यर्थो दृश्यते, क्वापि २ वर्षाकालावस्थानार्थः, क्वापि २ च प्रतिक्रमणादिविषयपर्युषणापर्वार्थः, तथाहि–आपाढपूर्णिमापर्युषणामादौ कृत्वा पंचकपरिहाण्या भाद्रपदामावास्यामवधीकृत्य चन्द्रसंवत्सरत्रयेऽनभिगृहीतगृहस्थाज्ञानाव-स्थानरूपं पर्युषणादशकं भवति, अभिवर्द्धितद्वये तु श्रावणामावास्यामवधीकृत्य तादृशं पर्युषणाचतुष्कं स्यात्. तथा चन्द्रसंवत्सरत्रये भाद्रपदशुद्धपंचम्यां अभिवर्द्धितयोस्तु श्रावणशुद्धपंचम्यां, अनेन इह अव्ययस्था (अम्हे ता इत्थ ठिया) इत्यभिगृहीतं गृहस्थज्ञातं चाव-स्थानं क्रियते, एषु पर्युषणाप्रकारेषु कल्पदशानिशीथचूर्णिषु सविस्तरमुपदर्शितेषु अभिगृहीतानभिगृहीतगृहिज्ञाताज्ञातवर्षाकालावस्थाने पर्युषणाकल्पकथनपूर्वकवर्षाकल्पसामाचारीव्यवस्थापनविशेषिते पर्युषणाशब्दो दृश्यते, नतु प्रतिक्रमणादिविषयपर्युषणापर्वार्थः, तथा 'गच्छो उ दुन्नि मासे पक्खे पक्खे इमं परिहवेइ। भत्तट्ठं सज्झायं वंदणलावं तउ परेणं ॥१॥ एवं अणुवसमंतं गच्छो दुन्नि मासे सारवेति, इमं पुण गच्छो पक्खे पक्खे परिहवेति, अणुवसमंतस्स पक्खे गते गच्छो तेण समं भत्तट्ठं न करेति, बितियपक्खे गते सज्झायं तेण समं न करेंति, ततियपक्खे गते तस्स वंदणं न करेंति, चउत्थपक्खे गते आलावंपि तेण समं वज्जिंति ॥ आयरि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





यओ चउमासे भुंजइ चउगे य देति सज्झायं। वंदणलावं चउगे, तेण परं मूल निच्छुभणं ॥१॥ आयरिओ पुण अणुवसमंतस्सवि चउगे मासे भत्तपाणदाणग्गहणसंभोगेण संभुंजति, चउण्हं च उवरि भत्तट्ठं न करेति, चउगे सज्झायं देति, तओ सज्झायं वज्जेति, वंदणालावपदं दोवि चउगे मासे करेंति, ततो वरिसे पुण्णे संवच्छरिए पडिक्कंते मूलं दाक्खित्तं गणाओ य निच्छुब्भति—एवं बारसमासे दोसु तवो सेसए भवे छेदो। परिहायमाणतद्दिवसं तवो मूल पडिक्कंते ॥२॥ एवं बारस मासा अणुवसमंते दोसु तवो आदिमेसु जाव गच्छेण न वज्जिओ, सेसेसु दससु मासेसु छेदो पंचरातिंदियाइओ जाव संवच्छरे पत्तो, पज्जोसवणरातिपडिक्कंताण अहिगरणे उप्पन्ने एसो विधी, दिवसमासे परिहवित्ता तद्दिवसे इति—पज्जोसवणदिवसे अधिकरणे उप्पन्ने तवो मूलं च भवति, न छेदो, पडिक्कमणकाले वा उप्पन्ने मूलमेव केवलं पडिक्कंते भवति, एसेवत्थो भण्णति—एवं इक्किक्कदिणं ठवित्तु ठवणादिणेवि एमेव। चेइयवंदण सारिय तम्मि व काले तिमासगुरू ॥ ५ ॥ भद्दवयसुद्धपंचमीए अणुदिते आइच्चे अहिगरणे उप्पन्ने संवच्छरो भवति, छट्ठीए एगदिणूणो संवच्छरो भवति, एवं इक्किक्कदिणं परिहरंतेण आणेयव्वं जाव ठवणादिणत्ति पज्जोसवणादिवस इत्यर्थः, तंमि ठवणादिणे अणुदिए आदिच्चे अहिगरणे उप्पन्ने एमेव चोयणा सज्झायपट्ठवणकाले चोइज्जइ, पुणो चेइयवंदणकाले चोइज्जइ, अणुवसमंतो पुणो पडिक्कमणवेलाए, एवं तंमि पज्जोसवणकालदिवसे तिमासगुरू भवति। निशी० चू० उ १० पत्र २८२ 'एवं जुगप्पहाणेहिं चउत्थी कारणेण पवत्तिया, सच्चेव अणुमया सव्वसाहूणं' नि० चू० उ०१० इह प्रतिक्रमणादिसांवत्सरिककृत्याधारभूता भाद्रपदशुद्धपंचमीवाचकतया पर्युषणाशब्दोऽस्ति, एवं पर्युषणाया द्व्यर्थत्वे दृश्यमानेऽपि कश्चिदाह—यथा चन्द्रसंवत्सरे स्वाभिगृहीतगृहस्थज्ञातावस्थानकरणावसरे भाद्रपदशुद्धपञ्चम्यां प्रतिक्रमणतपश्चरणादिसांवत्सरिककृत्योपलक्षितं पर्युषणापर्व क्रियते तथाऽभिव-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





द्धितसंवत्सरे श्रावणशुद्धपञ्चम्यां तदवसरे कस्मान्न क्रियते?, उच्यते, श्रावणशुद्धपञ्चम्यां विहितं चरितं वा प्रतिक्रमणादिकृत्योपलक्षितं पर्युपणापर्व क्वाप्यागमे न दृश्यते, भाद्रपदशुद्धपञ्चम्यां तु दृश्यते, तथाहि–पज्जोसवणाराऽतिपडिक्कंताणं अहिगरणे उप्पन्ने एसो विही इत्यादि, भद्दवयसुद्धपंचमीए अणुदिते इत्यादि, पूर्वलिखितमेव इति चरितानुवादः, तथा अन्नदा पज्जोसवणादिवसे आसन्ने आगए अज्जकालेण सातवाहणो भणिओ–भद्दवयजुण्हस्स पंचमीए पज्जोसवणा, रन्ना भणितो' पर्यु०चू०, वासावासं प०न्नो कप्पति निग्गंथाण वा २ परं पज्जोसवणाओ गोलोमप्पमाणमित्तावि केसा तं रयणिं उवाइणावित्तए, पर्यु० सूत्रं, अत्र वृत्तिः–पर्युषणातः परं–आषाढचतुर्मासकानंतरं गोलोममात्रा अपि केशा न स्थापनीयाः, आसतां दीर्घाः 'धुवलोओ अ जिणाणं निच्चं थेराण वासवासासु' इतिवचनात, यावत्तां रजनीं–भाद्रपदसितपंचमीरात्रिं नातिक्राम्येत्, पञ्चम्या रात्रेरर्वागेव लोचं कारयेत्, अयमभिप्रायो–यदि समर्थस्तदा वर्षासु नित्यं लोचं कारयेत्, तदसमर्थोऽपि तां रात्रिं नोल्लंघयेत्, पर्युपणापर्वण्यवश्यं, लोचं विना प्रतिक्रमणस्याकल्प्यत्वात्, उवायणावित्तएत्ति-अतिक्रमयितुं,संदेहविषौषध्यां। नो से कप्पति तं रयणिंति-भाद्रपदशुक्लपञ्चमीमतिक्रमितुं पर्यु०टिप्प० पत्र ४२ इति, विहितानुवादः, कश्चित् पुनराह–श्रावणशुद्धपञ्चम्यां यद्यपि प्रतिक्रमणादिसांवत्सरिककृत्यं साक्षात् क्वाप्यागमे कथितं न दृश्यते तथापि आत्माभिगृहीतगृहस्थज्ञातावस्थानरूपविशिष्टकृत्यदर्शनात् तत्र प्रतिक्रमणादिकृत्यमपि संभाव्यमानमस्तीति, नैवं, एवं हि संभावने आसाढपुण्णिमाए पज्जोसविंति एस उस्सग्गो, सेसकालं पज्जोसविंताणं सव्वो अववादो' नि० चू० उ १० इतिवचनविशेषितत्वादाषाढपूर्णिमायामेव करणीयं स्यात्, यद्वा वर्षाप्रायोग्यसंस्तारकतृणादिग्रहणपर्युषणाकल्पकथनपूर्वकवर्षाकल्पसामाचारीस्थापनरूपविशिष्टतरपर्युषणाकल्पकृत्यदर्शनात् पंचकपरिहाण्याऽऽषाढपूर्णिमादिदशपर्युषणास्वपि प्रतिक्रमणादिकृत्यं विशेषतः करणीयं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तस्याः, ननु एवमपि क्रियतां को दोष इति चेदुच्यते, एवं पर्युषणापर्वणोऽनैयत्यं स्यात्, तथा च सति शाश्वतिकसांवत्सरिकपर्वाष्टाहिका देवादयः कुत्र कुर्युः ?,'तत्थ णं बहवे भवणवइ ४ तिहिं चउमासिएहिं पज्जोसवणाए य अट्ठाहियाओ महामहिमाओ करिंति'त्ति जीवाभिगमे, कथं च–'गच्छो उ दुन्नि मासे' इत्यादि निशीथगाथाचूर्णौ 'तं रयणिं उवाइणावित्तए' इति पर्यु० सूत्रवृत्तौ च प्रतिक्रमणालोचनादिविषयरूढभाद्रपदशुद्धपंचमीरूपपर्युषणागोचराक्षराणि सत्यानि स्युरिति, 'पज्जोसवणाकप्पो दिवसओ कड्ढिउं न चेव कप्पइ, जत्थवि खित्तं पडुच्च कड्ढिज्जति जहा दिवसओ आणंदपुरे मूलचेइयहरे सव्वजणसमक्खं कड्ढिज्जति तत्थवि साहू नो कड्ढति, पासत्थो कड्ढति, तं साहू सुणिज्जा, न दोसो, पासत्थाण कड्ढगस्स असति दंडएण वा अब्भत्थिओ सड्ढेहिं वा ताहे दिवसओ कड्ढति, पज्जोसवणकप्पे य सामायारी अप्पणो उवस्सए पादोसिए आवासए कए कालं घेत्तुं काले सुद्धे असुद्धे वा पट्ठवित्ता कड्ढिज्जति, एवं चउसु राईसु, पज्जोसवणाराईए पुण कड्ढिए सव्वे साहवो समप्पावणियं काउस्सग्गं करिंति, पज्जोसवणाकप्पस्स समप्पावणियं करेमि काउस्सग्गं, जं खंडियं विराहियं जन्न पडिपूरियं सव्वो दंडो कड्ढियव्वो जाव वोसरामित्ति, लोगस्स उज्जोयगरं चिंतिऊण उस्सारित्ता पुणो लोगस्सुज्जोयगरं कड्ढित्ता सव्वे साहवो निसीयंति, जेण कड्ढितो सो ताहे कालस्स पडिक्कमइ, ताहे वरिसाकालठवणा ठविज्जइ एसो विधी भणियो, संजइओ य अप्पणो पडिस्सए चेव राओ कड्ढिंति, जदि पुण संजतीण संभोइयाण कड्ढंतिया न होज्ज तो अहापर्यायाणं कुलाणं आसन्ने सपडिदुवारे संलोए साधु साधुणीण य अंतरे चिलिमिणिं दाऊण कड्ढिज्जइत्ति निशीथचूर्णि १० उद्देशकवचनात् पर्युषणारात्रेर्नियतता, चतुर्थीपर्युषणा तु अशठाचरितत्वेन प्रमाणा, श्रीकालकाचार्याणामशठत्वं तु चूर्णिकारादिभिर्युगप्रधानत्वादिगुणविशेषितत्वात्, पंचविधाचाराचरणशीलत्वमविचलमेवेत्यतोऽभिनिवेशं मुक्त्वा सम्यग्विचार्यं,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





'गच्छो उ दोन्नि मासे' इत्यादिगाथाविषय 'भद्दवयसुद्धपंचमीए अणुइए आइच्चे' इत्यादिनिशीथचूर्ण्यादिसूत्राद् भाद्रपदस्य शुद्धपञ्चम्यां 'जुगप्पहाणेहिं चउत्थी कारणेणं पवत्तिया, सच्चेव अणुमया सव्वसाहूणं'ति निशी० चू० 'तेणउए संवच्छरे काले गच्छइ' पर्यु० सूत्रादिवचनात् श्रीवीरनिर्वाणात् त्रिनवत्यधिकनवशतवर्षानन्तरं भाद्रपदसितचतुर्थ्यां पर्युषणापर्व, तत्र सांवत्सरिकादिप्रमाणचिन्तायामधिकमासः कालचूलत्वान्नाधिक्रियते इति तात्पर्यार्थसारः पर्युषणाविचारः सपादशतश्लोकानुमितप्रबंधेन श्रीमुनिचन्द्रसूरिभिः श्रीदेवसूरीणां गुरुभिरनेकान्तजयपताकाललितविस्तराटिप्पनकादिबहुग्रंथसूत्रणसूत्रधारैः स्याद्वादरत्नाकरादिगन्थेषु सुविहितसैद्धान्तिकादितत्तदुदारविशेषणविशेषितैरनिश्रितवसतिवासिभिर्नवकल्पविहारिभिश्च सविस्तरमुपनिबद्धस्तदनुसारेणात्रापि चायं विचारलेशो लिखित इति **पर्युषणाविचारः ४ ॥**

सामायिकं द्विसंध्यमेव विधेयमिति सावधारणं यत्केनाप्युच्यते तदयुक्तं, द्विवाराधिकस्यापि सामायिककरणस्य दिने दिने दृश्यमानत्वात्, तथाहि–तत्थ सामाइयं नाम सावज्जजोगपरिवज्जणं निरवज्जजोगपरिसेवणं च, तं सावएण कहं कायव्वं ?. सो दुविहो–इड्ढिपत्तो अड्ढिपत्तो य. जो सो अणड्ढिपत्तो सो चेइयघरे वा साधुसमीवे वा घरे वा पोसहसालाए वा जत्थ वा वीसमति अच्छति वा निव्वावारो सव्वत्थ करेइ, तत्थ(चउसु)ठाणेसु नियमा कायव्वं, तंजहा–चेतियघरे साधुमूले घरे वा पोसहशालाए वा आवस्सगं करिंतोत्ति" आव० चू० पत्र ५०१ वृत्तौ च श्रावकप्रज्ञप्तिवृत्तौ च हारिभद्रीयायां. स चैत्यगृहे साधुसमीपे पौषधशालायां वा यत्र वा विश्राम्यति निर्व्यापारो वाऽऽस्ते तत्र सर्वत्र तत्करोति, चतुर्षु स्थानेषु पुनर्नियमात् करोति, तद्यथा–चैत्यगृहे साधुसमीपे पौषधशालायां स्वगृहे वाऽवश्यकं कुर्वाणः, पंचा० १ वृत्तौ पत्र २०. इह विश्रमणनिर्व्यापारत्वयोः न गृहस्थानामेकशो द्विस्त्रिश्चतुर्वा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संभवनियमोऽस्ति अतो यावत्कृत्वो विश्रमणनिर्व्यापारत्वसंभवः तावत्कृत्वः सर्वत्र सामायिकं करोति, चैत्यगृहादिस्थानचतुष्टये पुनरुभयकालावश्यकरणीयावश्यकविधानसमये तन्नियमात् करोति, तथाऽवद्यं–गर्हितं पापं सहावद्येन सावद्यः योगो–व्यापारः कायिकादिस्तस्य परिवर्जनं–परित्यागः, कालावधिनेति गम्यते, तत्र मा भूत्सावद्ययोगपरिवर्जनमात्रमपापव्यापारासेवनशून्यं सामायिकमित्यत आह–निरवद्ययोगप्रतिसेवनं चेति, अथ सावद्ययोगपरिवर्जनवन्निरवद्ययोगप्रतिसेवनेऽप्यहर्निशं यत्नः कार्य इतिदर्शनार्थं, चशब्दः परिवर्जनप्रतिसेवनक्रियाद्वयस्य तुल्यकक्षतोद्भावनार्थः" आवश्यकवृत्तौ पत्र ३२०, 'सावद्ययोगपरिवर्जनवन्निरवद्ययोगप्रतिसेवनेऽप्यहर्निशं यत्नः कार्यः इति दर्शनार्थं' श्रावक० वृत्तौ पत्र ८६ 'इत्वराणी'ति तत्र प्रतिदिवसानुष्ठेये सामायिकदेशावकाशिके, पुनः पुनरुच्चार्यते इति भावना, पौषधोपवासोऽतिथिसंविभागस्तु प्रतिनियतदिवसानुष्ठेयौ, न प्रतिदिवमाचरणीयाविति" आव० वृ० पत्र ३२३ श्रा० वृत्तौ च पत्र १००, अत्र प्रतिदिनं द्विरुच्चार्य इति विशेषणं सामायिकस्य नास्ति, तथा यदा एवं मत्तो तदा देससामाइयंपि ताव बहुसो कुज्जा, यस्मादाह–'सामाइयंमि उ कए समणो इव०" जीवो पमायबहुलो बहुसोऽविय बहुविहेसु अत्थेसु। एएण कारणेणं बहुसो सामाइयं कुज्जा ॥३॥ बहुसो–अणेगसो बहुविहेसु अत्थेसु रागदोसादीहिं अण्णमण्णं भाविज्जति तेण पमत्तो सामाइयं करिंतो अपमत्तो भवत्ति'ति आव० चू० पो० २३७, इह गृहस्थानामहारात्रे न प्रमादस्य द्विसंध्यत्वनियमोऽस्ति अतोऽप्रमत्तत्वाय विश्रमणनिर्व्यापारत्वादिसामग्र्यामहोरात्रेऽपि बहुशः सामायिकमुक्तं द्रष्टव्यं, यथा जन्मनि बहुशः प्रमादसंभवस्तथाऽहोरात्रेऽपीति सम्यग् विचार्यतां, तथा यच्चोक्तं 'अनवस्थितस्य सामायिकस्य निषेधात् तद् द्विसन्ध्यमेव विधेयं', तदत्यन्तबुद्धिविपर्यासमूचकं, अल्पकालीनस्य यथाकथंचिद्वा कृतस्यैव सामायिकस्यानवस्थितस्यानवस्थितत्वभणनात्, तथाहि–सामायिकस्यान-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वस्थितस्य करणं, अनवस्थितस्याल्पकालं करणानन्तरमेव त्यजति यथाकथंचिद्व्यवस्थितं करोतीति, उक्तं च—"काऊण तक्खणं चिय पारेइ करेइ वा जहिच्छाए। अणवट्ठिय सामइयं अणायराओ न तं सुद्धं ॥१॥" आव० चू०, अनवस्थितस्याल्पकालीनस्यानियतस्य वा सामायिकस्य करणमनवस्थितकरणम्, अल्पकालकरणानन्तरमेव त्यजति यथाकथंचिद्वा तत्करोतीतिभावः, इह चाद्यत्रयस्यानाभोगादिनाऽतिचारत्वमितरद्वयस्य तु प्रमादबहुलतये"ति उपा० वृ० अध्य० १, 'काऊण' गाहा व्याख्या, कृत्वा तत्क्षणमेव—करणानन्तरमेव पारयति, करोति वा यदृच्छया—यथाकथंचिदेवमनवस्थितं सामायिकमनादराद्—अबहुमानान्नैव तत् शुद्धं—न निरवद्यमिति० श्राव० वृत्तौ०, तथा अनवस्थितस्य—अस्थिररूपस्य सामायिकस्य तथा नैतेनैव प्रकारेण प्रबलप्रमादादिलक्षणेन करणमेव करणकं—आसेवनं, यः सामायिकं करणानन्तरमेव त्यजति यथाकथंचिद्वा करोति" प्रथमपंचा० वृ०, एषु ग्रन्थेष्वनवस्थितशब्दस्यास्थिरस्वरूपस्येति पर्यायोऽस्ति, अनियतशब्दस्य यदृच्छाशब्दस्य च यथाकथंचिदिति व्याख्यानं चेति, तथा यच्चाभाणि—'सामायिकप्रतिमायामपि सामायिकमुभयसन्ध्यमेवोक्त'मिति, अत्राप्यवधारणमागमविरुद्धं, तथाहि'तस्स णं एगं अणेगाइं वा अणुव्वताइं कताइं भवंति सामाइयं संमं अणुपालेति जाव तिन्नि मासा' आव० चू० पत्र ४०१, से य सामाइयं देसावगासियं संमं अणुपालित्ता भवति, से य चाउद्दसीअट्ठमीउद्दिट्ठपुण्णिमासिणीसु, पडिपुन्नं पोसहं नो संमं अणुपालित्ता भवति" आव० चू० दशासूत्रे च.'प्रतिदिनमुभयसंध्यं सामायिककरणं मासत्रयं यावदिति सम० वृ०.'वरदंसणवयजुत्तो सामइयं कुणइ जो उ संझासु। उक्कोसेण तिमासं एसा सामाइयप्पडिमा ॥१॥" उपा० वृत्तौ अध्यय० १, यद्यप्येषा सामायिकप्रतिमा एतस्य प्रकरणस्य दशाश्रुतस्कंधस्य चाभिप्रायेण अनियतकालमाना तथाप्यावश्यकचूर्ण्यभिप्रायेणोपासकदशाभिप्रायेण च प्रतिदिनमुभयसंध्यं सामायिककरणतो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





भासत्रयमानोत्कर्षेण द्रष्टव्या, जघन्यतस्तु सर्वा अपि एकाहादिमाना'' इति दशमपंचा० वृ० प० ११७, इह समवायादिवृत्तित्रये श्रीअभयदेवसूरिकृते यदुभयसंध्यं सामायिकमुक्तं तदुभयसंध्यं करणीयमेवेत्यस्यार्थस्य ख्यापनार्थं ज्ञेयं, 'चतुर्षु स्थानेषु नियमात् करोति चैत्यगृहादिष्वावश्यकं कुर्वाण' इति वचनात्, यदि चेह प्रतिमाधिकारोक्तं यत्र तत्र व्याख्याऽवधारणं क्वाप्यागमे अदृष्टमपिं यदृच्छया कल्पयिष्यते तदा पञ्चमप्रतिमायां प्रतिमावर्जदिवसेषु 'असिणाण वियडभोई दिया बंभयारी रत्तिं परिमाणकडे' आव० चू० षष्ठ्यां 'सचित्ताहारे से अपरिन्नाए भवति' आव० चू० इत्यादिवह्वषु स्थानेषु विकटे-दिवसे भोज्येव दिवैव ब्रह्मचारी रात्रौ कृतयोषित्संगपरिमाण एव स्यात् सचित्ताहारस्तस्यापरिज्ञात एव भवतीत्यादिरूपावधारणकल्पनमपि प्रसज्यते, तथा च सति कदाचिदुपवासकरणे रात्रावपि कदाचिद्योषिद्भोगपरिमाणपरिहारे स्यात्सचिताहारवर्जने च प्रतिमाविराधना भवेत्, तथा चानिष्टापत्तिः स्यादिति, सामायिकं च वंदनकेर्यापथिकाप्रतिक्रमणादिवद्दिने २ बहुशोऽपि कार्यं, यतो दैवसिकरात्रिकप्रतिक्रमणरूपावश्यकमेवानुयोगद्वारेषूभयकालमवश्यकरणीयमुक्तं, तथा 'सामायिकं प्रागुक्तनिरुक्तं इत्वरः-स्तोकः कालो यत्रास्ति तदित्वरिकं-मुहूर्तादिप्रमाणं गृहिणः-श्रावकस्य' दशमपंचा० वृ०, गिहिणोऽवि सव्ववज्जं दुविहं तिविहेण छिन्नकालं तं। कायव्वं,आह-सव्वे को दोसो ?, भण्णए-अणुमई ॥१॥ ''इह परिपूर्णसामायिककरणशक्त्यभावे-संपूर्णसामायिकांगीकारसामर्थ्याभावे गृहिणाऽपि-गृहस्थेनापि सता तत्सामायिकं छिन्नकालं-द्विघटिकादिकालमानोपेतं सर्ववर्जं-सर्वशब्दोच्चारणरहितं द्विविधं त्रिविधेन कर्तव्यं'' विशे० वृ० उ० पत्र १६८ ''त्यक्तार्द्ररौद्रध्यानस्य, त्यक्तसावद्यकर्मणः। मुहूर्तं समता या तां, विदुः सामायिकव्रतम् ॥१॥ योग० 'जाव नियमं पज्जुवासामि' जावत्ति-कालावधौ नियमं-सावद्ययोगप्रत्याख्यानरूपं पर्युपासे-सेवयामि, जइवि सामन्नवयणमेयं तहावि जहन्नओवि अंतो-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मुहुत्तं नियमे ठायव्वंति, परओवि समाहीए चिट्ठउ'त्ति प्रतिक्र० चू० पत्र २०२, अतः सामायिकमंगीकारानन्तरं जघन्यतोऽपि द्विघटिकामानं पालनीयं, अन्यथाऽनवस्थितरूपः पञ्चमातिचारः स्यादिति, तथा जइ वावारं न वावारेइ ताहे घरे चेव सामाइयं काऊण वच्चइ पंचसमि" इत्यादि "एयाए विहीए गंता तिविधेण नमिऊण साहुणो पच्छा सामाइयं करेइ—करेमि भंते! सामाइयं सावज्जं जोगं पच्चक्खामि दुविहं तिविहेणं जाव साहू पज्जुवासामित्ति' इत्यादि, जो इड्डिपत्तो सो सव्विड्ढीए एइ"इत्यादि, "आयरिया उट्ठिया य अच्छंति, तत्थ उट्ठितमणुट्ठिते दोसा विभासियव्वा, पच्छा सो इड्डिपत्तो सामाइयं करेइ अणेण विहिणा—करेमि भंते! सामाइयं सावज्जं जोगं पच्चक्खामि दुविहं तिविहेणं जाव नियमं पज्जुवासामि"त्ति मूलाव० बृ० श्रावकवृत्तौ च, इह वृत्तिद्वये पंचाशकवृत्तौ श्रावकप्रतिक्रमणचूर्णौ चानृद्धिप्राप्तेन गृहे सामायिकं कृत्वाऽऽगतेन साधुसमीपे 'जाव साहू' इति भणनं इह ग्रन्थचतुष्टये आवश्यकचूर्ण्यादिषु च न दृश्यते इति, तथाऽवश्यकस्य चूर्णौ वृत्तौ च करेमि भंते इत्यादि पज्जुवासामीति पर्यंत उपरिलिखितप्रमाण एव श्रावकसामायिकदंडकोऽस्ति, 'करेमि भंते! इत्यादि अप्पाणं वोसिरामी'ति पर्यन्तः संपूर्णः प्रतिक्रमणसूत्रचूर्ण्यादिषु दृश्यते, न तु प्रकटसर्वाक्षरं आवश्यकपंचाशकवृत्त्यादिष्विति **सामायिकविचारः** ॥५॥

**आवश्यकानि**—'से किं तं लोउत्तरियं भावावस्सयं ?,२,जं नं समणो वा समणी वा सावओ वा साविया वा तच्चित्ते तम्मणे तल्लेसे तदज्झवसिए तदज्झवसाणे तदट्ठोवउत्ते तदप्पियकरणे अण्णत्थ कत्थइ मणं अकुव्वेमाणे उभओ कालं आवस्सयं करिंति' अनु०सूत्रे,एतद्वृत्तिः—यदिदं श्रमणादयस्तच्चित्तादिविशेषणविशिष्टा उभयकालं प्रतिक्रमणाद्यावश्यकं कुर्वन्ति तल्लोकोत्तरिकं भावावश्यकमिति संटंकः, पत्र २०,'साविगा एगस्स मिच्छादिट्ठियस्स दिण्णा, वेकालियं आवस्सयं करेति पच्चक्खाइ य" आव० चू० योगसंग्रहे पत्र ४२२,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





"असइ साहुचेइयाणं पोसहसालाए सगगिहे वा, एवं सामाइयं वा आवस्सयं वा करेइ" आव० चू० प्रत्या०, सर्वेषां चावश्यकसूत्राणां श्रावकस्य पठनं नासंगतं षड्जीवनिकायवत् सूत्रतोऽप्यनुज्ञातत्वात्, साह्न जहण्णेणं अट्ठ पवयणमायाओ सुत्तओवि अत्थओवि, उक्कोसेणं दुवालसंगाणि, सावगस्स जहण्णेणं तं चेव, उक्कोसेणं छज्जीवणिया सुत्तओवि अत्थओवि, पिंडेसणज्झयणं न सुत्ततो, अत्थतो पुण उल्लावे सुणदि" आव चू०, आवासगमादियं सुयनाणं जावबिंदुसाराओ। उक्कमओ वाइंतो सो पावति आणमादिणो दोसे ॥१॥ (मादीणि) निशीथभाष्य० १९ प० २०२ एतच्चूर्णिरियं–'**आवासग**' गाहा, जं जस्स आदीए तं तस्स हिट्ठिल्लं, जं च जस्स उवरिं तं तस्स उवरिल्लं, जहा दसवेयालियस्स आवस्सगं हिट्ठिल्लं उत्तरज्झयणाण दसवेयालियं हिट्ठिल्लं, एवं नेयं जाव बिंदुसारत्ति" पत्र २२९, नन्वेवं षड्जीवनिकाया अधस्तनश्रुतत्वात् यतिप्रतिक्रमणसूत्रं कस्मात् श्राद्धैर्न पठ्यते ?, उच्यते, नात्र निषेधः, परं विशेषोपयोगिना श्राद्धप्रतिक्रमणसूत्रेणैव चरितार्थत्वादिति, तथा षड्विधावश्यकान्तर्गतस्य श्राद्धप्रतिक्रमणसूत्रस्यापि पठनं श्राद्धानामागमोपदिष्टं दृश्यते, तथाहि–'जस्स णं आवस्सयत्ति पदं सिक्खितं ठितं जितं मितं परिजितं नामसमं अहीणक्खरं अणच्चक्खरं अव्वाइद्धक्खरं अक्खलियं अमिलियं पडिपुन्नं पुडिपुन्नघोसं कंठोट्ठविप्पमुक्कं गुरुवायणोवगयं' अनु० सूत्रं, एतद्वृत्त्येकदेशो यथा 'आवस्सएत्ति पदं'ति आवश्यकपदाभिधेयं शास्त्रमित्यर्थः, विज्ञातश्लोकपदवर्णादिसंख्यमिति एकद्व्यादिभिरक्षरैर्हीनं हीनाक्षरं न तथा, एकस्मिन्नेव शास्त्रेऽन्योऽन्यस्थाननिबद्धान्येकार्थानि सूत्राण्येकत्र स्थाने समानीय पठतो व्यत्याम्रेडितं, सूत्रतो बिन्दुमात्रादिभिरन्यूनमर्थतस्त्वध्याहाराकांक्षादिरहितं, प्रतिपूर्णमित्यादिशास्त्रोक्तविशेषणविशेषितानि आवश्यकसूत्राणि भवन्ति, न पुनरुक्तविशेषणरहितानि, विवक्षितविशेषणं चापरं श्राद्धप्रतिक्रमणसूत्रं नास्तीति, तथा 'काले विणए बहुमाणे उवहाणे' इति द्वारगाथाव्याख्याने दुग्गतिपड-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





णुवधरणा उवधाणं जत्थ जत्थ जं सुत्ते। आगाढमणागाढे गुरुलहु आणाद्ऽसगडपिया ॥१॥ निशी० भा०, एतच्चूर्ण्येकदेशो यथा 'तं च जत्थ जत्थत्ति–एसा सुत्तवीप्सा, जत्थ उद्देशगे जत्थ अज्झयणे जत्थ सुतक्खंधे जत्थ अंगे कालुक्कालिय अंगाणंगे सुते वा जमिति–जं उवहाणं निव्वियतियादि तं तत्थ सुते–श्रुते कातव्वमिति वक्कसेसं भवति' ५०७ "श्रुतग्रहणमभीप्सता उपधानं कार्यं" व्यव० वृ० उ० १ "तवोवहाण" इति गाथायां उपधानं–आगमोपचाररूपमाचाम्लादि" उत्त० २ वृ० 'उवासगाणं च सीलव्वयवेरमण-गुणपच्चक्खाणपोसहोववासपडिवज्जणातो सुत्तपरिग्गहा तवोवहाणं पडिमातो' सम० सूत्रपत्र ३५० एतस्मिन् उपासकस्वरूपप्ररूपणे वृत्त्येकदेशो यथा–श्रुतमध्येतुं न कल्पते, तथापि श्रावकाः पञ्चनमस्कारादिकियत्सूत्राणि मुञ्चन्ति, शेषं सामायिकादि षड्जीवनिकांतं सूत्रं उपधानमन्तरेण यत्पठन्ति, यच्चाकृतापधानतपसोऽपि प्रथमं नमस्कारादीन्, तत्र जीतव्यवहाराः संप्रदायश्च प्रमाणमिति संभाव्यते, किंच–श्रावकस्योभयकालावश्यके सामायिकादिसूत्रोच्चारवंदनकचतुष्कज्ञानादिविषयकायोत्सर्गकरणादिक्रम आवश्यकचूर्ण्याद्युक्त एवावगन्तव्यः, 'समणेण सावएण य अवस्स कायव्वयं हवइ जम्हा। अंतो अहोनिसस्सा तम्हा आवस्सयं नाम॥१॥' अनु०, सू०, जं नं समणो वा समणी वा सावओ वा साविया वा उभओ कालं आवस्सयं करिंति अनु० सू० इत्यादिषु श्रमणस्येव श्रावकस्यापि निर्विशेपमावश्यकाभिधानात्, नन्वावश्यकचूर्ण्यादिषूभयकालावश्यकक्रमः साधुं निर्दिश्योक्तोऽस्ति ततः स कथं श्रावकाणां युज्यते ?, उच्यते, उपलक्षणव्याख्यानाश्रयणात्, अन्यथा श्रमण्या अपि तत्क्रमाभावः प्रसज्येत, यथा 'पंचमहव्वयजुत्तो अणलस माणपरि-वज्जियमई य। संविग्गनिज्जरट्ठी किइकम्मकरो हवइ साहू ॥१॥' इति वन्दननिर्युक्तिगाथायां साधोरुपलक्षणतः श्रमण्यादित्रयमपि केनेतिद्वारे कृतिकर्मकारकतया प्रतिपद्यते तथात्राप्यावश्यकक्रमे इति, केवलं तु श्रावकं प्रतीत्य दैवसिकरात्रिकावश्यकसूत्रोच्चाराद्य-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





नुक्रमः क्वाप्यागमसूत्रे निर्युक्तिचूर्ण्यादौ च न ददृशे न शुश्रुवे चेति, ननु आवश्यकस्यैव तेषु चतुर्ष्वपि स्थानेषु विधीयमानस्य 'आवस्सगं करिंतोत्तीत्यादिना एसो विही सामाइयस्स' एतत्पर्यन्तेन ग्रन्थेन समग्रोऽपि विधिरुक्तः, तत्रापि 'जइ साहुसगासे करेति इत्यादिना पुच्छइ पढइ वा' इत्यन्तेन साधुमूले विधीयमानस्यामूलचूलं विधिरुक्त इत्येवंरूपात् कस्यचिद्वचनाच्चावश्यकचूर्णौ नवमव्रते श्रावकाणां समुचितः षड्विधावश्यकविधिः समग्रोऽपि दर्शितोऽस्तीति प्रतीयते इति चेन्न. तत्र तद्विधेः समग्रत्वायोगेन, नवमव्रतचूर्णौ हि सामायिकदंडकोच्चार ईर्यापथप्रतिक्रमणं गुरुवन्दनं चैत्यवन्दनं चोक्तानि सन्ति, एतावता च षड्विधावश्यकविधेः समग्रस्याभिधानं न स्यादेव, यतोऽत्रोभयकालविधेयं सकलव्रतातिचारपिधानरूपं प्रतिक्रमणं, प्रत्याख्यानं च नामतोऽपि न दृश्यते, कदा कतिकृत्वश्चावश्यकं करणीयमिति विभागश्च, तथा कतिकृत्वः कर्तव्यमिति द्वारे 'पडिक्कमणे सज्झाए काउसग्गावराह पाहुणए। आलोयण संवरणे उत्तमट्ठे य वंदणयं॥१३८॥ इत्यष्टसु वंदनकारणेषु श्रावकाणां कति कारणानि स्युरिति १ 'चत्तारि पडिक्कमणे किइकम्मा तिन्नि हुंति सज्झाए। पुव्वण्हे अवरण्हे किइकम्मा चउद्दस हवंति॥१३९॥' वंदननिर्युक्तौ, अत्र चतुर्दश कृतिकर्माणि तत्र कति कार्याणि कति वा न कार्याणि २ तथा—दुओणयं अहाजायं, किइकम्मं बारसावयं। चउस्सिरं तिगुत्तं च, दुपवेसं एगनिक्खमणं॥१४०॥ किइकम्मंपि करिंतो न होइ किइकम्मनिज्जराभागी। पणवीसामन्नयरं साहू ठाणं विराहंतो॥१४१॥ वंदन० पञ्चविंशत्यावश्यकान्यतरस्थानविराधनायां श्राद्धानां दोषः स्यात् न वा?, यदि स्यात्तदा यथाजातं जन्मश्रवणत्वमाश्रित्य जन्मनिष्क्रमणं च, तत्र रजोहरणचोलपट्टकमात्रया श्रमणो जातः, रचितकरसंपुटस्तु योन्या निर्गतः, एवंभूत एव वंदते" आव० वृत्त्याद्युक्तयथाजातावश्यकस्य कियत्सत्यापयिष्यते कियच्च नेति ३, तथा 'अणाढियं च थद्धं च, पविद्धं परिपिंडियं।' इत्यादिवन्दननिर्युक्त्युक्ता द्वात्रिंशद्वन्दनकदोषाः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





परिहार्या न वा ?, परिहार्याश्चेत्तदा 'आलिद्धमणालिद्धं रयहरसीसेहिं चउभंगो' इति दोषः कथं परिह्रियते ? इति ४, तथा देसिय राइय पक्खिय चाउम्मासे तहेव वरिसे य। एएसु हुंति नियमा उस्सग्गा अनियया सेसा ॥१॥' शेषा–गमनादिविषयाः, कायो० नि०, इह नियताश्च ये कायोत्सर्गा उक्तास्तेषां मध्ये श्रावकैः कति कार्या इति इति ५, विधिद्वारे चउरंगुल मुहपत्ती उज्जुयए डब्बहत्थि रयहरणं कायव्वं, एएण विहिणा वोसट्ठचत्तदेहो'त्ति पूर्ववत् काउस्सग्गं करिज्जाहित्ति कायो० वृ०,एतत्कायोत्सर्गविधिमध्यात् कियान् कार्यः कियांश्च न कार्य इति ६,'घोडग लया य खंभे कुड्डे माले य सबरि वहु नियले' इत्याद्येकोनविंशतिर्दोषाः श्रावकाणां कायोत्सर्गदोषत्वेन भवन्ति न वा ?, भवंति चेत्तदा लंबोत्तरादयः कथं परिहार्या इति ७ तथा 'अणागयमइक्कंतं कोडीसहियं नियंटियं चेव। सागारमणागारं पडिमाणकडं निरवसेसं ॥२४॥ संकेयं चेव अद्धाए पच्चक्खाणं तु दसविहं।'प्रत्याख्याननि०, एतेष्वेतावन्मितानि प्रत्याख्यानानि श्रावकेणामुकविधिना कार्याणीति 'नमुकार पोरसीए पुरिमड्ढेगासणेगठाणे य। आयंबिल अभत्तट्ठे चरिमे अ अभिग्गहे विगई ॥ ६७॥' एषु परिष्ठापनिकाद्याकारोच्चारणं गृहस्थानां कथं संगतं स्यादिति, एकासनादौ च 'जइ तिविहस्स पच्चक्खाइ ताहे से पाणगस्स छआगारे'त्यादि आव० चू०, त्रिविधचतुर्विधाहारप्रत्याख्यानस्य नामग्राहं कथनात् कथं द्विविधाहारप्रत्याख्यानमपि स्यादि१०त्याद्यनेककृत्यानां विधिविभागोऽत्र सामायिकव्रतचूर्णौ नास्ति, ततोऽत्र षड्विधावश्यकविधिः समग्रो नास्तीति प्रतिपत्तव्यं, ननु श्रावकानेव केवलान् प्रतीत्येषां विधिविभागः क्वापि मूलसूत्रचूर्णिवृत्त्यादौ न दृश्यते ततो भवंत एव भणन्त्वेषां विधिविभागमिति, उच्यते, तदेव विचारज्ञ ! प्रोच्यमाने मनो निधेहि, आवश्यकचूर्ण्यादौ हि षड्विधावश्यकाधिकारे सर्वत्र साधोरुपादानं श्रमण्यादित्रयोपलक्षणत्वेन ज्ञेयं, 'जंनं समणो वा समणी वा सावओ वा साविया वा' इत्यादि 'उभओकालं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





आवस्सयं करेंति' इत्यनुयोगद्वारेषु षड्विधावश्यककारकत्वेन चतुर्णां निर्विशेषं भणनात्, ततः साधोः श्रावकस्य च षड्विधावश्यविधिः सदृश एव संभवति, यश्च क्वापि कर्तव्ये कश्चिद्विशेषो दृश्यते तत्रासेवनाशिक्षामधिकृत्य संपूर्णामेव चक्रवालसमाचारीं सदा पालयति साधुः, श्रावकस्तु न तत्कालमपि संपूर्णामपरिज्ञानादसंभवाच्च' आव० वृ० इति वचनात् सोऽपि प्रमाणमेव, स च कश्चिद्वन्दनभाष्यादिप्रकरणेभ्यः कश्चित्तु पूर्वाचार्यपरंपरातो वाऽवगम्यते, नान्यथेति। किंच–श्रावकाणां षड्विधावश्यकविधिविषयविभागं स्वमत्या संभाव्य क्वाप्यागमे पूर्वागमज्ञप्रकरणेषु पूर्वाचार्यपरंपरायां चादृश्यमानानुवादं कल्पयति स सतां न प्रमाणं, यदुक्तं–"उस्सुत्तमणुवदिट्ठं सच्छंदविगप्पियं अणणुवाई। परतत्ति पवित्तेति, नियणे(णेओ)इणमो अहाछंदो ॥३॥ वंदननि० 'नियगमईइ विगप्पिय०' उपदेश०. किंच–ननु महानिशीथे ईर्यापथिकाया महाश्रुतस्कंधत्वभणनात् तावन्मात्रं प्रतिक्रमणमस्त्विति चेदुच्यते. अस्याः प्रतिक्रमणत्वमविचलमेव, 'गमणागमणविहारे सुत्ते वा सुमिणदंसणे राओ। नावा नइसंतारे इरियावहियापडिक्कमणं ॥१॥' कायो० निर्युक्त्यादिस्थानेषु तथैवोक्तत्वात्, परमेतदीर्यापथिकाप्रतिक्रमणमाद्यव्रतविषयं दृश्यते, यच्च सामायिकादिक्रमायातं प्रतिक्रमणमस्ति तदावश्यकनिर्युक्तिचूर्ण्यादौ क्रमसंबद्धदैवसिकरात्रिकरूपं, तत्र च प्रतिक्रमितव्यानि मिथ्यात्वादीन्युक्तानि, तथाहि–'इदाणिं पडिक्कमियव्वंति दारं, जस्स ठाणस्स पडिक्कमिज्जति तं विसेसतो भण्णति, तं पुण ओघओ पंचण्हं ठाणाण पडिक्कमियव्वंति, मिच्छत्तपडिक्कमणं तहेव अस्संजमे य पडिक्कमणं। कसायाण पडिक्कमणं जोगाण य अप्पसत्थाणं॥३०॥संसारपडिक्कमणं चउव्विहं होइ आणुपुव्वीए। भावपडिक्कमणं पुण तिविहं तिविहेण नायव्वं ॥३१॥ चूर्ण्येकदेशो यथा–संसारपडिक्कमणं चउविधं नेरयादिभवस्स जं जं कारणं तस्स पडिक्कमियव्वं, अण्णे पुण भणंति–संसारपडिक्कमणं चउव्विहं नेरयाउयस्स जे हेऊणो महारंभादी तेसु जं अणाभोगेणं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





आभोगेण वा सहसकारेण वा वट्टितं वितहं वा परूवितं तस्स पडिक्कमणमिति—ते वज्जेति, तिरिएसु माइल्लया०, माणुस्सगा देविगा हेऊ न इच्छिज्जंति, माणुस्सदुग्गतिदेवदुग्गतिहेऊ वा जे एतेसु पडिक्कमति, एयं भावपडिक्कमणं, एवं पुण तिविहं तिविहेण पडिक्कमियव्वं' प्रतिक्रमणनिर्युक्तिचूर्णौ, उत्तराध्ययने च सकलव्रतातिचारपिधानरूपमुच्यते, तथाहि—'पडिक्कमणेणं भंते! जीवे किं जणयइ?, पडिक्कमणेणं वयछिद्दाइं पिहेइ, पिहियवयछिद्दे पुण जीवे निरुद्धासवे असबलचरित्ते अट्ठसु पवयणमायासुं उवउत्ते अपुहत्ते सुप्पणिहिए विहरइ' उत्त २९ सूत्रं, एतद्वृत्तिर्यथा—एतद्गुणस्थितेनापि मध्यमतीर्थकृतां तीर्थे स्खलितसंभवे पूर्वपश्चिमयोस्तु तदभावेऽपि प्रतिक्रमितव्यमिति प्रतिक्रमणमाह—प्रतिक्रमणेन—अपराधेभ्यः प्रतीपनिवर्तनात्मकेन व्रतानां—प्राणातिपातनिवृत्त्यादीनां छिद्राणि—अतिचाररूपाणि विवराणि व्रतच्छिद्राणि पिदधाति—स्थगयति अपनयतीतियावदित्यादि' तथा यश्च कश्चिदाक्ति—थूलगं पाणाइवायं समणोवासओ पच्चक्खाति, से य पाणाइवाए दुविहे पन्नत्ते, तंजहा—संकप्पओ य आरंभओ य, तत्थ समणो० संकप्पाओ जावज्जीवाए पच्चक्खाति, नो आरंभओ, थूलगपाणाइवायवेरमणस्स समणोवासएणं इमे पंच अइआरा जाणियव्वा, न समायरियव्वा, तंजहा—बंधे वधे छविच्छेए अइभारे भत्तपाणवुच्छेए इत्यादिप्रत्याख्याननियुक्त्यालापकैः निर्विवादं मूलागमभूतैः सकलव्रतातिचाराः प्रतिक्रम्यन्त इति तदविचारितभाषितं, यतस्ते ह्यालापकाः प्रत्याख्यानरूपाः, तच्चानागतकालविषयमिति, प्रतिक्रमणं त्वतीतकालविषयं, तथाहि—तस्य त्रिकालभाविनोऽधिकृतप्राणातिपातस्य संबंधिनमतीतमवयवं, न तु वर्तमानमनागतं वा, अतीतस्यैव प्रतिक्रमणात्, भदंतेति गुर्वामंत्रणं प्राग्वत्, प्रतिक्रमामि—मिथ्यादुष्कृतं तत्र प्रयच्छामीति' पाक्षि० वृत्तिः, सामान्यशब्दत्वाश्रयणात् त्रिकालविषयमपि, तथा पडिक्कमणं पडिक्कमओ पडिक्कमियव्वं च आणुपुव्वीए। तीए पच्चुप्पन्ने अणागते चेव कालंमि



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





॥१॥' आव० सूत्रं, एतद्वृत्त्येकदेशः, आह—प्रतिक्रमणमतीतविषयं यत उक्तं—'अतीतं पडिक्कमामि पडुप्पन्नं संवरेमि अणागयं पच्चक्खामि'त्ति तत्कथं कालत्रये युज्यते इति, उच्यते, प्रतिक्रमणशब्दो ह्यत्राशुभयोगविनिवृत्तिमात्रार्थः सामान्यशब्दः परिगृह्यते, तथा च पापरूपेऽतीतविषयं प्रतिक्रमणं निन्दाद्वारेणाशुभयोगनिवृत्तिरेव, प्रत्युपन्नविषयमपि संवरद्वारेणाशुभयोगनिवृत्तिरेव, अनागतविषयमपि प्रत्याख्यानद्वारेणाशुभयोगनिवृत्तिरेव, न दोष इति गाथाक्षरार्थः। प्रति० संग्रहणिवृत्तौ, प्रतिक्रमणं सर्वत्रातीतविषयं, संवरणप्रत्याख्यानयोगौ त्रिकालविषयावपि दृश्येते, प्रत्याख्यानं त्वनागमविषयमत्रेक्ष्यते'' इति, किंच—यत्तेषामालापकानां मिथ्यादुष्कृतादियोजनेन प्रतिक्रमणसूत्रत्वमारोप्यते तदपि न युक्तं, स्वमतिकल्पितत्वात्, अपरंच—तथा स्वमतिकल्पने 'अहीणक्खर'मित्यादिनाऽनुयोगद्वारादिषु या सूत्रपाठशुद्धिरुक्ता सा कथं स्यात्?, स्वमतिकल्पकानामतिवैचित्र्येण नियतैकपाठासंभवादिति, तथा ननु प्रतिक्रमणसूत्राणि केन कृतानि? स्थविरविरचितानीति पश्यामः, तथाहि—'अक्खरसंनी' इत्यादिगाथायां तथाङ्गप्रविष्टं गणधरकृतमाचारादि अनङ्गप्रविष्टं तु स्थविरकृतमावश्यकादि' आव० वृ०, ननु—केणंति अत्थओ तं जिणेहिं सुत्तओ गणहरेहिं, तदिति सामायिकं, इत्यावश्यकवचनेन सामायिकादिसूत्राणां गणधरकृतत्वात् स्थविरकृतत्वमुच्यमानं कथं संगतं स्यादिति चेद्, उच्यते, अङ्गप्रविष्टैकदेशोपजीवनात् श्रुतस्थविरा यद्विरचयन्ति तदनंगप्रविष्टं कथ्यते, तथाहि—पायदुगं जंघोरूगायदुगद्धं च दो अ बाहू अ। गीवा सिरं च पुरिसो बारसअंगो सुअविसिट्ठो ॥ १ ॥ श्रुतपुरुषस्यांगेषु प्रविष्टमंगप्रविष्टं, अंगभावेन व्यवस्थितमित्यर्थः, यत्पुनरेतस्यैव द्वादशांगात्मकस्य श्रुतपुरुषस्य व्यतिरेकेण स्थितमंगबाह्यमेव व्यवस्थितं तदनंगप्रविष्टं, अथवा यद्गणधरदेवकृतं तदंगप्रविष्टं, मूलभूतमित्यर्थः, गणधरदेवा हि मूलभूतमाचारादिकश्रुतमुपरचयन्ति, तेषामेव सर्वोत्कृष्टश्रुतलब्धिसंपन्नतया तद्रचयितुमीशत्वात्, न शेषाणां,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ततस्तत्कृतं सूत्रं मूलभूतमित्यंगप्रविष्टमुच्यते, यत् पुनः शेषैः श्रुतस्थविरैः तदेकदेशमुपजीव्य विरचितं तदनंगप्रविष्टं, अथवा यद् सर्वदैव नियतमाचारादिकं श्रुतं तदंगप्रविष्टं, तथाहि–आचारादिकं श्रुतं सर्वेषु क्षेत्रेषु सर्वकालं चार्थक्रमं चाधिकृत्य एवमेव व्यवस्थितं ततस्तदंगप्रविष्टमुच्यते, अंगप्रविष्टमंगभूतं मूलभूतमित्यर्थः, शेषं तु यत् श्रुतं तदनियतमतस्तदनंगप्रविष्टमुच्यते, उक्तं च–'गणहरकयमंगकयं जं कय थेरेहिं बाहिरं तं तु। नियर्य वंगपविट्ठं अणिययसुय बाहिरं भणियं ॥१॥ नंदिवृत्तौ प० १६९। इयाणिं अंगपविट्ठं बाहिरं च दुभिवि भण्णंति, अंगपविट्ठं आयारो जाव दिट्ठिवाओ, अणंगपविट्ठं २ आवस्सगं तव्वतिरित्तं च, आवस्सगं सामाइयमादीयं पच्चक्खाणपज्जवसाणं, वतिरित्तं २ कालियं उक्कालियं च, तत्थ उक्कालियं अणेगविहं, तं०–दसवेयालियं कप्पियाकप्पियं एवमादि, कालियंपि अणेगविहं, तं०–उत्तरज्झयणाणि एवमादि, इत्थ सीसो आह–जइ दिट्ठिवाए सव्वं चेव वयोगतमत्थि तओ तस्स एव एगस्स परूवणं जुज्जति, आयरिओ आह–जतिवि एवं तहावि दुम्मेहअप्पाउयइत्थिमादीणि य कारणाणि पप्प सेसस्स य परूवणा कीरत्ति'ति आव० चू० प० १९, गणहरथेरकयं वा आदेसा मुक्कवागरणओ वा। धुवचलविसेसओ वा अंगाणंगेसु णाणत्तं ॥१॥ गणहरकतं अंगपविट्ठं गणहरकतातो चेव थेरनिव्वूढं अंगबाहिरं, किंच–आदेसा जहा अज्जमंगू तिविहं संखं इच्छति एगभवियं बद्धाउयं अभिमुहनामगोयं, अज्जसमुद्दा दुविहं–बद्धाउयं अभिमुहनामगोत्तं च, अज्जसुहत्था एगं अभिमुहनामगोयं इच्छति, मुक्कवागरणा जहा वरिस देव कुणालाए०, मरुदेवा अणादिवणस्सइकातिया, एते आदेसा, मुक्कवागरणा अंगबाहिरा, अहवा धुवा बारस अंगा चला पइण्णगा, कदाइ निज्जूहंति कदाइ नवीत्यर्थः, एस अंगाणंगेसु विसेसो, आह–दिट्ठिवाए सव्वमेव वयोगतमोतरति किंनिमित्तं निज्जूहणा?, उच्यते, 'जतिऽविय भूयावाए सव्वस्स वयोगतस्स ओयारो। निज्जूहणा तहाविहु दुम्मेहे



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





एप्प इत्थी य ॥१॥ भूतावातेत्ति–दिट्ठीवाए, कल्पपीठभाष्यचूर्णौ,एवं चागमस्वरूपे स्थिते दशवैकालिकादीन् परिमितानेव ग्रन्थान् विमुच्य शेषाणां साधुप्रतिक्रमणसूत्रपाक्षिकसूत्रादिबहुग्रन्थानां विरचयितारः केऽपि श्रुतस्थविरा नामग्राहं न श्रूयन्ते तथापि सर्वेऽपि ते ग्रन्थाः प्रमाणमेव, एवं तेषामेव श्राद्धप्रतिक्रमणसूत्रादीनामपि निर्यूहकश्रुतस्थविरनामापरिज्ञानेऽप्यागमत्वं प्रमाणत्वं चाविकलमेवोभयत्रापि प्रामाण्यहेतूनां समानत्वात् , एवं च गणधरकृतमुपजीव्य श्रुतस्थविरैर्विरचितत्वादावश्यकादिसकलानंगप्रविष्टश्रुतस्य स्थविरकृतत्वमपि सिद्धान्तेऽभ्यधायीति तात्पर्यार्थः, तथा सम्यक्सिद्धान्तहृदयवेदिभिः पूर्वबहुश्रुतैरपि श्रावकाणां प्रतिक्रमणाद्यावश्यकं सिद्धान्तोपदिष्टतया भणितं, तथाहि नवाङ्गीवृत्तिकारश्रीअभयदेवसूरयः, किं च–'सव्वंति भाणिऊणं विरई खलु जस्स सव्विया नत्थि। सो सव्वविरइवाई चुक्कइ देसं च सव्वं च ॥१॥ इत्यनया गाथया सामायिकसूत्रं सर्वशब्दवर्जं श्रावकस्योक्तं १,चतुर्विंशतिस्तवस्तु सम्यग्दर्शनशोधकः,सम्यग्दर्शनस्य च श्रावकस्यापि शोधनीयत्वात् कर्तृविशेषस्य चानभिहितत्वादाचरितत्वाच्चोपपन्न एवास्य,किं च–ईर्यापथिकाप्रतिक्रमणस्य गमनागमनशब्देन भगवत्यां शंखोपाख्यानके पुष्कलिश्रावककृतत्वेन दर्शितत्वाद् ,गमनागमनशब्दस्य चेर्यापथिकापर्यायतया भगवत्यामेव तेषु तेष्वाख्यानकेष्वोघनिर्युक्तिचूर्ण्यां च प्रसिद्धत्वात् ,तदीर्यापथिकाकायोत्सर्गे च चतुर्विंशतिस्तवस्य प्रायश्चिन्तनीयत्वाच्चासौ सिद्ध इति २ वन्दनकमपि गुणवत्प्रतिपत्तिरूपत्वाद्गुणवत्प्रतिपत्तिश्च श्रावकस्याप्यविरुद्धत्वात् कृष्णादिभिश्च तस्य प्रवर्तितत्वात् संगतमेवास्य, ननु 'पंचमहव्वयजुत्तो अणलस माणपरिवज्जियमई य। संविग्गनिज्जरट्ठी कियकम्मरो हवइ साहु ॥१॥ त्ति अनया निर्युक्तिगाथया साधुग्रहणेन श्रावकस्य व्यवच्छेदान्न संगतं तस्य वंदनकं, नैवं, यतः साधुग्रहणं तत्र तदन्यवंदनकोपलक्षणार्थं, नतु श्रावकव्यवच्छेदान्न संगतं तस्य वंदनकं, यदि तु व्यवच्छेदार्थमभविष्यत्तदा साध्व्या अपि व्यवच्छेदोऽभविष्यत् , न चासौ संगतः,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मातुर्विशेषेण वन्दनकनिषेधाद्, यदाह—मायरं पियरं वावि, जिट्ठगं वावि भायरं। किइकम्मं न कारिज्जा, सव्वे राइणिए तहा ॥१॥ 'पंचमहव्वयजुत्तो' अनेन यथा पंचमहाव्रतग्रहणादनुव्रतयुक्तव्यवच्छेदस्तथा पंचग्रहणाच्चतुर्महाव्रतयुक्तस्य मध्यमतीर्थसाधोरपि व्यवच्छेदः स्यात्, न चैतदिष्टमित्यतो निर्विशेषं वंदनकमपीति ३। प्रतिक्रमणं तु सामान्यत ईर्यापथप्रतिक्रमणभणनेनैव सिद्धं, अथ विचित्राभिग्रहवतां श्रावकाणां कथमेकेन प्रतिक्रमणसूत्रेण तदुपपद्यते?, यतोऽप्रतिपन्नान्यतरव्रतस्य तदतिचारासंभवस्तदसंभवे च तदुच्चारणमसंगतमेव, अन्यथा महाव्रतातिचाराणामप्युच्चारणप्रसङ्ग इति, नैवं, अप्रतिपन्नान्यतरव्रतस्यापि तदतिचारोच्चारणतः श्रद्धानादिविपयस्य प्रतिक्रमणस्यानुमतत्वाद्, यत उक्तं—'पडिसिद्धाणं करणे किच्चाणमकरणे य पडिक्कमणं। असद्दहणे य तहा विवरीयपरूवणाए य ॥१॥'' अत एव साधुरप्रतिपन्नास्वप्युपासकभिक्षुप्रतिमासु 'एगारसहिं उवासगपडिमाहिं, बारसहिं भिक्खुपडिमाहिं' इत्येवं प्रतिक्रामति, ननु यद्येवं तदा साधुप्रतिक्रमणसूत्रेणैव प्रतिक्रामन्तु, को वा किमाह?, केवलं श्रावकप्रतिक्रमणसूत्रमणुव्रतादिविपयप्रतिपिद्धाचरणस्य प्रपंचाभिधायकत्वात्सोपयोगतममिति तेन ते प्रतिक्रामन्ति, ननु साधुप्रतिक्रमणाद्भिन्नं श्रावकप्रतिक्रमणसूत्रमयुक्तं निर्युक्तिभाष्यचूर्ण्यादिभिरतंत्रितत्वेनानार्षत्वात्, नैवं, आवश्यकादिदशशास्त्रीव्यतिरेकेण निर्युक्तीनामभावेनौपपातिकाद्युपांगानां च चूर्ण्यभावेनानार्षत्वप्रसङ्गात्, ततः प्रतिक्रमणमप्यस्ति तेषां ४। कायोत्सर्गस्तु ईर्यापथप्रतिक्रमणात् पंचमप्रतिमाभणनात्सुभद्राश्राविकादिनिदर्शनतश्च श्रावकस्य विधेयतया प्रतिपत्तव्यो, यदि हि साधवोऽपि भंगभयात् साकारं कायोत्सर्गं प्रतिपद्यन्ते तदा गृहिभिः सुतरामसौ तथा प्रतिपत्तव्यः, साध्वपेक्षया तेषामनैष्ठिकत्वादिति ५। एवं प्रत्याख्यानमपि, ननु परिष्ठापनिकादयः आकाराः साधूनामेव घटन्ते, ततो गृहिणामयुक्तमेतत्, नैवं, यतो यथा गुर्वादयः परिष्ठापनिकस्यानधिकारिणोऽपि तथा भगवतीयोगवाहिनो



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गृहस्थसंसृष्टाद्यनधिकारिणोऽपि पारिष्ठापनिकाकारोच्चारणेन प्रत्याख्यान्ति. अखंडं सूत्रमुच्चारणीयमिति न्यायाद् ,एवं गृहस्थानामपीति न दोषः। तस्मात् षड्विधावश्यकमपि श्रावकस्यास्तीति प्रतिपत्तव्यमित्यलं विस्तरेणेति गाथार्थः ४४ ॥ प्रथमपंचाशकवृत्तौ ॥ श्रीमुनिचन्द्रसूरिश्रीहेमसूरिश्रीविजयसिंहसूरिश्रीदेवेन्द्रसूरिप्रमुखालब्धसंख्यपूर्वबहुश्रुतसंविग्नविरचितेषु योगशास्त्रदिनकृत्यवृत्त्यादिबहुप्रकरणेष्वपि श्रावकाणां प्रतिक्रमणं साक्षादुक्तमस्ति ॥ **इति श्रावकाणां प्रतिक्रमणविचारः ६** ॥

**वर्धमानस्तुतयः**—ताओ य थुईओ एगसिलोगादि वड्ढंतियाओ अ अक्खरादीहिं वा सरेण वा वड्ढंतेण तिण्णि भणिऊणं ततो पाओसियं करिंति,प्रभातावश्यके तु पच्छा तिन्नि थुतीओ अप्पसद्देहिं तहेव भण्णंति जहा घरकोइलियादी सत्ता न उट्ठिंति,कालं वंदित्ता निवेदिंति, जइ चेइयाणि अत्थि तो वंदंति" आव० चू०प३८२,'आवासय काऊणं जिणोवइट्ठं गुरूवएसेण। तिण्णि थुती पडिलेहा कालस्स विही इमो तत्थ ॥१॥ आवश्यके निशीथे व्यवहारे च, अत्र चूर्णिः–जिणेहिं गणहराणं उवदिट्ठं,ततो परंपरएण जाव अम्हं गुरूवएसेण आगतं काउं आवस्सगं अण्णे तिण्णि थुतीओ करिंति, अहवा एगा एगसिलोगिया० तेसिं समत्तीए कालवेलापडिलेहणविही इमा कायव्वा" आव० चू० निशीथ०उ० १९ चूर्णौ च, जिणेहिं उवदिट्ठं गणहराणं, गुरूवएसेणंति–अम्हं आयरिउवज्झाएहिं जहा उवदिट्ठं तिण्णि थुतीओ पढमा एगसिलोगिया बितिया बिसिलोगिया ततिया तिसिलोगिया" व्यव० चू० उ ७, "प्रतिक्रमणपरिसमाप्तौ ज्ञानदर्शनचारित्रार्थं स्तुतित्रये दत्ते सति एतेषां मुखवस्त्रिकादीनां प्रत्युपेक्षणासमाप्त्यनन्तरं यथा सूर्य उद्गच्छत्येष प्रत्युप्रेक्षणकालविभाग" इति ओघ० वृत्तौ पत्र ९९, इह यास्त्रिश्लोकिकाद्याः स्तुतयो याश्च पदाक्षरादिभिर्वर्द्धमाना वर्द्धमानस्वरेण वा भणनीया उक्ताः सन्ति ता नामग्राहं क्वाप्यागमचूर्णिवृत्त्यादौ न दृश्यन्ते, परमाचार्यपरंपरागतं 'नमोऽस्तु वर्द्धमानाये'त्यादि 'वि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





शाललोचने'त्यादि 'संसारदावे'त्यादि च पृथक् पृथक् स्तुतित्रयं, पादाक्षरादिवृद्धा वर्द्धमानस्वरेण भण्यंते इति, यच्च 'तित्थयरे भगवंते'इत्यादिस्तुतित्रयं केनचिद्भण्यते तत्पदाक्षराभ्यामपि वर्द्धमानं नास्तीतिज्ञेयमिति ॥इतिश्रीवर्द्धमानस्तुतित्रयविचारः॥७॥

**श्रुतदेवताद्युत्सर्गाः**–आयरणा सुयदेवयमाईणं होइ उस्सग्गो॥४८९॥वृत्तिः–आचरणेदानीं श्रुतदेवतादीनां भवति कायोत्सर्गः, आदिशब्दात् क्षेत्रभवनदेवतापरिग्रह इति गाथार्थः,पंचवस्तुकवृत्तौ श्रीहारिभद्रीयायां,श्रीवीरनिर्वाणात् वर्षसहस्रे पूर्वश्रुतं व्यवच्छिन्नं, श्रीहरिभद्रसूरयस्तदनु पंचपंचाशता वर्षैर्दिवं प्राप्ताः,ग्रन्थकरणकालाचाचरणायाः पूर्वमेव संभवात् श्रुतदेवतादिकायोत्सर्गः पूर्वधरकालेऽपि संभवति सेति,तथा श्रुतदेवतादिकायोत्सर्गकरणं सम्यग्दृशां न युज्यते इति यस्य कस्यचिद्वचनं तद्वि न युक्तं,आगमे तस्योपदिष्टत्वात् , तथाहि–"चाउम्मासिय वरिसे उस्सग्गो खित्तदेवताए अ। पक्खिय सिज्जसुरीए करिंति चउमासिए वेगे ॥१॥ आव० कायोनिर्यु०, "चाउम्मासिय संवच्छरिएसु सव्वेऽवि मूलगुणउत्तरगुणाणं आलोयणं दाऊण पडिक्कमंति, खित्तदेवताए य उस्सग्गं करिंति, केइ पुण चाउम्मासिगे सिज्जादेवताएवि काउस्सग्गं करिंति" आव० वृ०,"चाउम्मासिए एगे(हिं)उवस्सयदेवताए काउस्सग्गो कीरति,संवच्छरिए खित्तदेवयाएवि कीरति अब्भहिओ" आव०चू०, तथा श्रुतदेवतायाश्चागमे महती प्रतिपत्तिर्दृश्यते, तथाहि– 'सुयदेवयाए आसायणाए' सुतदेवता जाए सुयमहिद्वियं तीए आसातणा, नत्थि सा, अकिंचित्करी वा, एवमादि" आव० चू०, 'जा दिट्ठिदाणमित्तेण देइ पणयाण नरसुरसमिद्धिं। सिवपुररत्थं आणारयाण देवीइ तीइ नमो॥१॥" आराधनापताकायां,'यत्प्रभावादवाप्यन्ते, पदार्थाः कल्पनां विना। सा देवी संविदे नस्तादस्तकल्पलतोपमा ॥१॥ उत्तरा० बृहद्वृ० 'प्रणिपत्य जिनवरेन्द्रं वीरं श्रुतदेवतां गुरून् साधून्' आव० बृहद्वृत्तौ, 'यस्याः प्रसादमतुलं संप्राप्य भवन्ति भव्यजननिवहाः। अनुयोगवेदिनस्तां प्रयतः श्रुत-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



८ श्रुतदेवा-
दिकायो-
त्सर्गाः

देवतां वन्दे ॥१॥' अनुयोगवृत्तौ "पंचविहायारविसुद्धिहेतुमिह साहु सावगो वावि। पडिकमणं सह गुरुणा गुरुविरहे कुणइ इक्कोऽवि ॥१॥ वंदित्तु चेइयाइं दाउं चउरादिए खमासमणे । भूनिहियसिरो सयलाइयारमिच्छुक्कडं देइ ॥२॥ सामाइयपुव्वमिच्छामि ठाइउ काउस्सग्गमिचाइ इत्यादिगाथाः १२, पुण पणवीसुस्सासं उस्सग्गं कुणइ पारए विहिणा । तो सयलकुसऊकिरियाफलाण सिद्धाण पढइ थयं ॥१॥ अह सुयसमिद्धिहेउं सुयदेवीए करेइ उस्सग्गं। चिंतेइ नमुक्कारं सुणइ य देइ य तीइ थुइं ॥ १५ ॥ एवं खित्तसुरीए उस्सग्गं कुणइ सुणइ देइ थुइं। पढिऊण पंचमंगलमुवविसइ पमज्ज संडासे ।१६॥ पुव्वविहिणेव पेहिय पुत्तिं दाऊण वंदणं गुरुणो। इच्छामो अणुसट्ठिंति भणिय जाणूहिं तो ठाइ ॥१७॥ गुरुथुइगहणे थुइ तिण्णि वद्धमाणक्खरस्सरो पढइ। सक्कत्थयं थवं पढिय कुणइ पच्छित्तउस्सग्गं ॥१८॥ एवं ता देवसियं राइयमवि एवमेव नवरि तहिं। पढमं दाउं मिच्छामि दुक्कडं पढइ सक्कथयं ॥१९॥ उट्ठिय करेइ विहिणा उस्सग्गं इत्यादि गाथाः २६, इच्छामो अणुसट्ठिंति भणिय उवविसिय पढइ तिण्णि थुई। मिउसद्देणं सक्कथयाइ तो चेइए वंदे ॥२७॥ अह पक्खियं चउद्दसिदिणंमि पुव्वं व तत्थ देवसियं। सुत्तंतं पडिकमिउं तो सम्ममिमं कमं कुणइ ॥२८॥ मुहपोत्ती वंदणयं संबुद्धाखामणं तहाऽऽलोए। वंदण पत्तेयं खामणं च वंदणयमह सुत्तं ॥२९॥ सुत्तं अब्भुट्ठाणं उस्सग्गो पुत्ति वंदणय तहय। पज्जंतियखामणयं तह चउरो छोभवंदणया ॥३०॥ पुव्वविहिणेव सव्वं देवसियं वंदणाइ तो कुणइ। सिज्जसुरी उस्सग्गे नेओ संतित्थयस्स पढणे य ॥३१॥ एवं चिय चउम्मासे वरिसे उ जहक्कमं विही णेओ। पक्खियचउमासवरिसेसु नवरि नामस्स नाणत्तं ॥३२॥"योगशा० तृ० प्र० वृत्तौ, श्रुतदेवतादिकायोत्सर्गविचारः ८ ॥

तथा "ओघाडपोरिसिं जा राइयमावस्सयस्स चुण्णीए। ववहाराभिप्पाया भणंति पुण जाव पुरिमड्ढं ॥१॥" पाक्षिकसप्तत्यां १,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





एवं दिवसओ वंदणगविहाणं भणियं, रत्तिमाइसुवि जेसु टाणेसु दिवसग्गहणं तत्थ राइगादी भाणियव्वा, पादोसिए जाव पोरिसीओ, २ न उग्घाडइ ता देवसियं भण्णति, पुव्वण्हे जाव पोरिसी न उग्घाडति ताव राइयं"ति आव० चू० अध्य० ३ प० ३६० 'वीसुंपि वसंताणं' इत्यादि 'अह हत्थसयस्स बाहिं वसही लद्धा ताहे आयरियसगासे आलोइत्ता सकाए वसहीए वेयालियावस्सयं करिंति, गोसे आवासयं काउं आयरियसगासे गंतुं आलोइत्ता पच्चक्खाणं गिण्हंति, दूरेत्ति—जति अण्णगामे ठिता होज्ज ताहे जदि गुरुसगासे एंतजंतगाणं पोरिसीभंगो ण हुज्ज ताहे उग्घाडाए पोरिसीए आगंतुं आयरियसगासे आलोएंति, पच्चक्खाणं पुरिमड्ढिया गिण्हंति, एयं दूरट्ठियाण अविसेसियं भणियं, कहं पुण विसेसितंति ?, तेसिं अत्थि कोति गीयत्थो सहाओ तो ते अगीया तस्सेवंतिए आलोएंति, जो सो गीतो उग्घाडाए पोरसीए गुरुसगासमागंतुं वियडेति, अह नत्थि कोति तेसिं गीयत्थो ताहे उग्घाडाए पोरिसिए गुरुसगासमागंतुं पत्तेयं २ आलोएंति, दूर इति वर्तते, जदि दूरे वसही लद्धा हुज्ज तत्थ जइ इमं हुज्ज एंताण य जंताण य पोरिसीभंगो ततो गुरू वयंति, थेरे अजंगमंमि य मज्झण्हे वावि आलोए, जदि उग्घाडपोरसीए इंतजंताण पोरसीभंगो भवति तो आयरिएण चेव अकयसुयाणं सगासं गंतव्वं, अह आयरिओ वुड्ढत्तणेणं गेलण्णेण वा न सक्केति गंतुं ताहे अघडसुया मज्झण्हे आयरियसगासमागंतुं आलोएंति"व्यव० भाष्यचूर्णी, इह मध्याह्नेऽपि रात्रिकालोचनमुक्तं, मध्याह्नशब्दार्थः पौरुष्यनन्तरकाले प्रयुक्तो दृश्यते, तथाहि—पडिलेहंतच्चिय वेंटियाओ काऊण पोरिसिं करिंति। चरिमा उग्गाहेउं सुत्ता मज्झण्हे वच्चंति ॥१॥' ओघ० सूत्रे, इह च दैवसिकादीनामयं कालनियमः, यथा दैवसिकं मध्याह्नादारभ्य निशीथं यावद्भवति, रात्रिकं निशीथादारभ्य मध्याह्नं यावद्भवति, पाक्षिकचातुर्मासिकसांवत्सरिकाणि पक्षाद्यन्ते भवन्ति"योगशास्त्र० प्र० वृत्तौ, इति रात्रिकदैवसिककालविभागः९॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





उज्जिंतादिस्तुतिः-यत्कश्चिदाह-सिद्धस्तवस्तुतित्रयानन्तरं 'उज्जिंतसेलसिहरे' इत्यादिस्तुतिद्वितयभणनं यत्सर्वत्र रूढं तन्न श्रुतसंमतमिति, तदयुक्तं, बहुश्रुतैस्तस्य श्रुतसंमतत्वभणनात्, तथाहि-नव अहिगारा इह ललियवित्थराविचित्तिमाइअणुसारा। तिण्णि सुयपरंपरया बीओ दसमो इगारसमो ॥४६॥ त्रयो बहुश्रुतपरंपरया, द्वितीयो 'जे अईया सिद्धा' इति, दशमः 'उज्जिंतसेल' इति, एकादश 'चत्तारि अट्ठ' इति, 'आवस्सयचुण्णीए जं भणियं सेसया जहिच्छाए। तेणं उज्जिंताइवि अहिगारा सुयमया चेव ॥४७॥ श्रीदेवेन्द्रसूरिकृतभाष्येषु, 'इक्कोऽवि नमुक्कारो' गाथासूत्रं ओघओ किर कंटं, विभागतो पुण अणेगनयभंगगमगहणं गुरू भणंतित्ति, एते तिण्णि सिलोगा भणंति, सेसा जहिच्छाए" आव० चू० अध्य० ५ पत्र ४८१, एतास्तिस्रः स्तुतयो नियमेनोच्यन्ते, केचिदन्या अपि पठन्ति, न च तत्र नियमः" आव० वृ० "एतास्तिस्रः स्तुतयो नियमेनोच्यन्ते, केचित्त्वन्या अपि पठन्ति, न च तत्र नियम इति न तद्व्याख्या न क्रिया" ललितविस्तरायां, 'एतास्तिस्रः स्तुतयो गणधरकृतत्वान्नियमेनोच्यन्ते, केचित्त्वन्या अपि स्तुतीः पठंति, यथा 'उज्जिंतसेल' इत्यादि" योगशा० तृ० प्र० वृत्तौ, अत एषा स्तुतिश्चूर्णिकारादिभिः 'सेसा जहिच्छाए' इत्यादिवचनादस्तित्वेन यथायोगं कथनीयत्वेन चोपदिष्टाः गीतार्थपूर्वाचार्यसंप्रदायागताश्च तस्मात् संमता इति **उज्जिंतसेलस्तुतिद्वयवि० १० ॥**

ननु वैयावृत्त्यकरादीनां कायोत्सर्गकरणं सम्यग्दृष्टीनामनुचितमिति, नैवं, ललितविस्तराख्यचैत्यवंदनामूलवृत्तौ बहुश्रुतकृतप्रकरणेष्वपि च चैत्यवंदनप्रतिबद्धं सर्वत्र व्याख्यानावसरे तस्योक्तत्वात्, यथा "उचितेषूपयोगफलमेतदितिज्ञापनार्थं पठन्ति-वेयावच्चगराणं० यावद्वोसिरामि' व्याख्या पूर्ववत्, नवरं वैयावृत्त्यकराणां-प्रवचनार्थं व्यापृतभावानां यक्षाम्रकुष्मांड्यादीनां शान्तिकराणां क्षुद्रोपद्रवेषु सम्यग्दृष्टीनां सामान्येनान्येषां समाधिकराणां स्वपरयोस्तेषामेव, स्वरूपमेतदेवैषामिति वृद्धसंप्रदायः, एतेषां संबं-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





धिनं, सप्तम्यर्थे षष्ठी, एतद्विषयं–एतानाश्रित्य करोमि कायोत्सर्गं, कायोत्सर्गविस्तरः पूर्ववत्, स्तुतिश्च नवरमेषां वैयावृत्त्यकराणां, तथा तद्भाववृद्धेरित्यभिप्रायः'' ललितविस्तरायां, उचितेष्वौचित्येन प्रवृत्तिरिति ज्ञापनार्थं पठति पठन्ति वा वेयावच्चगराणं० करेमि काउस्सग्गं, वैयावृत्यकराणांप्रवचनार्थं व्यापृतभावानां गोमुखयक्षप्रभृतीनां शान्तिकराणां सर्वलोकस्य सम्यग्दृष्टिविषयसमाधिकराणां एषां संबन्धिनं–षष्ठ्याः सप्तम्यर्थत्वादेतद्विषयमेतान् वाऽऽश्रित्य करोमि कायोत्सर्गं'' योगशा० तृ०प्र०वृत्तौ, ललितविस्तरावृत्तेश्च मूलसूत्रप्रतिबद्धत्वेनावश्यकचूर्ण्यादीनामिवागमत्वं मन्तव्यं. तथाविधदेवतानिमित्तं च पूर्वश्रुतधरैरपि कायोत्सर्गः कृतः श्रूयते, यथा "तत्थ य अब्भासे अन्नो गिरी, तं गया, तत्थ देवयाए काउस्सग्गो कओ, सा अब्भुट्ठिया, अणुग्गहोत्ति, अणुन्नायं'' आव० चू० प० ३१९, अत्र श्रीवज्रस्वामिभिः, गोष्ठामाहिलप्रबंधे श्रीसंघेन सुभद्रया मनोरमया च देवताकृते कायोत्सर्गः कृतः, शुद्धसम्यक्त्वधारिणश्च ते इति वैयावृत्त्यकरादिकायोत्सर्ग० वि० ११ ॥

ननु कल्पभाष्यादौ यतीनां स्तुतित्रयेणैव चैत्यवन्दनमुक्तं, नैवं, तथाहि–पविट्ठाण य चेइयवंदणे समोसरणे य विधिं भणइ–निस्सकडमणिस्सकडे वावि चेतिए सव्वहिं थुई तिण्णि । वेलं व चेइयाणि व नाउं इक्किक्किया वावि॥१॥'' कल्पभा० उ० १, जिनायतने वसतिर्न विधेयेत्यर्थाधिकारे 'दुब्भिगंधपरिस्सावी तणुरप्पेसऽण्हाणिया। दुहा वाउवहो चेव, तेणट्ठंति न चेइए ॥१॥ तिण्णि वा कड्ढए जाव, थुईओ तिसिलोइया। ताव तत्थ अणुन्नायं, कारणंमि परेणवि॥२॥ एषा तनुः स्नापितापि दुरभिगंधप्रस्वेदपरिश्राविणी तथा द्विधावायुपथः–अधोवायुनिर्गम उच्छ्वासनिर्गमश्च, तेन कारणेन चैत्ये–चैत्यायतने साधवो न तिष्ठन्ति, अथवा श्रुतस्तुत्यनन्तरं तिस्रः स्तुतीस्त्रिश्लोकिकाः श्लोकत्रयप्रमाणा यावत्कर्षन्ति तावत् तत्र–चैत्यायतने स्थानमनुज्ञात''मिति व्यव० सू० उ० ९ प०



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



२७६, पाक्षिकादिषु जिनभवनादौ चैत्यवंदको गत्वा यदा स्नानादिदर्शननिमित्तमैर्यापथिकीं प्रतिक्रम्य विश्राम्यति तदा केवलं गमनमेव प्रतिक्रमणीयं, ततः स्वोपाश्रये प्रत्यायातावागमनं, विश्रमणासंभवे गमनागमनमिति" व्यव० चू०पी० प० ३२, यदिह स्तुतित्रयमुक्तं तत् शेषचैत्यवन्दनसूत्रोपलक्षणं, यतोऽत्र नमस्कारशक्रस्तवचैत्यस्तवादीनि चैत्यवन्दनविधिश्च, अपरं च—तास्तिस्रः स्तुतयोऽपि नामग्राहं नोक्ताः, अथावश्यकचूर्ण्यादिगतप्रतिक्रमणविधेरनुसारेण लोगस्स० पुक्खरवर० सिद्धाणं इत्येवंरूपं स्तुतित्रयं यदि संभाव्येत तदा कायोत्सर्गस्य पञ्चविंशत्युच्छ्वासादिमानत्वं प्रसज्येत, तत्प्रोक्तत्वाविशेषादित्यतः कल्पभाष्यादौ समग्रचैत्यवंदनविधिसंग्रहाभावात् स्तुतित्रयेणैव चैत्यवंदनमित्यवधारणं युक्तिरिक्तं, ननु चैत्यवंदने कायोत्सर्गकरणं तस्य चाष्टोच्छ्वासमानत्वं च कुतोऽवगतमिति?, उच्यते, ललितविस्तरातः, तथाहि—अत्र भावना—कायं स्थानमौनध्यानक्रियाव्यतिरेकेण क्रियान्तराध्यासमधिकृत्य व्युत्सृजामि—नमस्कारपाठं यावत् प्रलंबभुजो निरुद्धवाक्प्रसरः प्रशस्तध्यानानुगतस्तिष्ठामि, ततः कायोत्सर्गं करोति, जघन्यतोऽपि च तावदष्टोच्छ्वासमानं" ललित०, उक्तं च -"उद्देसमुद्देसे सत्तावीसं अणुन्नवणियाए। अट्ठेव य ऊसासा पट्ठवण पडिक्कमणमाई ॥१॥ अत्र अयं न गृहीत इति चेत् न, आदिशब्दावरुद्धत्वाद्, उपन्यस्तगाथासूत्रस्योपलक्षणत्वात्, अन्यत्रापि चागमे एवंविधसूत्रानुक्तार्थसिद्धेः, उक्तं च—"गोसमुहणंतगाई आलोइय देवसिए य अइयारा। हियए समाणइत्ता हियए दोसे ठविज्जाहि" अत्र मुखवस्त्रिकामात्रोक्तेरादिशब्दाच्छेषोपकरणपरिग्रहोऽवसीयते, सुप्रसिद्धत्वात् प्रतिदिवसोपयोगाच्च न भेदेनोक्त" इति ललितविस्तरायामिति **स्तुतित्रयकायोत्सर्गप्रमाणविचारः १२ ॥**

चैत्यवन्दनकायोत्सर्गचेष्टाया अन्ते स्तुतयो या रूढा वर्तन्ते ताः क सन्तीति चेत्, उच्यते, यत्रागमे चैत्यवन्दनसूत्राणि व्याख्या- ॥६३॥

For Private And Personal Use Only

तानि कायोत्सर्गः तत्प्रमाणादि तद्विधिश्चोक्तस्तत्र, 'अथ सन्ति बहवस्तत एक एव स्तुतिं पठति, अन्ये तु कायोत्सर्गेणैव तिष्ठन्ति यावत् स्तुतिपरिसमाप्तिः, अत्र चैवं वृद्धा वदन्ति–यत्र किलायतनादौ वन्दनं चिकीर्षितं तत्र यस्य भगवतः संनिहितं स्थापनारूपं तं पुरस्कृत्य प्रथमं कायोत्सर्गः स्तुतिश्च, तथा शोभनभावजनकत्वेन तस्यैवोपकारित्वात्, ततः सर्वेऽपि नमस्कारोच्चारणेन पारयन्तीति,–कायोत्सर्गचर्चा पूर्ववत्, तथैव च स्तुतिः, नवरं सर्वतीर्थकराणां, अन्यथाऽन्यः कायोत्सर्गोऽन्या स्तुतिरिति न सम्यक्, –तथैव च स्तुतिर्यदि परं श्रुतस्य,समानजातीयबृंहकत्वाद्,अनुभवसिद्धमेतत्तज्ज्ञानां,चलति समाधिरन्यथेति प्रकटं,ऐतिह्यं चैतदेवमतो न बाधनीयमिति,–स्तुतिश्च नवरमेषां वैयावृत्त्यकराणां तथा तद्भाववृद्धेरित्युक्तप्रायं, तदपरिज्ञानेऽप्यस्मात् शुभसिद्धाविदमेव वचनं ज्ञापकं" ललितविस्तरायाम्। अत्रान्त्यवाक्यटिप्पनकमिदं–'तदपरिज्ञाने'त्यादि,तैर्वैयावृत्त्यकरादिभिरपरिज्ञानेऽपि कायोत्सर्गः स्यात्, तस्मात् कायोत्सर्गात् तस्य कायोत्सर्गकर्तुः शुभसिद्धौ–विघ्नोपशमपुण्यबन्धादिसिद्धाविदमेव कायोत्सर्गप्रवर्तकं वचनं ज्ञापकं–गमकं आप्तोपदिष्टत्वेनाव्यभिचारित्वात्" ललित० टिप्प० श्रीमुनिचन्द्रसूरिकृते, लहुगा य सपक्खंमि गुरुगा परपक्खि उद्दिसंतस्स। अंगं सुयखंधं वा अज्झयणुद्देसथुतिमाई ॥१॥ यदि विकृष्टं उद्घाटपौरुषीलक्षणे सपक्षे उद्दिशति, संयतः संयतस्योद्दिशतीत्यर्थः, तदा तस्य प्रायश्चित्तं चत्वारो लघुकाः,परपक्षः–संयतस्य संयती संयत्याः संयत इत्यादि,अङ्गं श्रुतस्कंधमध्ययनमुद्देशं स्तुतिं स्तवं च, तत्र स्तुतिस्तवयोर्विशेषमभिधित्सुराह–"एगदुगतिसिलोगा थुती स अन्नेसि होइ जा सत्त। देविंदत्थयमाई तेणं तु परं थओ होइ ॥१॥ एकश्लोका द्विश्लोका त्रिश्लोका वा स्तुतिर्भवति, परतश्चतुःश्लोकादिकः स्तवः, अन्येषामाचार्याणां मतेन एकश्लोकादिसप्तश्लोकपर्यन्ता स्तुतिः, ततः परमष्टश्लोकादिकाः स्तवाः, यथा देवेन्द्रस्तवादयः, आदिशब्दात् कर्मस्तवादिपरिग्रहः, व्यव० भाष्यवृत्तौ



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





उ० ९ पत्र ३७९ कायोत्सर्गश्चाष्टोच्छ्वासमात्रः,न त्वत्राध्ययननियमोऽस्ति कायोत्सर्गे, तां च यद्येक एव ततो "नमो अरिहंताण'-मिति नमस्कारेण पारयित्वा यत्र चैत्यवन्दनं कुर्वन्नस्ति तत्र यस्य भगवतः संनिहितं स्थापनारूपं तस्य स्तुतिं पठति"इत्यादि योगशा० वृ० प्र० वृ०, 'वंदइ उभओकालंपि चेइयाइं थयथुईपरमो' श्रावको वन्दते उभयकालं चैत्यानि स्तवाः स्तुतयः चैत्यवन्दनादिप्रतिबद्धकायोत्सर्गपर्यन्तेषु याः पठ्यन्ते श्रूयन्ते च तत्परमः--तदध्ययनप्रधान'मित्यादि उ० कर्णिकावृत्तौ, इरिय नमुक्कार नमुत्थुणऽरिहंत थुइ लोग सव्वथुई। पुक्खर थुइ सिद्ध वेया नमुत्थु जावंति थय जयवी ॥६२॥ श्रीदेवेन्द्रसूरिकृतभाष्येषु 'पारिय काउस्सग्गो परमेट्ठीणं च कयनमुक्कारो। वेयावच्चगराणं दिज्ज थुइं जक्खपमुहाणं ॥१॥ बृहद्भाष्ये, सर्वाश्च चूलिकास्तुतयः सामान्यतोऽत्र चतुःसंख्याप्रमाणा भाष्य० वृ०,संघा०,अष्टोत्तरशतनमस्काराणामिवापरापराणामपि स्तुतीनां कथने न दोषोऽध्रुवत्वेनानुपदेशः,तथा "आयरियपरंपरएण आगयं आणुपुव्वीए,जहा वद्धमाणसामिणा सुहंमस्स सुहम्मेण जंबुनामस्स जाव अम्ह वायणायरिया आणुपुव्वीए–कमपडिवाडीए आगतं सुत्ततो अत्थतो करणतो य" आव० चू०, सर्वबहुश्रुतपरंपरया स्तुतिचतुष्ककथनं करणतोऽपि रूढमस्ति, तदन्यथाकरणे च महान् दोषः, तद्यथा 'रायणियपरिभासी थेरोवघाइए' सम० सू०, तथा रात्निकपरिभाषी–आचार्यादिपूज्यपुरुषपरिभवकारी, स चात्मानमन्यांश्चासमाधौ योजयत्येव, तथा स्थविरा–आचार्यादिगुरवस्तान् आचारदोषेण शीलदोषेण च ज्ञानादिभिर्वोपहन्तीत्येवंशील: स एव चेति स्थविरोपघातकः ६" सम० वृ०, **चूलिकास्तुतिचतुष्कविचारः॥ इति विचारामृतसंग्रहः श्रीकुलमण्डनसूरिभिरुद्धृतः श्रीजिनागमात् १३ ॥**

**१४ अधिकचैत्यवन्दनं**:--यच्चाह कश्चित्–श्राद्धानां चैत्यवन्दनं नमस्कारशक्रस्तवप्रमाणमेव नैवाधिकमिति,तन्न,अधिकस्यापि प्र-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धत्वात् ,तथाहि–''गंधारजणवदाओ व सावओ पव्वइयउकामो सव्वतित्थगराणं सव्वरयणचिंचइयाओ जम्मणनिक्खमणकेवलुप्पादनिव्वाणभूमी० उड्ढं पडिनियत्तो पव्वयामित्ति, ताहे सुतं वेयड्ढगिरिगुहाए रिसभादीण सव्वतित्थकराणं सव्वरयणचिंचिइयाओ कणगपडिमाओ, साहुसगासे सुणित्ता ताओ दच्छामित्ति तत्थ उ तित्थदेवताराधणं करित्ता विहाडियाओ पडिमाओ, तत्थ सो सावओ थयथुतीहिं थुणंतो अहोरत्तं निवसिओ'' निशी० चू० उ० १०,षड्जीवनिकायाः पूर्वश्रुतत्वात् षड्विधावश्यकान्तर्गतत्वाच्च श्रुतस्तवादीनां चैत्यवंदनसूत्राणां पठनं श्राद्धानाश्रित्य निर्विवादं प्रतिपत्तव्यं, ननु शक्रद्रौपद्यादिभिरुक्तप्रमाणमेव कृतं दृश्यते इति, सत्यं, परं चरितरूपत्वात् तन्नालम्बनहेतुः, किन्तु विहितं, तद्यथा 'तए णं सा दोवई रायवरकन्ना० करयलजावकट्टु एवं वयासी–नमोत्थुणं अरिहंताणं भगवंताणं जावसंपत्ताणं, वंदइ नमंसइ' ज्ञाता० अध्य० १६,अत्र वृत्तिर्यथा ''तत्र वन्दते चैत्यवन्दनविधिना प्रसिद्धेन,नमस्यति–पश्चात् प्रणिधानादियोगेनेति वृद्धाः, न च द्रौपद्याः प्रणिपातदंडकमात्रं चैत्यवन्दनमभिहितं सूत्रे इति सूत्रमात्रप्रामाण्यादन्यस्यापि श्रावकादेस्तावदेवेति मन्तव्यं. चरितानुवादरूपत्वादस्य, न चरितानुवादवचनानि विधिनिषेधसाधकानि भवन्ति, अन्यथा सूरिकाभादिदेववक्तव्यतायां बहूनां शस्त्रादिवस्तुनामर्चनं श्रूयते इति तदपि विधेयं स्यात् , किञ्च अविरतानां प्रणिपातदंडकमात्रमपि चैत्यवंदनविधिर्भवति, अन्येषां तथाभ्युपगमः संभाव्यते, यतो वन्दते नमस्यतीति पदद्वयस्य वृद्धान्तरव्याख्यानमेवमुपदर्शितं जीवाभिगमवृत्तिकृता–''विरतिमतामेव प्रसिद्धचैत्यवन्दनविधिर्भवति, अन्येषां तथाभ्युपगमपुरस्सरकायोत्सर्गासिद्धेः, ततो वन्दते सामान्येन नमस्करोति–आशयवृद्धेः प्रीत्युत्थानरूपनमस्कारेणापि'', किंच–समणेण सावएण य अवस्सकायव्वयं हवइ जम्हा । अंतो अहो निसस्सा तम्हा आवस्सयं नाम ॥१॥ जण्णं समणो वा समणी वा सावओ वा साविया वा तच्चित्ते तम्मणे० उभओकालं आव-



For Private And Personal Use Only

स्सए चिट्ठति तन्नं लोउत्तरिए भावावस्सए' इत्यादेरनुयोगद्वारवचनात्, तथा 'सम्यग्दर्शनसंपन्नः प्रवचनभक्तिमान् षड्विधावश्यकनिरतः षट्स्थानकयुक्तश्च श्रावको भवती'त्युमास्वातिवाचकवचनात् श्रावकस्य षड्विधावश्यकान्तर्गतं चैत्यवन्दनं सिद्धमेव भवती'ति ज्ञाता० श्रु० अध्य० १६ पत्र ८६, ननु कतरश्चैत्यन्दनविधिः प्रसिद्धोऽस्ति ?, उच्यते,यो ज्ञाताधर्मकथाजीवाभिगमवृत्तिकृद्भ्यां कायोत्सर्गादिगर्भ इहैव पूर्वलिखितः प्रदर्शितो,यश्च विहितः करणमार्गागतश्च तद्यथा व्याख्यातं प्रणिपातकदंडकसूत्रं ''तदेतदसौ साधुः श्रावको वा यथोदितं पठन् पंचांगं प्रणिपातं करोति'' ललित०, 'श्रावकस्तु संपादयन्नप्येतौ भावातिशयादधिकसंपादनार्थमाह' ललित०, एवं भगवन्तमभ्यर्च्य–पूजयित्वा ईर्यापथिकीप्रतिक्रमणपूर्वकं शक्रस्तवादिभिर्दंडकैश्चैत्यवन्दनं कृत्वा स्तवनैः–स्तोत्रैरुत्तमैः–उत्तमकविरचितैः स्तुयात्–गुणोत्कीर्तनं कुर्यादित्यादि योग०शा० तृ० प्रकाशवृत्तौ, तथा श्रावकाणां साधूनां चैकरूपं सम्यक्त्वं, ततस्तद्विशुद्धिजनकं जिनवन्दनमपि तुल्ययुक्तिकमेवेति श्रावकाणां चैत्यवन्दनविधिः १४ ॥

१५ शक्रस्तवः–तथा प्रणिपातदंडको 'नमुत्थुणं अरिहंताणमित्यादि 'जियभयाणं' पर्यन्तस्त्रयस्त्रिंशत्पदप्रमाणो ललितविस्तरायामस्ति,'जे य अईया सिद्धे'त्यादिगाथादि बहुश्रुतपरंपरागतंप्रणिपात दंडकांते पठ्यते,बीओ सुयत्थयाई अत्थओ वन्निओ तहिं चेव। सक्कथयंते पढिओ दव्वारिहवसरि पयडत्थो ॥१॥ भाष्ये,न चैवं सूत्रसंधानदोषः संभावनीयः,द्वितीयाधिकारत्वेनाभिधानात्,शक्रस्तवसंपत्पदाक्षरसंख्यायामगणनाच्च, यतोऽन्यत्रापि मूलसूत्रनिर्युक्तीनां बहुश्रुतकृत्यभाष्यचूर्ण्यादिमिश्रितानां पठनं वाचनं च अजितशान्तिस्तवान्ते 'पक्खिय चाउम्मासे' इत्यादिकियद्गाथानां भणनं च न विरुद्धमुच्यते, तथा च भगवत्यावश्यकाभिप्रायेणैव नमस्कारं भणन्ति ते नमस्कारे चूलिकागाथया संधानमेवाङ्गीकृत्य नवपदात्मकत्वं प्रपेदिरे,किंच कैश्चित् 'संपत्ताणं'ति पर्यन्तः पठ्यते, तादृशः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





शक्रस्तवः क्वापि मूलसूत्रनिर्युक्तिभाष्यचूर्णीषु न दृश्यते, तथाहि–बहुश्रुतपरंपरागतप्रसिद्धचैत्यवन्दनसूत्रे 'नमो जिणाणं जियभयाणं' इति पदद्वयं तदनु 'जे य अईये'त्यादिगाथाभणनं चाधिकं, कल्पसूत्रे 'जीवदयाणं दीवो ताणं सरणं गई पइट्ठा नमो जिणाणं जियभयाण'मिति पदान्यधिकानि, तथा भगवतीजंबूद्वीपप्रज्ञप्त्यावश्यकचूर्ण्यादिष्वपि प्रायः शक्रस्तवस्य यावत्करणेनातिदेशो दृश्यते, यत्रापि च नास्ति तत्रापि क्वापि कान्यपि पदानि न्यूनानि क्वापि कान्यपि पदान्यधिकानि दृश्यन्ते, न त्वेतावन्त्येवेति, ननु जीवाभिगमवृत्तौ राजप्रश्नीयवृत्तौ च श्रीमलयगिरिकृतायां 'संपत्ताणं'ति पर्यन्तः पाठोऽन्यूनाधिकः प्रतौ व्याख्यातोऽस्ति,वृत्तिकृतः अतिदेशान् व्याख्यानयन्तो(न्ति)यानालापकानन्यत्रान्यत्र सूत्रेषु चूर्णीषु च दृष्टा न भवन्ति ते तथैव प्रमाणमेवेति,सत्यं.परं प्रष्टव्यमस्ति, ते आलापकास्तथैव प्रमाणमित्यत्रालापकानां प्रमाणत्वं यत्र ग्रन्थे दृष्टास्ते लिखिताः तत्प्रामाण्यमङ्गीकृत्य वृत्तिकृतां वा प्रामाण्यं प्रतिपद्य प्रोच्यमानमस्ति ?, तत्राद्यभेदे सूत्रचूर्ण्यादयः पञ्चचत्वारिंशदादिकल्पितनियतसंख्यान्तर्गता एव ललितविस्तराचैत्यवन्दनभाष्यादयो वा विवक्षिताः ?, तत्राद्यविकल्पाभ्युपगमे दर्श्यतां स ग्रन्थो यत्रैवंविधः संपूर्णः शक्रस्तवोऽस्ति, द्वितीयपक्षे तु ललितविस्तराभाष्यादीनामागमत्वं प्रतिपद्यतां, तत्प्रतिपत्तौ च तेषु विशेषविस्तरेणोक्तानामष्टप्रकारपूजावैयावृत्त्यकायोत्सर्गमुखवस्त्रिकाप्रतिलेखनपूर्वकवन्दनादिकृत्यानां निःशंकं प्रामाण्यं स्वीकार्यं, अथ वृत्तिकृतामाप्तत्वं प्रतिपद्यते तदा श्रीशीलसूरिश्रीअभयदेवसूरिश्रीमलयगिरिप्रमुखाप्तवृत्तिकृदुपज्ञवृत्तिषु दृश्यमानाष्टप्रकारादिपूजाश्रावकप्रतिक्रमणोपधानकायोत्सर्गादिगर्भश्राद्धचैत्यवन्दनादीन्यपि सविस्तरमुक्तानि करणीयतया प्रतिपत्तव्यानि, आप्तोपदिष्टत्वात्, न चाप्तोपदिष्टमप्येकं सत्यमेकं नेति वक्तुं युक्तं धर्मकांक्षिणामिति, यच्च कश्चिदाह–शिरःसंस्थापितकरसंपुटेनैव शक्रस्तवो भणनीय इति, तदपि न यौक्तिकं, थयपाढो होइ जोगमुद्दाए–स्तुतेः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पाठः शक्रस्तवादिस्तवनभणनमिति भाष्यवचनात्, तथा यदपि 'करयलपरिग्गहियं सिरसावत्तं दसनहं मत्थए अंजलिं कट्टु एवं वयासी'ति कल्पादिषूक्तं दृश्यते, तदपि सूत्रोच्चारस्यादौ विनयविशेषदर्शनपरं, न पुनः तथास्थितस्यैव सूत्रोच्चारख्यापनपरं, अन्यदा पितृपादादिविज्ञपनादावप्यादौ प्रतिपत्तेर्भणनात्, तथाऽस्थितस्य विज्ञपनादेरदर्शनात्, पूर्वकालभावविधिवाचिनः क्त्वेत्यत्र क्त्वाप्रत्ययस्योत्तरकालभाविविध्यन्तरसूचकत्वाच्च भाष्यवृत्तौ,'सत्तट्ठ पयाइं ओसरित्ता दसंगुलिं अंजलिं करिय मत्थगंसि पयतो अट्ठसयविसुद्धगंथजुत्तेहिं महावित्तेहिं अपुणरुत्तेहिं अत्थजुत्तेहिं संथुणइ २ वामं जाणुं अंचेइ २ जाव करयलपरिग्गहियं मत्थए अंजलिं कट्टु एवं वयासी—नमोत्थु ते सिद्ध बुद्ध नीरय समण समाहियत्तमण समत्त समजोगि सल्लगत्तण निब्भय नीरागदोस निम्मम निस्संग निसल्ल माणमूरण गुणरयण सीलसागरमणंतमप्पमेय भवियधम्मवरचाउरंतचक्कवट्टी नमोऽत्थु ते अरहतोत्तिकट्टु वंदति नमंसति" जंबूद्वीपप्रज्ञप्तौ आवश्यकचूर्णौ च, यथा पर्युषणाकल्पादौ प्रणिपातदंडकपूर्वमंजलिरुक्ताऽस्ति तथाऽत्र नमस्काराणामप्यादौ दृश्यते, अथ यदि नमस्कारकथनावसरेऽपि करसंपुटं शिरःस्थमेवास्तीति मतं तर्हि नमोत्थु ते इत्यस्यादौ पुनरंजलिकरणकथनं कथं सार्थकमिति वाच्यं ?, विचार्यं विमुच्याभिनिवेशमिति, अतो नमस्काराणां नमोऽस्तु ते इत्यादिशक्रस्तवानन्तरस्य प्रणिपातदंडकस्य चादौ विनयविशेषदर्शनार्थमंजलिकरणं विहिततया प्रतिपत्तव्यं, पूर्वश्रुतैस्तथैव समर्थितत्वात् करणमार्गागतत्वाच्च, न त्वंजलिवाचिना, अनभिधानात्, तथैव शक्रस्तवभणनमायातीति चेदेवं 'धम्मकहा जाव आणाए आराहए भवति, तते णं ते समणोवासगा समणस्स भगवतो महावीरस्स अंतिए धम्मं सुच्चा हट्ठतुट्ठा उट्ठिंति २ समणं भगवं महावीरं वंदंति नमंसंति २ जेणेव संखे समणोवासए तेणेव उवागच्छंति" भग० श० १२ उ० १२ वचनादूर्ध्वस्थितेनैव वन्दनं विधेयमिति प्रसज्यते इति, तथा "साधुः श्रावको वा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





परमगुरुप्रणीतेन विधिना त्रिः प्रमार्ज्य च क्षितितलनिहितजानुयुगलः करकमलसत्यापितयोगमुद्रः प्रणिपातदंडकं पठती'ति यदुक्तं महानि० अध्य० ३ 'हरियतणबीयजंतुविरहियभूमीए निहियउभयजाणु सुपदिट्ठसुविइयनीसंकजहत्थसुत्तत्थोभयं पए पए भावेमाणेणं जाव चेइए वंदियव्वे'त्ति तत्रैव चोक्तं 'सक्कत्थवाइयं चेइयवंदणं'ति, यत्पुनः 'वामं जाणुं अंचेई'त्याद्युक्तं तत् तत्प्रभुत्वादिकारणाश्रितत्वान्न यथोक्तविधिबाधकतया प्रभवितुमर्हति, चरितानुवादत्वाच्च" भाष्यवृत्तौ ॥इति प्रणिपातदंडकविचारः १५॥

**वन्दनकविचारः**—यच्चाह कश्चित्–पर्यायज्येष्ठस्य द्वादशावर्त्तवंदनमपि दीयते,नैवं,आवश्यकवृत्तिचूर्ण्यादौ पुरुषविभागेन त्रिविधवन्दनस्य स्फुटमदृश्यमानत्वात्,वंदनकभाष्याद्युक्तस्य करणमार्गागतस्यैव च तद्विभागस्य प्रामाण्यात्, तथाहि–आयरिय उवज्झाए पवित्ति थेरे तहेव रायणिए। एएसिं कितिकम्मं कातव्वं निज्जरट्ठाए ॥१॥–उद्भावणापहावणखित्तोवहिमग्गणासु अविसाई। सुत्तत्थतदुभयविऊ गणवच्छो एरिसो होइ ॥१३२॥ आवश्यकसूत्रपुस्तकेषु आयरिय उवज्झाए गाहाए ते विभासियव्वा, तत्थ आयरिया वंदियव्वा सव्वेहिवि, जइवि ओमरायणिया पच्चक्खाणआलोयणासु, तंमि वंदिए इमेवि अतिसेसियत्ति तेऽवि वंदयितव्वा, पच्छा उवज्झाओ ओमराइणिओवि, पवत्तीऽवि पवत्तयतीति सीदंतं, थेरा थेरीकरेति सामायारीए पच्छा सो ओमोऽवि,गणावच्छेदिओ सो गच्छस्स वत्थपायाईहिं उवग्गहं करेति, एते किर ओमावि वंदिज्जंति एएसिं आदेसो, अण्णे पुण भणंति–अण्णोवि जो तहाविहो रायणिओ नाम जो दंसणनाणचरणसाधणेसु सुट्ठु पयतो" आव० चू० "गणावच्छेदकोऽत्रापि मूलग्रन्थेऽवगन्तव्यः साहचर्यादिति, स चेत्थंभूतः 'उद्भावणापहावण' इत्यादिगाथा, अस्याप्यूनपर्यायस्यापि कृतिकर्म कर्तव्यं,रत्नाधिकः–पर्यायज्येष्ठः, एतेषामुक्तक्रमेणैव कृतिकर्म कर्तव्यं" आव० वृ०, अत्र वन्दननिर्युक्तिपुस्तकेषु तच्चूर्णौ च कृतिकर्माहस्याचार्यादिपंचकस्य व्याख्याने



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पंचमस्थाने गणावच्छेदिको व्याख्यातोऽस्ति, चूर्णौ त्वन्येषां मतेनापि तथाविध एव रत्नाधिको भणितो, न पर्यायमात्रज्येष्ठ इति, वृत्तौ तु पञ्चमः पर्यायज्येष्ठ उक्त इति। ननु वृत्त्यभिप्रायेण पर्यायज्येष्ठस्य द्वादशावर्तवंदनं भणत्विति, नैवं, अत्र सामान्येन वन्दनामिधानात्,तस्य च त्रयो भेदाः,तेषां च मध्ये पुरुषादिविभागेन तत् क्वापि किमपि वंदनं भवति, पुरुषादिविभागश्चायं–संजतीओ न वंदिज्जंति, कारणे वंदिज्जा जदि बहुस्सुत्ता महंती अपुव्वं सुत्तक्खंधं धरेति, तं च वोच्छिज्जति ताहे तीसे सगासाओ घिप्पति, तथा 'फिट्टावंदणएणं वंदिज्जति उद्दिसणादिसु'' कल्प० चू० पत्र ३०४, संथारं दुरुहंतो किइकंमं कुणइ वाइगं सायं। पाओविय पणिवायं पडिबुद्धो इक्कमिक्कस्स ॥ १ ॥ वृत्त्येकदेशोऽयं–वाचिकं कृतिकर्म्म नमः क्षमाश्रमणेभ्य इतिप्रतिबद्धः सर्व्वैककस्य साधोः प्रणिपातवन्दनं यथारत्नाधिकं करोति 'गुरुवन्दणमह तिविहं तं फिट्टाछोभबारसावत्तं । सिरनमणाइसु पढमं दुन्नि खमासमणदुगि बीयं ॥१॥ तइयं तु छंदणदुगे तत्थ मिहो आइमं सयलसंघे। बीयं तु दंसणीण य पयट्ठियाणं च तइयं तु ॥१॥ वंदनकभाष्ये,इहावश्यकवृत्त्याद्यागमे क्वापि क्वापि रत्नाधिकवन्दनं सामान्येनाभिहितं तथापि विशेषविभागोपदेशकागमाद्विषयविभागेन ज्ञेयं, यथा प्रतिक्रमणं सामान्येनोपदिष्टमपि क्वापि अन्यत्र विभागेनोपदिष्टं विभागेनैव क्रियते, तथाहि–''गमणागमणविहारे सायं पाओ य पुरिमचरिमाणं। नियमेण पडिक्कमणं अतियारो होउ वा मा वा ॥१॥ क० उ० प० १६१, पडिक्कमणं देसियं राइयं च इत्तरियमावकहियं च। पक्खिय चाउम्मासिय संवच्छर उत्तमट्ठे य ॥१९॥आव०अध्य० ४ 'गमणागमणविहारे सुत्ते वा सुमिणदंसणे राओ । नावानइसंतारे इरियावहियापडिक्कमणं ॥१॥आव०अध्य० ५,अरिट्ठनेमिसामी समोसरिओ,रायाभिगमो, अट्ठारस्सवि समणसाहस्सी,वासुदेवो वंदिउकामो भट्टारयं पुच्छति–अहं साहू कयरेणं वंदणएणं वंदामि ?,केण पुच्छसि–दव्ववंदणएणं भाववंदणएणं ?,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सो भणति–जेण तुब्भे वंदिया होह,सामी भणति–भाववंदणएणं,ताहे सव्वे साहुणो बारसावत्तेणं वंदणएणं वंदइ,रायाणो परिसंताटिया, वीरओ वासुदेवाणुवत्तीए वंदइ'' आव० चू० अध्य० ३,'उक्कालियं अणेगविहं पन्नत्तं, तं०–दसवेयालियं कप्पियाकप्पिय'-मित्यादि,कालियं अणंगपविट्ठं अणेगविहं पन्नत्तं,उत्तरज्झयणाइं दसाओ कप्पो ववहारो निसीहं महानिसीहं''इत्यादि 'पुप्फचूलियाउवण्हीदसाओ एवमाइयाइं चउरासीइं पन्नगसहस्साइं भगवओ अरहओ उसभसामिस्स समणस्स परिमाणं, मज्झिमगाणं जिणाणं संखिज्जाणि य पइण्णगसहस्साणि चोद्दस पयन्नगसहस्साणि भगवओ अरहओ वद्धमाणसामिस्स,अथवा जस्स जत्तिया सिस्सा उप्पत्तियाए वेणइयाए कम्मियाए परिणमियाए चउव्विहाए उववेया तस्स तत्तियाइं पइण्णगसहस्साइं,पत्तेयबुद्धावि तत्तिया चेव'' नंदिसूत्रं, अत्र वृत्त्येकदेशो यथा–'अत्र द्वे मते, एके सूरयः प्रज्ञापयन्ति–इदं किल चतुरशीतिसहस्रकमृषभादीनां तीर्थकृतां श्रमणपरिमाणं प्रधानसूत्रविरचनसमर्थान् श्रमणानधिकृत्य वेदितव्यं. इतरथा पुनः सामान्यश्रमणाः प्रभूततरा अपि तस्मिन् ऋषभादिकाले आसीरन्, अपरे पुनरेवं प्रज्ञापयन्ति–ऋषभादितीर्थकृतां जीवतामिदं चतुरशीतिसहस्रादिकं श्रमणपरिमाणं, प्रवाहतः पुनरेकैकस्मिन् तीर्थे भूयांसः श्रमणा वेदितव्याः, तत्र ये प्रधानसूत्रविरचनशक्तिसमन्विताः सुप्रसिद्धतत्त्वदृष्ट्या अन्यकालिका अपि तीर्थे वर्तमानास्तत्राधिकृता द्रष्टव्याः,एतदेव मतान्तरमुपदर्शयन्नाह–यस्य ऋषभदेवादेस्तीर्थकृतो यावन्तः शिष्यास्तीर्थे औत्पत्तिक्या ४ बुद्ध्या उपपेता आसीरन् तस्य तावन्ति प्रकीर्णकसहस्राणि अभवन्, प्रत्येकबुद्धा अपि तावन्त एव, अत्रैके व्याचक्षते–इहैकैकस्य तीर्थकृतः तीर्थेऽपरिमाणानि प्रकीर्णकानि भवन्ति, तत्कारिणामपरिमाणत्वात्, केवलमिह प्रत्येकबुद्धपरिमाणप्रतिपादनात्, अन्ये पुनरेवमाहुः—"सामान्येन प्रकीर्णकैस्तुल्यत्वात् प्रत्येकबुद्धानामत्राभिधानं, नतु नियोगतः प्रत्येकबुद्धरचितान्येव प्रकीर्णकानीति" श्रीनंदिवृत्त्येक-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





देशः' पत्र १७६, एषा च साधुसाध्वीनां स्वहस्तदीक्षितानां संख्या द्रष्टव्या, न गणधरदीक्षितानामिति गुरवः' आव० वृत्तिटिप्पनके, एवं तीर्थकृतां श्रमणसंख्यायां दृश्यमानायामपि कश्चिदाह–श्रीनेमिनाथस्य सर्वसंख्यायां अप्यष्टादशसहस्रप्रमाणा एव श्रमणाः, तेषां च कृष्णेन द्वादशावृत्तिकृतिकर्मकरणात् शेषाणामपि युज्यते इति, परमेतन्मताभ्युपगमेऽपि कृष्णकृतालम्बने सर्वसाधूनां द्वादशावर्तवन्दनं न यौक्तिकं,तीर्थकृन्कारितत्वात ,तीर्थकृदादयश्चाव्यवहारिणस्तेषां चाचरितं न परैर्व्यवहरणीयं, तथाहि–उप्पण्णणाणा जह नो अहंति, चोइसपुव्वाइ सव्वावि... णछि नत्थि चरणं पव्वाविंतोऽवि भस्सती चरणा । मूलावरोधिणी खलु नारभते वाणिओ चिट्ठं ॥१॥ पव्वाविंति जिणो खलु चोदसपुव्वी य जो य अतिसेसी । एते अव्ववहारी गच्छगते इच्छिमो नाउं ॥१॥ जिणो चउद्दसपुव्वी अतिसेसी वा पव्वावेंति. शिष्य आह–अम्हं एते अव्ववहारी, जहा गच्छगओ पव्वावेंति तहा अक्खह, के वा जिणादीहिं पव्वाविया ?, अतो भणति–सत्थाए अइमुत्तो मणओ सिज्जंभवेण पुव्वविदा । पव्वाविओ । दस वाऽऽउविवागदसा अट्ठमवरिसाइं दिक्ख पढमाए । सेसासुवि छसु दिक्खा पब्भारादिसु सा न भवे ॥१॥ जं जंमि काले आउयं उक्कोसियं तं दसहाविभत्तं दस आउविवागदसा भवंति, ताओ य दसाओ दसवरिसपरिमाणाओ दस वरिससयाउसो भवंति, बाला किड्डा मंदा बला पण्णा य हायणि पवंचा । पब्भारा (तह चेव)य मुम्मुही सायणी य तहा ॥१॥ एयाओ य जहानामाणुभावा,पढमदसाए अट्ठमवरिसोवरि नवमदसमेसु दिक्खा,आएसेण वा गब्भट्ठमस्स दिक्खा,जंमणओ अट्ठमवरिसे [किराडि एणं च] एवं च पज्जंतासु छसुवि दिक्खा अणुण्णाया, पब्भारादियासु वुड्ढोत्ति काउं नाणुन्नाता । केसिंचि पवंचादी वुड्ढो उक्कोसगो उ जा सयरी । अट्ठमदसावि मज्झे नवमी दसमीसु य जहण्णे ॥१॥ उक्कोसो दट्ठूणं मज्झिमओ ठाइ वारिओ संतो । जो पुण जहण्ण वुड्ढो हत्थे गहिओ नवरि ठाइ ॥२॥ असामायारिं करिंतो, सत्थाए पुव्वपिया चोद्दसपुव्वीण



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जंबु नाम पिया। तम्मज्झेणं जणओ दिक्खिओ रविक्खयज्झेणं ॥३॥तंमज्झेणंति नवपुव्विणा" निशी० भा० ११ चूर्णेकदेशश्च इति पर्यायज्येष्ठादिवंदनविचारः १६ ॥

१७ वन्दनविधिः—नवरमयं विशेषः—'खामेमि खमासमणो' इत्यादि सर्वं सूत्रमावश्यकादिविरहितं तत्पादपतित एव भणति'आव० चू०अध्य० ३, वंदने सत्यपि द्वितीयवन्दनसूत्रमुत्थाय कुतो भण्यते ?,उच्यते,आवश्यकचूर्ण्यादिवचनात् सर्वत्र तथैव करणमार्गागतत्वाच्च,जवणिज्जपुच्छा गता, इयाणिं अवराधखामणा—ताहे सीसो पुच्छित्ता पादेसु पडितो जं किंचि अवरद्धं तं खामेउकामो भणति—खामेमि खमासमणो ! देवसियं वइक्कमं, वइक्कमो नाम अतिकमस्स बीओ अवराधो, सो य वइक्कमो जे अवस्सं करणिज्जा जोगा विराहिया तत्थ भवतित्ति आवस्सियाए गहणं, दिवसे भवो, देवसियग्गहणेण राइयोवि गहितो, ताहे आयरिओ भणति—अहमवि खामेमि तुमे, पच्छा एगनिक्खमणं निक्खमती, सीसो ताहे भणति—पडिक्कमामि खमासमणाणं देवसियाए आसायणाए इत्यादि यावत् वोसिरामि, एवं पुणोऽवि इच्छामि खमासमणो तहेव जाव वोसिरामित्ति" आव० चू० अध्य० ३ पत्र ३६९, इह द्वितीयवंदने निष्क्रामवर्जः सर्वोऽपि विधिः प्रथमवन्दनवदुक्तोऽस्ति आवस्सियाए इतिपदं च करणमार्गानागतत्वान्न भण्यते द्वितीयवन्दने,यदुक्तं प्रत्याख्यानभाष्ये 'तह मज्झपच्चक्खाणेसु तंपिहु सुरुग्गयाइ वोसिरइ। करणविहिओ न भण्णइ जह आवसियाइ बिअछंदे ॥९॥ एवं खामइत्ता पुणो तत्थट्ठिओ चेव अद्धावणयकाओ एवं भणइ—इच्छामि खमासमणो ! इच्चाइ सव्वं सुत्तं आवस्सियाविरहियं पायपडिओ चेव भणइ"त्ति वंदनचूर्णौ श्रीयशोदेवकृतायां, एवं च 'तत्रस्थ एवार्द्धावनतकायः पुनरेवं भणति—इच्छामि खमासमणो इत्यारभ्य यावद्वोसिरामीति, परमयं विशेषः—अवग्रहाद् बहिर्निष्क्रमणरहित आवश्यकीविरहितं दंडकसूत्रं पठति' योग० शा० वृत्तौ,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





करणमार्गाणामकरणे च महदसमंजसमापद्यते, तथाहि--सूरे उग्गए उग्गए सूरे इत्यस्य वा वोसिरईत्यस्य च भणनं पौरुष्येकासननिर्विकृतिकादिप्रत्याख्यानेषु प्रत्येकं प्रसज्येत, यदुक्तमावश्यकवृत्तौ प्रत्याख्यानसूत्रे 'सूरे उग्गए नमुक्कारसहियं पच्चक्खाइ चउव्विहंपि आहारं असणं ४ अन्नत्थ० सहसा० वोसिरई'ति, पौरुसिं पच्चक्खाइ उग्गए सूरे चउव्विहं० असणं० अन्नत्थ० सहसा पच्छन्न० दिसा० साहु० सव्व० वोसिरामि' पुरिमार्द्धे चेदं सूत्रं 'सूरे उग्गए' इत्यादि,'एकासण'मित्यादि चउ० अन्न० सह० सागा० आउं० गुरु० पारि० महा० सव्व० वोसिरइ' 'निव्विगतियं पच्चक्खाति'इत्यादि अन्न० सह० लेवा० गिह० उक्खि० पडु० पारि० मह० सव्व० वोसिरइ' आव० वृत्तौ, "नमुक्कारं पच्चक्खाति सूरे उग्गए चउव्विहंपि आहारं असणं ४" आव० चू०,एतावंति प्रत्याख्यानसूत्रवृत्तौ चूर्णा च साक्षाल्लिखित्वा व्याख्यातानि सन्ति, एषु नमस्कारसूत्रे विधाऽस्ति, एकासननिर्विकृतिप्रत्याख्यानयोश्च इत्याद्येवंरूपशब्दाकृष्टत्वादादौ उग्गए सूरेत्तिपदं लभ्यते, एवं सति यदि करणविधिं परित्यज्य एकशोऽपि क्रियमाणानां सर्वप्रत्याख्यानानामन्ते प्रत्येकं वोसिरइ इतिपदं कथयिष्यते तर्हि आदौ प्रत्येकं उग्गए सूरे इतिपदं निर्विकृतिकादेकासनस्य पूर्वभणनं नमस्कारसहितस्य वा नियतसूत्रत्वं प्रसज्यते विकृतिप्रत्याख्यानोच्चाराद्यभावश्चेति, तथा 'दो चेव नमुक्कारे०' १ 'सत्तेगट्ठाणस्स०' २ 'पंच चउरो अभिग्गहिय०' ननु निर्विकृतिक एवाकाराभिधानाद्विकृतिप्रमाणप्रत्याख्याने कुत आकारा अवगम्यंते?,उच्यते, निर्विकृतिकग्रहणे विकृतिपरिमाणस्यापि संग्रहो भवति, त एव चाकारा भवन्ति, यथा एकासनस्य पौरुष्याः पूर्वार्द्धस्यैव च सूत्रेऽभिधानेऽपि द्व्यासनकस्य सार्द्धपौरुष्या अपार्द्धस्य च प्रत्याख्यानमदुष्टं, अप्रमादवृद्धिसंभवात्, आकारा अप्येकासनादिसंबंधिनः एव न्यायाः, आसनादिशब्दसाम्यात्, चतुर्विधाहारपाठेऽपि द्विविधत्रिविधाहारप्रत्याख्यानवत्, ननु द्व्यासनादीन्यभिग्रहप्रत्याख्यानानि तेषु चत्वार



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





एवाकाराः प्राप्नुवन्ति, न, एकासनादिभिस्तुल्ययोगक्षेमत्वात्, अन्ये तु मन्यन्ते—एवं हि प्रत्याख्यानसंख्या विशीर्येत तत एकासनादीन्येव प्रत्याख्यानानि, तेषु चत्वार एवाकाराः प्राप्नुवन्ति, अशक्तस्तु यावत्सहिष्णुस्तावत्पौरुष्यादिकं प्रत्याख्याति, तदुपरि ग्रन्थिसहितादिक"मिति योगशा० तृ० प्रका० वृत्तौ, द्व्यासनादिष्वभिग्रहप्रत्याख्यानत्वमभ्युपगम्य यदि चत्वारः चत्वार एवाकाराः कथ्यन्ते तदाऽऽकुंचनादौ तद्भंगः स्यादिति,'पंच चउरो अभिग्गह' इति वचनात्, अभिग्रहप्रत्याख्यानेऽधिककरणं चायुक्तमिति सम्यग्विचार्यते, तथा चूर्णौ वृत्तौ च द्वितीयवंदनविधेरसदृग्वादिसंवाददोषो न आशंकनीयः, यतः आगमे द्रव्यक्षेत्रादीनि तानि तानि बहुश्रुतावगम्यानि कारणानि प्रतीत्य क्वापि क्वापि कस्मिन्नप्यनुष्ठानेऽनेकधा विधिरुपलभ्यते,तथाहि—उद्देस समुद्देसे सत्तावीसं अणुण्णवणियाए। अट्ठेव य ऊसासा पट्ठवण पडिक्कमणमादी ॥१॥ अण्णे भणंति—कालगिण्हणे पट्ठवणे य पंच उस्सासा, कालपडिक्कमणे सुयस्कंधपरियट्टणे य एतेसु अट्ठ" आव० चू० पत्र ४८३ 'थोवाव'गाहा, उत्तराहुत्तो—उत्तरामुखः दंडधारीवि वामपासे रिजुतिरियदंडधारी पुव्वाभिमुहो ठायति कालग्गहणनिमित्तं च अट्ठुस्सासकालियं काउस्सग्गं करेति, अन्ने पंचुस्सासियं करिंति" निशी० चू० उ० १९ पत्र २२४, आव० चू० च पत्र ४६४,'ठागस्सासति बिंदू गिण्हइ बिट्ठोऽवि पच्छिमं कालं। पडियरइ बाहि एगो एगो अंतट्ठिओ गिण्हे ॥१॥ जति वसहिस्स बाहिं कालगाहिस्स ठाओ नत्थि ताहे अंतो छन्ने उद्धट्ठिओ गिण्हइ इत्यादि, एस पाभाइए गच्छुवग्गहट्ठा अववादविही, सेसा काला ठागासती न घित्तव्वा, आइन्नओ वा जाणियव्वं" निशी० चू० उ० १९ आव० चू० च, इति द्वितीयवंदनविधिप्रत्याख्यानादिविचारः १७॥

इह नमस्कारेऽष्टषष्ट्यक्षरप्रमाणत्वं सप्तषष्ट्यक्षरप्रमाणत्वं चापि रूढं दृश्यते,परमष्टषष्ट्यक्षरत्वमागमे दृश्यते, न तु सप्तषष्ट्यक्षरत्वं,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अत्रावश्यकाभिप्रायेण सप्तषष्ट्यक्षरप्रमाणमस्ति, नैवं,तथाहि–'तत्थ नेगमो अणेगविहो, तत्थ आदिनेगमस्स अणुप्पन्नो, कहं ?, जहा पंच अत्थिकाया निच्चा एवं नमुक्कारोऽवि न कयाइ नासी एस केणइ उप्पाइएत्तिकट्टु, जदा हि भरहेरवएहिं वुच्छिज्जति तयावि महाविदेहे अवुच्छिन्नो" आव० चू० सो पुण नमुक्कारो कति पदानि छ वा दस वा, तत्थ छप्पयाणि नमो अरहंताणं नमो सिद्धाणं नमो आयरियाणं नमो उवज्झायाणं नमो सव्वसाहूणं एते छप्पया, इमाणि दस पदाणि–नमो अरहंताणं नमो सिद्धाणं एवं दस" आव० चू०, तथा नमस्कारनिर्युक्तौ 'अरिहंतनमोक्कारो जीवं मोएइ भवसहस्साओ' इत्यादिका नमस्कारमाहात्म्यप्रतिपादिका एकविंशतिर्गाथाः सन्ति, परं तासां मध्यादेकाऽपि नमस्कारावयवतया नवरा(व्याख्या)सु साक्षात् प्रोक्ता न दृश्यते, तथाऽऽवश्यकसूत्रनिर्युक्तिचूर्ण्यादिषु लोए इति पदं च न दृश्यते, अत आवश्यकाभिप्रायेण निर्युक्तिरूपत्वेन 'एसो पंचे'त्यादिगाथापि नमस्कारसूत्रसंबन्धिनी कथं स्यात् ?, तत आवश्यकाभिप्रायेण सप्तषष्ट्यक्षरत्वं नमस्कारस्येतिवचनं युक्तिरिक्तं, ग्रामो नास्ति कुतः सीमेति न्यायात्, ननु नमस्कारनिर्युक्तिस्था 'एसो पंचे'त्यादिगाथा नमस्कारान्ते पठ्यते माहात्म्यप्रकाशिका शुभप्रणिधानहेतुश्चेयमितिकृत्वा, एवं चेत्तदा द्वित्र्यादिसंख्या अपि नमस्कारनिर्युक्तिस्थाः किं न पठ्यंते नमस्कारमाहात्म्यप्रकाशनाविशेषात्, तथा शुभप्रणिधानहेतुत्वात् नमो तित्थस्स नमो चउवीसाए तित्थयराणं उसभाइमहावीरपज्जवसाणाणं, तित्थयरे भगवंते, इत्यादीन्यपि यथावसरं नमस्कारांते किं न पठ्यते, अपरं च–आवश्यकादर्शेषु हवइ होइ इति पाठद्वयमपि दृश्यते, तथोपांगच्छेदग्रन्थकर्मग्रन्थाद्यनेकागमानुयोगसूत्रधारैः श्रीमलयगिरिभिरावश्यकं विवृणद्भिः 'अरहंतनमुक्कारो'इत्यादिका 'एसो पंचे'तिपर्यन्ताः षड् गाथाः 'हवइ मंगल'मिति पाठत एव लिखिताः सन्ति, छन्दोभंग एवमिति च नाशंक्यं, यत आगमे नवाक्षरैकपदानां छंदसां बहूनामपि दृश्यमानत्वात्,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तथाहि–'जहा दुमस्स पुप्फेसु भमरो आवीयइ रसं।' अहं च भोगरायस्स,तं चसि अंधगवण्हिणो' 'जहा से कंबोयाणं,आइन्ने कंथए सिया। आसे जवेण पवरे, एवं हवइ बहुस्सुए ॥ एकादशोत्तराध्ययने नवाक्षरैतत्पदपर्यन्ताः १४ गाथाः सन्तीति,तथा नमस्कारस्य सप्तषष्ठ्यक्षरत्वप्रमाणत्वं मूलसूत्रनिर्युक्तिभाष्यचूर्णिवृत्तिटिप्पनकादिषु क्वापि निर्दिष्टं न दृश्यते न श्रूयते च, अष्टषष्टिवर्णप्रमाणत्वं महानिशीथादिषु स्पष्टमेव, तथाहि–'तहेव तदत्थाणुगमियं इक्कारसपयपरिच्छिन्नं तिआलावगं तित्तीसक्खरपरिमाणं एसो पंचनमुक्कारो,सव्वपावपणासणो । मंगलाणं च सव्वेसिं,पढमं हवइ मंगलमिय चूलत्ति अहिज्जंती''ति महानि०,तथा 'एयं तु जं पंचमंगलमहासुयस्कंधस्स वक्खाणं तं महया पबंधेण अणंतगमपज्जवेहिं सुत्तस्स य पिहुब्भूयाइं निज्जुत्तिभासचुण्णीसु, इओ य वच्चंतेणं कालसमएणं महड्ढिपत्ते पयाणुसारी वयरसामी नाम पुव्वदसंगसुयहरे समुप्पन्ने तेणेसो पंचमंगलसुयक्खंधस्स उद्धारो मूलसुत्तस्स मज्झे लिहिओ'' इति महानि०,तथा **नवकारपंजिकासिद्धचक्रादौ** पंचपयाणं पणतीस वण्ण चूलाइ वण्ण तेत्तीसं । एवं इमो समप्पति फुडमक्खर अट्ठसट्ठीए ॥१॥ तथा **अष्टप्रकाश्यां** आग्नेयादिविदिग्व्यवस्थितेषु दलेषु चूलापादचतुष्कं एसो पंच नमुक्कारो ३ पढमं हवइ मंगलमिति ध्यायेत्, तथा **बृहन्नमस्कारफले** 'सत्त पण सत्त सत्त य नवक्खरप्पमाण पयडपंचपयं । तित्तीसक्खर मूलं सुमरह नवकारवरमंतं ॥१॥ इत्याद्यनेकानि स्थानानि अष्टषष्टिवर्णात्मकनमस्कारदर्शकानि, तथा भगवत्या आदौ नमस्कारपदान्येवं दृश्यन्ते, तथा 'नमो अरिहंताणं नमो सिद्धाणं नमो आयरियाणं नमो उवज्झायाणं नमो सव्वसाहूणं, नमो बंभीए लिवीए, क्वचिन्नमो लोए सव्वसाहूणं पाठ इति तद्वृत्तिः, इहावश्यकचूर्णौ पंचविंशतिस्त्रयस्त्रिंशद्वा वर्णा नमस्कारे दृश्यन्ते,भगवत्यादिमंगलस्थाने सार्वत्रिकपाठाभिप्रायेण तु पंचत्रिंशत् महानिशीथादिषु अष्टषष्टिरिति, परमेतेष्वन्येष्वपि ग्रंथेषु सप्तषष्टिवर्णप्रमाणत्वं न दृश्यते, अतो



For Private And Personal Use Only

महानिशीथागमं ये न प्रतिपद्यंते तेषामभिप्रायेण नमस्कारे 'एसो पंचे'त्यादिचूलिका न सिद्धान्तोक्ता, ततश्च नमस्कारे होइ मंगलमिति पाठः सिद्धान्तोक्त इत्यभ्युपगमो युक्तिरिक्त इति **नमस्कारविचारः** १८ ॥

१९ **पौषधे भोजनं**–पोसहोववासो चउव्विहो–सरीरसक्कारपोसहो देसे सव्वे य, देसे अमुगं ण्हाणादि न करेति, सव्वे ण्हाणमद्दणवन्नगविलेवण पुष्फगंधाणं वत्थाभरणाण य परिच्चातो, अव्वावारपोसहो नाम देसे सव्वे य, देसे अमुगं वावारं ण करेमित्ति, सव्वे ववहारसेवाहलसगडघडपरिकम्ममाइया न कीरंति, बंभचेरं २ दिवसे दिवारत्तिं वा इक्कसिं वा दो वा, सव्वे अहोरत्तं बंभयारी, आहारे २ देसे अमुगा विगई आयंबिलं वा इक्कसिं वा दो वा सव्वे चउव्विहा आहाराई अहोरत्तं, जो देसेण पोसहं करेइ सो सामाइयं करेति वा नवा, जो सव्वपोसहं करेति सो नियमात्करोति इहरा वंचिज्जति' आ०चू०, सामायिकाविरुद्धाहारादिदेशपौषधे सामायिकं करोति, नापरे, आहारपोसहो खलु सरीरसक्कारपोसहो चेव। बंभव्वावारेसु य तइयं सिक्खावयं नाम ॥१॥ देसे सव्वे य तहा इक्किको इत्थ होइ नायव्वो। सामाइए विभासा देसे इयरंमि नियमेण ॥२॥" श्रावकप्रज्ञप्तौ, तथा योगशास्त्रे 'चतुष्पर्व्यां चतुर्थादी'ति श्लोकवृत्तौ श्रीहेमसूरिः स्वोपज्ञायां–"द्विविधं हि पौषधव्रतं–देशतः सर्वतश्च, तत्राहारे पौषधो देशतो विवक्षितविकृतेराचाम्लस्य वा सकृदेव द्विरेव वा भोजनमिति, सर्वतस्तु चतुर्विधस्याप्याहारस्याहोरात्रं यावत् प्रत्याख्यान"मित्यादि, तथा पौषधं–पुष्टिं कुशलधर्माणां धत्ते यदाहारत्यागादिकमनुष्ठानं तत् पौषधं तेनोपवसनं–अवस्थानमहोरात्रं यावदिति पौषधोपवास इति, अथवा पौषधं–पर्वदिनमष्टम्यादि तत्रोपवासः–अभक्तार्थः पौषधोपवास इति, इयं व्युत्पत्तिरेव, प्रवृत्तिस्त्वस्य शब्दस्य आहारशरीरसत्काराब्रह्मचर्यव्यापारपरिवर्जनेष्विति" समवा०, आहारादिपरिवर्जनं चावश्यकचूर्ण्यादिषु देशसर्वभेदेन द्विधा साक्षादेवोक्तमस्ति, देशसर्वविशेपत आहारादिचतु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१९ पौषधे भोजनविचारः

ष्पदानामेकद्व्यादिसंयोगजा अशीतिर्भङ्गा भवन्ति, तेषां मध्ये सांप्रतं केऽपि श्रावकैः स्पष्टमस्वीक्रियमाणा अपि एकादशव्रतरूपा एव, आगमप्रामाण्यात्, तथा पौषधव्रताधिकारे 'तं सत्तिओ करिज्जा तवो उ जो वन्निओ समणधम्मे। देसावगासिएण व जुत्तो सामाइएणं वा ॥१॥ आव०चू०,श्रमणधर्मे चैवं तपो वर्णितं पूर्वमत्रैव ग्रन्थे-साहुणा य किर चिंतेयव्वं-छम्मासखवणं जाव करेमि ?, न करिज्जा, एगदिवसेण ऊणगं करेउ, जाव मास पंच ५४३२१ अद्धमासो चउत्थं आयंबिलं एवं एगट्ठाणं इक्कासणं पुरिमड्ढं निव्वीयं पौरुसी नमुक्कारोत्ति, अजत्तणगाउ किर कह्लं जोगवड्ढी कायव्वा, एवं वीरियायारो न विराहिओ भवइ, अण्णे भणंति, एवं चिंतेयव्वं-किं मए पच्चक्खायव्वं ?, जदि आवस्सगमाइयाणं जोगाणं सक्केति संथरणं काउं तो अब्भत्तट्ठं.[असति] असक्किंतो पुरिमड्ढायंबिलेगट्ठाणे, असक्किंतो निव्वीयं, असक्किंतो पोरसिमाइविभासा'' कायोत्सर्गनि० चू०, यद्वा दसविहे समणधम्मे इत्यत्र तवो दुविहो-बज्झो अब्भंतरो य, जहा दसवेयालिए' आव० चू०, तथा 'जदि देसओ आहारपोसहिओ भत्तपाणस्स गुरुसक्खियं पारावित्ता आवस्सइं करित्ता इरियासमिइए गंतुं घरं ईरियावहियं पडिक्कमइ आगमणालोयणं करेइ चेइए वंदेइ,तओ संडासयं पमज्जित्ता पाउंछणं निसीयइ, भायणं पमज्जइ, जहोचिए य भोयणे परिवेसिए पंचमंगलमुच्चारेइ,पच्चक्खाणं,तओ वयणं पमज्जित्ता असुरसुरं अचवचवं अदुयमविलंबियं अपरिसाडिं मणवयणकायजुत्तो भुंजइ साहुव्व उवउत्तो, जायामायाए भुच्चा फासुयजलेण मुहसुद्धिं काउं नवकारसरणेण उट्ठाइ, देवे वंदइ, वंदणयं दाउं संवरणं काऊण पुणोऽवि पोसहसालाए गंतुं सज्झायंतो चिट्ठइ'' श्रावकप्रतिक्रमणचूर्णौ श्रीविजयसिंहाचार्यकृतायां, पंचाशकादिष्वप्यनेकेषु ग्रन्थेषु पौषधद्वैविध्यमस्ति, तथा पौषधोच्चारणदंडके सव्वओ इति पदानि देशापेक्षाणि 'पढमे भंते! महव्वए अब्भुट्ठिओमि सव्वाओ पाणाइवायाओ' इत्यादिवत्, अन्यथा व्यवच्छेद्याभावे तत्प्र-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





योगाभावप्रसंगात्, तथा भगवत्यादौ तुंगिकानगरीश्रावकवर्णकादौ 'पडिपुन्नं पोसहं संमं अणुपालेमाणा' सूत्रं 'पडिपुन्नं पोसहं'ति आहारादिभेदाच्चतुर्विधमपि वृत्तिः, अत्रापि परिपूर्णशब्दोऽपरपौषधभेदं साक्षादाक्षिपति, 'जे भिक्खू असणादी दिज्जा गिहि अहव अन्नतित्थाणं। सो आणा अणवत्थं मिच्छत्त विराहणं पावे ॥१॥ जे भिक्खू वत्थाई दिज्जा गिहि अहव अण्णतित्थाणं। पडिहारियं च तेसिं पडिच्छए आणमाईणि ॥२॥ सव्वेवि खलु गिहत्था परप्पवादी य देसविरया य। पडिसिद्धदाणकरणे ममणे परलोगकंखिंमि ॥३॥ जुत्तमदाणमसीले कडसामइओ उ होइ समण इव। तस्स न जुत्तमदाणं चोदग! सुण कारणं तत्थ ॥४॥ कामी सघरंगणओ थूलपइन्नासु होति दट्ठासु। छेदणभेदणकरणे उद्दिट्ठकडंपि सो भुंजे ॥५॥ त्ति, कडसामाइओऽवि सो सव्वविरओ न लब्भति, किंचान्यत्–'कामी' गाहा, पंच विसया कामेइत्ति कामी, सह गृहेण सगृहः अङ्गना–स्त्री सह अंगनया सांगनः थूलपतिन्ना–देसविरतित्ति वुत्तं भवति, साहूणं सव्वविरती, वृक्षादिच्छेदने पृथिव्यादिभेदने च प्रवृत्तः सामायिकभावादन्यत्र, जं च उद्दिट्ठकडं तं कडसामाइयओवि भुंजति, एवं सो सव्वविरतो न भवति, एतेण कारणेण तस्स न कप्पति दाउं'' नि० भा० चू० उ० १५, अशनादिवस्त्रादिदाननिषेधसूत्रद्वयानन्तरं नोदककृतप्रसंगापोहाय कामीत्यादिगाथोक्तानि कृतसामायिकगृहीत्यादिविशेषणानि हेतुसूत्राणि, तेन उद्दिट्ठकडंपि सो भुंजे इत्यत्र वस्त्राशनादीनां ग्रहणं स्यात् सर्वेषामपि उद्दिष्टकृतानां, 'तं सत्तिउ करिज्जा' इत्यादि आव० चू०, अतो देशपौषधे सामायिकभावेऽपि यथोक्तविधिना भोजनमागमानुमतमेव दृश्यते ॥ **इति पौषधे भोजनविचारः १९॥**

**२० अपर्वपौषधः**–ननु 'चाउद्दसट्ठमुद्दिट्ठपुण्णिमासिणीसु पडिपुण्णं पोसहं' इत्याद्यावश्यकचूर्णिदशादिवचनात् अष्टम्यादिपर्वस्वेव पौषधः कार्यो, न शेषदिवसेष्विति, नायमेकान्तः, सुबाहुवादिभिर्दशभिः श्रावकैः पर्वान्यदिनेऽपि कृतत्वात्, तथाहि–'तते णं से सुबाहुकु-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





मारे अण्णदा कदाइ चाउद्दसट्ठमुद्दिट्ठपुण्णिमासिणीसु जेणेव पोसहसाला तेणेव उवागच्छति २ पोसहसालं पमज्जति २ उच्चारणपासवणभूमिं पडि० दब्भसंथारं संथरति २ दब्भसंथारं दुरुहति २ अट्ठमभत्तं पगिण्हति २ पोसहसालाए पोसहिए अट्ठमभत्तिए पोसहं पडिजागरमाणे विहरति' विपाकांगद्वितीयश्रुतस्कंधेऽध्यय० १,न च 'अणागयमतिकंत'मिति प्रकारेणैषां पौषधत्रयं समर्थनीयं,सूत्रवृत्त्यादिषु क्वापि तथासमर्थनस्यानुपलंभात्, किंच यदि–पर्वान्यदिने पौषधकरणमविधिरेव स्यात्, तदाऽभयकुमारश्रीविजयादीनां तत्र कार्योत्पत्तौ कथं नामेष्टसिद्धिर्बभूव?, यतोऽविधिकरणे हि प्रत्युत प्रत्यपाय एव संभाव्यते,यथाऽकालस्वाध्यायकरणे इति,न चात्राभयकुमाराद्यधिकारे पौषधशब्दोऽभिग्रहमात्रवाचीति वाच्यं, दर्भसंस्तारादिपौषधविधेस्तत्र निर्विशेषं भणनात्, तथाहि–'एवं संपेहेइ २ जेणेव पोसहसाला तेणेव उवागच्छति २ पोसहसालं पमज्जति २ उच्चारपासवणभूमिं पमज्जति २ दब्भसंथारयं दुरूहइ २ अट्ठमभत्तं पगिण्हति २ पोसहसालाए पोसहिए बंभयारी जाव पुव्वसंगइयं देवं मणसि करेमाणे चिट्ठइ,तए णं तस्स अभयकुमारस्स अट्ठमभत्ते परिणममाणे पुव्वसंगइयस्स देवस्स आसणं चलइ'' प्रथमज्ञाते,''मंतीहिंवि सा वेसमणपडिमा पगतिसमग्गेहिं अभिसित्ता,सेविज्जए राओवयारेण, सिरिविजओवि दब्भसंथारोवगओ सत्तरत्तं परिचत्तारंपरिग्गहो बंभयारी संविग्गो पोसहं पालेइ, सत्तमे य दिवसे समंतओ मेहा पाउब्भूया सलिलभारगया पवणवेगपवित्थरमाणा विज्जुज्जोवियपासा भयजणणा निट्ठुरगज्जियस्सणा, ततो मज्झण्हकाले महया सद्देण पासायं वेसमणपडिमं च चुण्णयंती इंदासणी पडिया, राया अहिनंदिओ पगईहिं, नमो अरिहंताणंति भणिउं निग्गओ पोसहसालाउत्ति, दिट्ठो य तुट्ठेण परिजणेण'' वसुदेवहिंडौ,अत्र च श्रीविजयसेनेन सप्तमेऽह्नि प्रातरगृहीतपौषधेन पूर्वदिनगृहीतपौषधेनैव पूर्वदिनगृहीतः पौषधो मध्याह्ने पारितः इत्यपि वचनं न यौक्तिकं,यतः पूर्वदिन गृहीतपौषधस्य मध्याह्ने पारणं न



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





दृश्यते इति, 'सव्वेसु कालपव्वेसु पसत्थो जिणमए तहा जोग्गो। अट्ठमिपन्नरसीसुं नियमेण हविज्ज पोसहिओ ॥१॥ आव० चू०, इहोपलक्षणत्वाच्चतुर्दश्यपि ज्ञेया, यत आगमे पौषधालापकाश्चतुर्दशीरहिताः प्रायो न दृश्यन्ते, अत्र गाथायामेषु पर्वसु नियमेन पौषधाभिधानात् शेषदिवसेष्वनियमेन पौषधग्रहणमायातीति दृश्यते इति पर्वान्यदिवसेष्वपि पौषधग्रहणविचारः २० ॥

**२१ आचरणाप्रामाण्यं**—इह गच्छभेदेन काश्चन सामाचार्यः,परस्परं काश्चित् २ भिन्ना उपलभ्यन्ते ता अपि नाप्रमाणं, आचरणालक्षणोपेतत्वात् ,यदुक्तं "असढेण समाइण्णं जं कत्थइ कारणे असावज्जं। न निवारियमन्नेहि य बहुमणुमयमेयमाइन्नं ॥१॥" अशठेन-रागद्वेषरहितेन कालिकाचार्यादिवत् प्रमाणस्थेन सता समाचीर्णं—आचरितं यद्भाद्रपदचतुर्थीपर्युषणावत् कुत्रचित्—द्रव्यक्षेत्रकालादौ कारणे—पुष्टालंबने असावद्यं—प्रकृत्या मूलोत्तरगुणाराधनयोरबाधकं न च—नैव निवारितमन्यैस्तथाविधैरेव तत्कालवर्तिभिर्गीतार्थैः,अपि तु बहु—यथा भवत्येवमनुमतमेतदाचीर्णमुच्यते" कल्पवृत्तौ उ० ३ खंडे ३ पत्र १३ 'अत्थि णं च समणावि निग्गंथा कंखामोहणिज्जं कम्मं वेइंति?,हंता अत्थि,कहंनं भंते! समणा निग्गंथा कंखामोहणिज्जं कम्मं वेइंति?,गो० तेहिं तेहिं नाणंतरेहिं दंसणंतरेहिं चरित्तंतरेहिं लिंगंतरेहिं पवयणंतरेहिं कप्पंतरेहिं मग्गंतरेहिं मयंतरेहिं भंगंतरेहिं नयंतरेहिं नियमंतरेहिं पमाणंतरेहिं संकिया कंखिया विचिगिच्छिया भेयसमावन्ना,एवं समणा निग्गंथा कंखामोहणिज्जं कम्मं वेइंति" वृत्त्येकदेशो यथा—तथा प्रवचनमधीते वेत्ति वा प्रावचनः—कालापेक्षया बह्वागमः पुरुषस्तत्र एकः प्रावचनिक एवं कुरुते अन्यस्त्वेवमिति, समाधिश्चेह चारित्रमोहनीयक्षयोपशमविशेषेण उत्सर्गापवादादिभावितत्वेन च प्रावचनिकानां विचित्रा प्रवृत्तिरिति नासौ सर्वथापि प्रमाणं, आगमाविरुद्धप्रवृत्तेरेव प्रमाणत्वादिति, तथा मार्गः—पुर्वपुरुषक्रमागता सामाचारी, तत्र केषांचित् द्विश्चैत्यवंदनानेकविधकायोत्सर्गकरणादिकाऽऽवश्यकसामाचारी, तदन्येषां तु न



For Private And Personal Use Only

तथेति किमत्र तत्त्वमिति, समाधिश्च गीतार्थाशठप्रवर्तिताऽसौ सर्वाऽपि न विरुद्धा, आचरितलक्षणोपेतत्वाद्, आचरितलक्षणं चेदं– 'असढेण समाइण्णं जं कत्थइ केणई असावज्ज'मित्यादि भग० शत० १ उ० ३ प० ३३। जो जं आवण्णो तवं छेदं वा तं वा तं दाउं चक्कवालसामायारी कहेयव्वा, किं कारणं ?, अवगीतसुतधराणं चोदिज्जंताण मा हु अचियत्तं। मेरासु त पत्तेयं मा संखड पुव्वकरणेणं ॥१॥ जे गीतत्था बहुस्सुया गणिणो वायगा वा तेसिं मा पडिचोइज्जंताणं अचियत्तं होहित्ति,अण्णेसिं गच्छाणं पत्तेयं २ काओवि सामायारीओ अण्णारिसाओ ताहे पुव्वब्भासेणं ते सामायारिं करिंताणं मा पडिचोदियाणं असंखडं होज्ज तेण अप्पणिज्जिया मेरा कधिज्जति'' कल्पभाष्यचूर्णौ प० १३३, जद्दिवसं उवट्ठातितो तद्दिवसं केसिंचि अभत्तट्ठो भवति केसिंचि आयंबिलं केसिंचि निव्वीयं केसिंचिवि न किंचि, जस्स वा जं आयरियपरंपरागयं छट्ठट्ठमादियं कराविज्जति, मंडलिसंभोगट्ठा सत्त आयंबिले काराविज्जति निव्वितिए वा जस्स वा जं परंपरागयं'' निशी० चू० उ० ११, ''आचार्यपरम्परात इदानीमपि तथाऽधिगमो भवति, न चाचार्यपरम्परा न प्रमाणं, अविपरीतार्थव्याख्यातृत्वेन तस्याः प्रामाण्यस्यापाकर्तुमशक्यत्वात्, अपिच–भवद्दर्शनमपि किमागममूलमनागममूलं वा ?, यद्यागममूलं तर्हि कथमाचार्यपरंपरा न प्रमाणं, आचार्यपरम्परामन्तरेणागमार्थस्यावबोद्धुमशक्यत्वात्, अथानागममूलं तर्हि अप्रमाणमुन्मत्तकविरचितदर्शनवत्'' नन्दिवृत्तौ, ननु यद्याचार्यपरम्परागता सामाचारी प्रमाणीक्रियते तदा पार्श्वस्थयथाछंदादिप्रवर्तिताऽपि कस्मान्न प्रमाणम् ?,उच्यते, आचरणालक्षणाभावात्, तदभावश्चाशुद्धपिण्डादिग्रहणादीनां साक्षात्सावद्यत्वात् केषांचित्,न च सा प्रमाणमशठत्वासंभवात्,तथाहि–आगमे अष्टम्यादौ चैत्यावन्दने प्रायश्चित्तमिति भावार्थे सति शतपद्यां चतुर्दशे विचारे साधूनां पर्वस्वेव चैत्यवन्दनमिति १, ललितविस्तरादौ कायोत्सर्गचतुष्टयादिप्रकारेणावश्यकचूर्ण्यादौ वर्द्धमानस्तुत्यजि-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तशान्तिस्तवादिभिश्च चैत्यवन्दनविधिदर्शनेऽपि पञ्चदशे विचारे आगमे यतीनां स्तुतित्रयेणैव चैत्यवन्दनोक्तेति २ आवश्यकचू-
र्ण्यादावौपग्रहिकरजोहरणादीनि साक्षादुक्तान्युपलभ्य श्रावकाणां पंचविधाभिगमेन प्रवेशदर्शनाद्विंशतितमविचारे कृतसामायिक-
पौषधानां वस्त्रांचलेनैव प्रमार्जनमिति ३ आवश्यकचूर्ण्यादौ कृष्णादिवंदनाधिकारे मुखानंतकवस्त्रांचलयोर्नामग्राहमनभिधाने तुल्ये
विंशतितमे विचारे अत्र मुखपोतिप्रत्युपेक्षणस्याभावात् कृष्णो वस्त्रांचलेनैव वंदनकं कृतवानिति, अत्रैव विचारे प्रदेशिवरुणदृढध-
र्मढड्डरादीनामंचलग्रहणे क्वाप्यागमे साक्षाददृश्यमानेऽपि तद्ग्रहणविषया बहवोऽवधारणप्रयोगाः सन्ति ४ सूत्रकृदंगवृत्तिआवश्यक-
वृत्तिद्वितीयचरवरिकाटिप्पनसूरिमंत्रकल्पादिषु तदुपलंभेऽपि अष्टत्रिंशत्तमविचारे कल्याणकान्यागमे तावन्न विधिवादे नापि चरि-
तानुवादे न वा क्वापि दृश्यन्ते इति ५, आगमे अनवस्थितातिचारस्य तत्क्षणपारणे यथाकथंचित्करणरूपत्वोपदेशेऽपि एकोनचत्वारिं-
शत्तमे अनवस्थितसामायिकस्य निषेधात् तद् द्विसन्ध्यमेव विधेयमिति ६ पट्षष्टितमे विचारे साधूनां पर्वसु भोजनानुज्ञायै श्रावका-
णामावश्यकचूर्ण्याद्युक्तं देशभोजनं दृष्टान्तीकृतं,षट्त्रिंशत्तमे विचारे कथं चातुर्मासिकपाक्षिकेण श्रावकाणां पौषधभोजननिषेध उक्तः ?
७ आगमे क्वापि पाक्षिकस्य पञ्चदश्यां साक्षादनुपलम्भेऽपि द्वादशाधिकशतसंख्यविचारे कथं चातुर्मासिकपाक्षिके न चतुर्दश्यामिति ?,
उच्यते, आगमे पञ्चदश्यामेव तयोर्भणनादिति, जीतव्यवहारेण पूर्वाचार्याचरणायाः प्रमाणितत्वाज्जिनाज्ञान्तर्भूतत्वेऽपि एकोत्तरश-
तविचारे कथं पूर्वाचार्याणामाचरणा न मन्यन्ते ?,सतां सा जिनाज्ञेव प्रमाणमिति इत्यादीनि बहूनि कान्यपि स्वरूपतोऽप्यागमेऽवर्त-
मानानि कान्यपि चादृश्यमानावधारणानि आगमपूर्वबहुश्रुताचरणोच्छेदकानि बहुधा सर्वपूर्वाचार्यपरिभवकारीणि शतपद्यादिषु नवी-
नकल्पितात्ममतस्थापनाय प्रयुक्तानि दृश्यन्ते,अत एषां वचनानां यो वक्ता स पूर्वापरासमीक्ष्यभाषी,सम्यग् अज्ञाते सति चावधार-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





णभाषी कथं नामाशठ उच्यते, यदुक्तं–"आलएणं विहारेणं, ठाणाचंकमणेण य। सक्का सुविहिआ नाउं, भासावेणइएण य ॥१॥ आलयो–वसतिः प्रमार्जितादिलक्षणः अथवा स्त्रीपशुपंडकविवर्जित इति तेनालयेन, नागुणवत एवं खल्वालयो भवति, विहारो–मासकल्पादिस्तेन विहारेण स्थानं–ऊर्ध्वस्थानं चंक्रमणं–गमनं स्थानं च चंक्रमणं चेत्येकवद्भावः तेन च, अविरुद्धदेशकायोत्सर्गकरणेन युगमात्रावनीप्रलोकनपुरःसराद्रुतगमनेन चेत्यर्थः शक्यः सुविहितो ज्ञातुं, भाषावैनयिकेन च विनय एव वैनयिकं समालोच्य भाषणेन आचार्यादिविनयकरणेन चेति भावना, नैतान्येवंभूतानि प्रायशोऽसुविहितानां भवन्तीति आव० वृत्तौ० अध्य० ३। तथा रात्निकपरिभाषी आचार्यादिपूर्वपुरुषपरिभवकारी, स चात्मानमन्यांश्चासमाधौ योजयत्येव ५ स्थविरा–आचार्यादिगुरवः तानाचारदोषेण शीलदोषेण च ज्ञानादिभिर्वोपहन्तीत्येवंशीलः स एव चेति स्थविरोपघाती 'अभिक्खं ओहारइत्त'त्ति अभीक्ष्णमवधारयिता शंकितस्याप्यर्थस्य निःशंकितस्येव एवमेवायमित्येवं वक्ता ११" समवायवृत्तौ, असमाधिस्थानकेषु 'अबहुस्सुएऽवि जे केइ, सुएणं पविकत्थई। सज्झायवादं वदति, महामोहं पकुव्वती ॥१॥ अबहुश्रुतश्च यः कश्चित् श्रुतेन प्रविकत्थते–आत्मानं श्लाघते, श्रुतवानहमनुयोगधरोऽहमित्येवं, अथवा कस्मिंश्चित्स त्वमनुयोगाचार्यो वाचको वेति पृच्छति प्रतिभणति–आमं, स्वाध्यायवादं वदति–विशुद्धपाठकोऽहमित्यादिकं च, स महामोहं श्रुतालाभहेतुं प्रकरोतीति" त्रयोविंशतितमसम० वृत्तौ, अतस्तेन तज्जातीयेनान्येन वा प्रवर्तिता सामाचार्येकाप्याचरणात्वेन न घटते अशठाचीर्णत्वासंभवात्, पूर्वपूर्वतरैः पाश्चात्यैश्च गीतार्थैरागमहृदयवेदिभिस्तेषु स्वोपज्ञग्रन्थेषु पर्वक्रमायातसामाचारीप्रामाण्यदर्शनेन तदुच्छेदकपुरुषकल्पितसामाचार्याः प्रामाण्यनिराकरणात्, श्रीहेमसूरिप्रमुखश्रीसंघेन नवीनकल्पस्याग्रहमपरित्यजतां पूर्णमतप्रपन्नानां निर्विषयकरणाच्च, न च तथाकरणे तस्य संघस्यानागमिकत्वं, यदुक्तं–"परिणामिय-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बुद्धीए उववेओ होइ समणसंघो उ। कज्जे निच्छयकारी सुपरिच्छियकारगो संघो ॥१॥ सुष्टु देशकालपुरुष्यौचित्येन श्रुतबलेन परीक्षितं सुपरीक्षितं तस्य कारकः संघो, न यथाकथंचनकारकः, किह सुपरिच्छियकारी ?–इक्कसि दो तिन्नि वावि पेसविए न निक्खिवए सहसा, को जाणइ नागतो केण?,एवं द्वौ त्रीन् वारान् मानुषे प्रेषितेऽपि तमनागच्छन्तं सहसा संघो न निक्षिपति–न संघबाह्यं करोति,केन कारणेन ?–नाऊण परिभवेणं नागच्छति जइ ततो उ निज्जूहणा। आउट्टे ववहारो एवं सुविणिच्छकारी उ॥१॥परिभवेन नागच्छतीति ज्ञात्वा तस्मिन्ननागच्छति ततः संघेन निर्यूहणा–निष्काशनं कर्तव्यम् , तस्मिन्नावृत्ते व्यवहारो दातव्यः, एवं सुविनिश्चितकारी,यस्तु भीतो नागच्छेत्तं प्रतीदं वक्तव्यम्–आसासो वीसासो सीयघरसमो य होइ मा भाहि। अम्मापिईसमाणो संघो सरणं तु सव्वेसिं ॥१॥ व्यव० भाष्यवृत्तौ पत्र ३४३ उ० ३. नन्वेकस्मिन्नेव गच्छे या काचित् सामाचारी दृश्यते सा कथं बहुमता स्यात्?, उच्यते. अन्यगच्छीया यद्यपि तां नाचरन्ति तथाप्यशठाचीर्णाचरणेयं प्रमाणभूतेति तां मन्यन्ते इत्येवं सापि बहुमता, परं पूर्वाचार्यपरंपरागतसामाचारीसमुच्छेदकैः प्रवर्तिता या सामाचारी तस्यां कस्याप्यागमरहस्याभिज्ञस्य नायं प्रत्ययः संभाव्यते यत् इयं आचरणालक्षणोपेता प्रमाणमिति **अशठाचीर्णसामाचारीप्रामाण्यविचारः २१ ॥**

**२२ महानिशीथप्रामाण्यं**:–महानिशीथस्य यदि प्रामाण्यं स्वीक्रियते तदा तदभिप्रायेणैव प्रायश्चित्तं किं न प्रदीयते ?,उच्यते,अधुना मन्दसत्त्वैः सत्त्वैः कल्पव्यवहारनिशीथमहानिशीथादीनामेकतरस्यापि ग्रन्थस्याभिप्रायेणैव प्रायश्चित्तानि यथावद्वोढुं न शक्यन्ते,अतः सर्वगच्छेषु जीतव्यवहारेण प्रायश्चित्तान्यनुचरन्तो दृश्यन्ते,तथा ननु निशीथादिभिः सहास्य कथं न विरोधो ? यतः एकस्मिन्नेवापराधे निशीथादीनामभिप्रायेणान्यत् प्रायश्चित्तं महानिशीथाभिप्रायेण त्वपरमेवोपपद्यते,तयोश्च महदन्तरं दृश्यते,अत्रोच्यते, एतद्ग्रन्थानां पूर्वाप-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रसूत्राभिप्राये परिज्ञाते सति विरोधगंधोऽपि नोपलभ्यते, तथाहि–अहवा सुत्तनिबंधो ओहो अत्थो य होइ ववहारो। अविसेसुत्तिव ओहो जो उ विसेसो स वित्थारो ॥१॥'' निशीथ भा० उ० २० पत्र ३३१ चू०, इह निशीथे सूत्रमात्रबद्धं ओघः यथाविवक्षित-सूत्रे तदुक्तापराधे मासगुरु, शेषश्चार्थविभागो यथा प्रथमपौरुष्यां विवक्षितापराधे मूलं द्वितीयायां छेदः तृतीयायां षड्गुरुः चतुर्थ्यां चतुर्गुरुः पञ्चम्यां मासगुरुः, एवं चेव सव्वसुत्तेसु जो अणुवाई अत्थो सोवि सव्वो विभागो, अथवा द्रव्यादिपुरुषैरविशेषितः स ओघः, द्रव्यादिविशिष्टं पुनः सर्वं विस्तारः, ओहेणित्थं सत्थाण सट्ठाणविभागओ य वित्थारो। चरणविसुद्धिनिमित्तं पच्छित्तं सुपु-रिसजाते य ॥१॥ तत्र ओघनिष्पन्नं स्वस्थानं यत् सूत्रे निबद्धं प्रायश्चित्तं प्रतिसूत्रं च करणकारणानुमतिरूपा सातिज्जणाए य, एतानि त्रीण्यपि प्रायश्चित्तान्योघोपनिबद्धानि, एताउ परं जं विभागेण दंसिज्जति सुत्तसुइयं सव्वं वित्थारो, एयंपि बहुविहं वन्नेन्तो जत्थ जत्थ सुत्तनिवाओ सोवि ओहो, सेसं वित्थारो, तं ओहविभागपच्छित्तं पडिसेवणापगारं जाणित्ता आयरियादिपुरिसविसेसं च जाणित्ता मालिण्णविसोहिनिमित्तं च दिंति, सुत्तभणिया अत्थभणिया वा जे अवराहपदा ते सव्वे वज्जणिज्जा, एस निच्छियत्थो निशीथचूर्णिरर्थः, एवं मासियं सेवित्ता उत्तरिएगुत्तरवुड्डीए दुतिचउजावपारंचियं पावइत्ति मण्णामि–किं चाहं मण्णे तहत्ति–तेण पगारेण मासियं प-डिसेवित्ता भिण्णमासादो हिट्ठाहुत्ति परिहाणी भवति जावपणगंति, अहवा पारंचियाओ हिट्ठाहुत्ती परिहाणी जाव पणगंति, तथा मासारुहअज्झवसाणट्ठाणा तट्ठिएण मासे पडिसेविए अपलिउंचिउं आलोएमाणस्स सट्ठाणंति–मासं चेव दिंति, अह आलोएइ पलि-उंचिउं दुमासादियाण जे अरुहा अज्झवसाणट्ठाणा तट्ठिएण मासो पडिसेविओ तो इत्थ दुमासतिमासेहिवि सुज्झिहिइत्ति ताहे जिणा-सुयववहारिणो वा गुरुवएसेण अहिगंपि दिंति पच्छित्तं' निशी० चू० उ० २० 'सचित्ते लहुगादी अभिक्खगमणंसि अट्ठहिं सपयं।



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सिन्हामीसेवुदए मासादी दसहिं चरिमं तु ॥१॥ निशी० भा० पीठे, एवं जे णं भिक्खू सुत्ताइक्कमेणं कालाइक्कमेणं आवासं कुव्वीज्जा तस्स णं कारणिगस्स मिच्छुकडं गोयमा! पायच्छित्तं उवदिसिज्जा, जे अ णं अकारणिगा तेसिं तु णं जहाजोगं चउत्थाइ उवएसेज्जा" महानि० प० २०१ किं बहुणा? जावइयाइं ति गालचिइवंदणादओ पायच्छित्तट्ठाणाइं पन्नत्ताइं तावइयं च णं पुणो विसेसेणं गोयमा! असंखेज्जहा पंनविज्जंति" महानि० पत्र २१० इत्याद्यनेकसूत्राणि, कियन्ति लिख्यन्ते?, अत एषां ग्रन्थानामभिप्रायेण एकस्मिन्नप्यपराधे मिथ्यादुष्कृतभिक्षादिपारांचितांतं प्रायश्चित्तं तत्पदविभागापेक्षया दृश्यते, सूत्रे तु एकमेव निबद्धमस्ति, अपरं च-अविय हु सुत्ते भणियं, सुत्तं विसमंति मा भणह, सुत्ते। एवं—संभवइ, न सो हेऊ अत्ता जेणालियं बूया ॥१॥" व्यव० पीठे निशीथे च उ० २०, नन्वत्र ग्रन्थे केचनाप्यर्था यथा दृश्यन्ते न तथाऽन्येषु, किमत्र तत्त्वं?, उच्यते, तत्तत्त्वं विशिष्टज्ञानवन्त एव विदन्ति, इतरैस्तन्निर्णयस्य कर्तुमशक्यत्वात्, दृश्यते चैवमन्यत्रापि यथा—व्याख्याप्रज्ञप्त्यां चतुरशीतिपदसहस्राणि पदाग्रेण—पदपरिमाणेन, इह च यत्रार्थोपलब्धिस्तत्पदं, मतान्तरेण तु अष्टादशपदसहस्रपरिमाणत्वादाचारस्य, एतद्द्विगुणत्वाच्छेषांगानां व्याख्याप्रज्ञप्तेर्द्विलक्षी अष्टाशीतिसहस्राणां पदानां भवति" इति सम० वृत्तौ, इह शीतलजिनस्य त्र्यशीतिर्गणा गणधराश्च उक्ताः, आवश्यके त्वेकाशीतिरिति मतान्तरमिदं सम० वृ०, तथा कल्पचूर्णौ आवश्यकचूर्णौ च समवसरणाधिकारे श्रमणा निषीदन्ति श्रमण्यः श्राविका वैमानिकदेव्यश्च न निषीदन्ति, शेषा नव सभा यथाक्रमं तिष्ठंतीत्युक्तं, आवश्यकवृत्तौ तु साध्व्यो वैमानिकदेव्यश्च न निषीदन्ति, केषांचिन्मतेन शेषदेवीत्रयमपि न निषीदति, शेषाः सप्त निषीदन्ति", भगवत्यां पुनः ९ शतके ३३ उ० देवानंदा ठिता चेवत्ति ऊर्ध्वस्थानस्थितैवानुपविष्टेत्यर्थः, तथा 'सासणभावे नाणं विउव्वगाहारगे उरलमिस्सं। नेगिंदिसु सासाणो नेहाहिगयं सुयमयंपि ॥१॥ षडशीतिके



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इत्यादि भूयांसोऽप्यर्था अल्पश्रुतानवगम्यविभागा आगमसमुद्रे दृश्यन्ते, तथा अस्य ग्रंथस्य निशीथादिवत् प्रामाण्यं पूर्वबहुश्रुतैः तेषु तेषु स्वोपज्ञग्रन्थेषु प्रतिपन्नमेव, तथाहि—इयाणिं पभुत्ति, पच्छित्ते दायव्वे पभुत्ति जोगोत्ति ओहिनाणजिणा । चौदसदस नवपुव्वी पकप्पधर कप्पधारी य ॥१॥ किं च–घिप्पंति चसद्देणं निज्जुत्ती सुत्तपेढियधरा य । आणाधारणजीए हुंति पभुणो अ पच्छित्ते ॥१॥ सुत्तधरा० निसीहकप्प०ववहारपेढ०गाहा, सुत्तधरा य अहवा सुत्तं धरंति सुत्तधरा जे महानिसीहं महाकप्पसुयादि अज्झयणे य धरंति, आणाव्ववहारी धारणाववहारी जीयववहारी य एते पच्छित्तदाणे पभुणो पभवंति'' निशी० चू०उ० २० पत्र ४७३ 'कप्पपकप्पा'गाहा, कप्पेति दसाकप्पववहारा पकप्पोत्ति निसीहं तुशब्दान्महाकप्पसुयं महानिसीहं निज्जुत्ती पेढियधरा य एवमादि सव्वे सुयववहारिणो'' निशी० चू० उ० २०, बहुरय पएस अव्वत्त समुच्छा दुगतिग अबद्धिगा चेव । सत्तेए निण्हया खलु तित्थंमि उ वद्धमाणस्स ॥१॥ एकेन समयेनेत्यादि सप्तैते अनन्तरोदिताः,उपलक्षणमेतत् तेनोपधानाद्यपलापिनोऽपि 'निण्हया खलु'त्ति तीर्थकरभाषितमर्थं मलिनावेशवशात् निह्नुवते–प्रपंचतोऽपलपन्तीति निह्नवाः, अत एते च मिथ्यादृष्टयः सूत्रोक्तार्थापलपनात्, उक्तं च–''सूत्रोक्तस्यैकस्याप्यरोचनादक्षरस्य भवति नरः । मिथ्यादृष्टिः सूत्रं हि नः प्रमाणं जिनाभिहितं ॥१॥ खल्विति विशेषणात्, किं विशिनष्टि ? एते साक्षादुपात्ता उपलक्षणसूचिताश्च देशविसंवादिनो द्रव्यलिंगेनाभेदेन निह्नवाः, बोटिकास्तु वक्ष्यमाणाः सर्वविसंवादिनो द्रव्यलिंगतोऽपि भिन्ना निन्हवा''इति आवश्यकवृत्तौ श्रीमलयगिरिकृतायां, नाणकस्थाने 'सीओदगं न सेविज्जा'इत्यादि पठन्तः क्षुल्लकावस्थायामेव संविग्नीभूता नाणकगच्छे गुरुभिः स्वयं चैत्यवासिभिः अपि चैत्यवासिनां निषेधयतामपि यः कोऽपि निस्तरति स निस्तरत्विति सर्वसिद्धान्तान् पाठयित्वा कुत्रापि ग्रामादौ चैत्यवासिभ्यः स्वप्रतिष्ठामलभमानैरर्बुदगिरिच्छायायां आविहरते-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





लीग्रामयोरन्तरे वटवृक्षस्याधो गोमयकेसरैराचार्यपदे प्रतिष्ठिताः श्रीसर्वदेवसूरयः, तेभ्यो वटगच्छः समजनि, स च घनाचार्यबाहुल्याद् बृहद्गच्छ इत्यभिधीयते, तैश्च बृहद्गच्छाद्यपुरुषैश्चैत्यवासित्वं परित्यज्य महानिशीथोक्तोपधानादिक्रियाप्रतिपत्तिपुरस्सरं सुविहितसामाचारी समाश्रिता, तथा सुममयीमाला तत्रोक्तास्ति तत् कथं यौक्तिकं ?, उच्यते, 'से नूणं भंते! तमेव सच्चं नीसंकं जं जिणेहिं पवेइयं ?, हंता गोयमा! तमेव सच्चं निस्संकं जं जिणेहिं पवेइयं' भगवत्यां, अवराहे लहुगतरो आणाभंगंमि गुरुतरो किहणु ?। आणाए चिय चरणं तब्भंगे किं न भग्गंति ? ॥१॥ निशीथे०, अपरं च 'अनन्तगमपर्यायं, सर्वमेव जिनागमे । सूत्र'मिति ललितविस्तरादिवचनादनन्तार्थत्वमस्यापि सूत्रस्य, अतः सुममालाविषयाक्षराणाममुका अर्था अमुकस्मिन् द्रव्यक्षेत्रकालभावपुरुषादौ निपतन्तीति सम्यग् नावगम्यते अल्पश्रुतैरेतद्भाष्यचूर्ण्याद्यभावात्, तस्मात् पूर्वबहुश्रुतसंप्रदायेन योऽर्थो यादृशेन विधिना समागतः स तेन विधिना विधीयमानः प्रमाणं, दृश्यते चैवमन्यत्रापि, यथा चातुर्मासिकान्यागमे पूर्णिमायां दृश्यन्ते, संप्रदायागतानि तु चतुर्दश्यां, निशीथादिषु यान्येव नामानि महत्तमप्रायश्चित्तानां तान्येव जीतसंप्रदाये अल्पतरप्रायश्चित्तानामिति, किंच–दृश्यते हि तत्तद् द्रव्यादिकरणमपेक्ष्य [से न] सावद्यमिश्रितकृतस्यापि करणं, यथा वज्रस्वामिना कुसुमानयनं, माहेसरीउ सेसा पुरियं नीया हुयासणगिहाउ । गयणयलमइवइत्ता वइरेण महाणुभागेण ॥१॥ आव०नि०, एवं सति एषामक्षराणामर्थस्य सम्यगनवबोधे अर्थलेशावबोधाभ्युपगमेऽपि च सोऽर्थलेशः कान् द्रव्यक्षेत्रकालभावपुरुषादीनपेक्षते कांश्च नेत्यनवगमे सति आप्तसंप्रदायागतत्वात् क्वचिद् रजतादिकुसुममिश्रा क्वचिदन्यथापि वा सूत्रमयीमाला सर्वत्र प्रमाणीभूता, नाविधिरिति ॥ तथाऽऽवश्यके नमस्कारस्य सामायिकांगतया भणितस्यात्र ग्रन्थे महाश्रुतस्कंधत्वं भण्यमानं कथं युक्तं ?, उच्यते, यथावश्यकप्रथमाध्ययननिर्युक्तौ पृथगधिकृतं सामायिकं पृथग-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





ध्ययनमुच्यते, तदेव चतुर्थाध्ययने प्रतिक्रमणसूत्रैकदेशतया दृश्यते, इदाणिं सुत्ताणुगमो, जावइगं च तं सुत्तं 'करेमि भंते'इत्यादि चूर्णिवचनात , एवं नमस्कारोऽपि यदा सामायिकादौ भण्यते तदा सामायिकांगं यदाऽनुशयनाशनं दृश्यते (तु शयनादौ तदा पृथगध्ययनं, पृथक्पदानामध्ययनत्वे श्रुतस्कंधत्वं सर्वश्रुतानामादौ भणननियमात् आराधनोपयोगाच्च महाश्रुतस्कन्धत्वं)यथा अपरयोगानां महानिशीथे अन्यत्र वा क्वापि अस्पष्टदृष्टविधीनां प्रामाण्यमस्ति जीतरूपत्वात् तथोपधानानां विशेषतः प्रामाण्यमस्ति, जीतरूपत्वादागमोक्तविधित्वाच्चेति,किंच–पाक्षिकसूत्रादौ महानिशीथं यदुच्यते इदं तन्न भवतीति न वाच्यम् ,एवं आचारांगौपपातिकादिग्रन्थानामप्यधुना वर्तमानानां पाक्षिकसूत्रोक्तान्यत्वप्रसंगो भविष्यति, न चैप युक्त इति, तथा असमीक्ष्यभाषणेनाशातनाकारिणां न कोऽपि जिनादिरप्यविषयः, तथाहि–'नत्थि अरहंता तिहिं नाणेहिं जाणंता वा किं घरवासे भोगे भुंजंति' तत्रोत्तरं–भोगनिवर्तनाय गुणप्रकृतिबलादिति, भणति वा–तित्थकरो केवलनाणे उप्पन्ने देवमणुएहिं पागारतिगं धूवपुप्फोवयारबलिमादीयं उवणीयं पाहुडियं किं उवजीवति दोसे जाणंतो ?, तत्रोत्तरं–ज्ञानदर्शनचारित्रानुपरोधकारकस्य अघातिकशुभप्रकृतेः तीर्थकृन्नामकर्मोदयाददोषः, वीतरागत्वाच्चादोष इति, देवाणं अविउव्विए न तरंति किंचि काउं, कामगद्दभा अणिमिसा य, अणुत्तरा वा निच्चिट्ठा, सामत्थे वा सति किमिति निच्चं पवयणस्सुन्नतिं न करिंति ? एवमादि, कालस्स आसायणा–किं कालग्गहणेणं, किं वा पडिलेहणादिणा कालो आराहिज्जति ?,सुत्तस्स आसायणा–को आउरस्स कालो मइलंबरधोवणे य को कालो ? । जइ मोक्खहेउ नाणं को कालो तस्सऽकालो वा ॥१॥ सुतदेवता जीए सुयमहिड्डियं तीसे आसायणा,नत्थि सा, अकिंचिकरी वा, एवमादि" आव० चू०,तथा 'लोकायिता वदन्त्येवं, नास्ति जीवो न निर्वृतिः । धर्माधर्मौ न विद्येते, न फलं पुण्यपापयोः ॥१॥ एतावानेव लोकोऽयं, यावानिन्द्रियगोचरः । भद्रे !



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





श्रुकपदं पश्य, यद्वदन्ति बहुश्रुताः ॥२॥" इत्यादि, एवंविधोच्छृंखलवचनैश्च न किमपि सुव्यवस्थितं स्यात्, इत्यतस्तानि परित्यज्य यथोक्तमहाश्रुतस्कंधाध्ययनादिपरिभाषोपेतान्युपधानानि जिनवचनप्रामाण्यात् प्रमाणतया प्रतिपत्तव्यानि **उपधानादिविचारः२२॥**

२३ **कल्याणकादितपः**–अप्पे० एगावलितवोकंमं पडिवण्णा, एवं मुत्तावलिं कणगावलिं रतणावलिं खुड्डगसीहनिकीलियं खुड्डागसव्वतोभद्दमहालयं सव्वओभद्दं आयंविलं वद्धमाणं अप्प० मासियं भिक्खुपडिमं जाव अप्पे० एगराइंदियं अप्पे० सत्तसत्तमियं पडिमं जाव अप्पे० दसमदसमियं अप्पे० खुड्डियं मोयपडिमं एवं महालियं जवमज्झं चंदपडिमं वइरमज्झं चंदपडिमं अप्पे० भद्दपडिमं एवं सुभद्दं महाभद्दं सव्वतोभद्दं भद्दुत्तरं विवेगपडिमं एवं विउस्सग्गं उवहाणपरिसंलीणे एवं जाव अप्पे० एकल्लविहारपडिमापडिवण्णा' आव० चू०, इत्यादिचूर्णिवृत्त्यादिषु दृष्टेभ्यः प्रतिनियततपोभ्योऽपराणि न कर्तव्यान्यागमोक्तिबाह्यत्वादिति यत्कस्यचिद्वचनं तत्तस्यैवानागमत्वसूचकं, आगमे अनेकतपःप्रकारोपदेशात्, तथाहि–"तिन्नि सयाणि सट्ठाणि, तवोकमाणि आहिआ। उग्गनक्खत्तजोएसु, तेसिमन्नयरं करे ॥१॥" गणिविद्याप्रकी०, जो सो इत्तरियतवो सो समासेण छव्विहो होइ। सेढितवो पयरतवो घणे य तह होइ वग्गो य ॥१॥ तत्तो य वग्गवग्गो य, पंचमो छट्ठओ पइण्णतवो। मणइच्छियचित्तत्थो, नायव्वो होइ इत्तरिओ ॥२॥ "षष्ठकं प्रकीर्णकं तपो यत् श्रेण्यादिनियतरचनाविरहितं स्वशक्त्यपेक्षं यथाकथंचिद्विधीयते, तच्च नमस्कारादिसहितपूर्वपुरुषचरितं यवमध्यवज्रमध्यचंद्रप्रतिमादि वा, मनसः ईप्सितं–इष्टं चित्रः–अनेकप्रकारार्थः स्वर्गापवर्गादिस्तेजोलेश्यादिर्वा यस्मात्" उत्तरा० बृहद्वृत्त्येकदेशः, "एसो बारसभेओ सुत्तनिबद्धो तवो मुणेयव्वो। एयविसेसोऽवि इमो पइण्णगोऽणेगभेउत्ति ॥१॥ एतद्विशेषस्तु–अनन्तरोक्ततपोभेद एव 'इणमो'त्ति इदं वक्ष्यमाणं तपः प्रकीर्णकं व्यक्तितः सूत्रानिबद्धं, न भिक्खुप्रतिमादिवत् सूत्रे निबद्धमित्यर्थो, न



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चोरखत्रत्वमस्य, द्वादशभेदे तपस्यन्तर्भावात् ,तथा नैकभेदमनेकविधालम्बनत्वादिति। तित्थयरनिग्गमादी सव्वगुणपसाहणं तवो होइ। भव्वाण हिओ नियमा विसेसओ पढमठाणीणं ॥१॥ तीर्थकरनिर्गमादि–येन तपसा तीर्थकरा निष्क्रान्ताः, आदिशब्दात् तीर्थकरज्ञाननिर्वाणादिपरिग्रहः, किंभूतमित्याह–सर्वगुणप्रसाधकं– तीर्थकरनिर्गमनालम्बनस्य शुभभावप्रकर्षरूपत्वेनैहलौकिकाद्युपकारकारित्वात् तपो भवतीति व्यक्तं, अत एव भव्यानां हितं नियमादिति व्यक्तं, विशेषतः पुनः प्रथमस्थानिनां–अव्युत्पन्नबुद्धीनां, व्युत्पन्नबुद्धीनां हितत्वादेव, निरालम्बनतयाऽपि शुभभावप्रकर्षसंभवात् , सर्वमपि हितमेवेति गाथार्थः ॥ चंदायणाइ य तहा अणुलोमविलोमओ तवो अवरो। भिक्खाकवलाण पुणो विण्णेओ वुड्ढिहाणीहिं ॥१॥ चंद्रायणमिव चंद्रायणं तदादि च, आदिशब्दाद् भद्रामहाभद्रासर्वतोभद्रारत्नावलीकनकावलीसिंहनिष्क्रीडितद्वयाचाम्लवर्द्धमानगुणरत्नसंवत्सरसप्तसप्तमिकादिचतुष्टयकल्याणिकादितपसामागमप्रसिद्धानां ग्रहः,तथेति वाक्यान्तरोपक्षेपार्थो गाथादौ दृश्यः, अनुलोमविलोमतो–गतप्रत्यागततया तपोऽपरं–अन्यत् , कथं?–भिक्षाकवलानां–प्रतीतानां पृथग्भेदेन वृद्धिहानिभ्यामिति गाथार्थः ॥'' पंचाशके १९ 'कयमित्थ पसंगेणं तवोवहाणाइयावि नियसमए। अणुरूवं कायव्वा जिणाण कल्लाणदियहेसु ॥१॥ कृतं–अलमत्र–दानामाघातप्रक्रमे प्रसंगेन–प्रसक्त्या तपउपधानादिका अपि–तपःकर्मशरीरसत्कारप्रभृतिका अपि भावाः, न केवलं दानमित्यपिशब्दार्थः ॥२९॥'' पंचाशके ९ वृत्तौ, तथा ''चतुर्दश्यष्टम्यादितिथिषु उद्दिष्टासु–महाकल्याणिकसंबंधितया पुण्यतिथित्वेन प्रख्यातासु पौर्णमासीसु च तिसृष्वपि चतुर्मासिकतिथिष्वित्यर्थः'' इत्यादि सूय० वृत्तौ, 'वाससहस्सं'गाहा इत्यादि. ''अत्र च कल्याणकैः सार्द्धं क्वचिद्व्यभिचारोऽपि दृश्यते, स तु न प्रतिहन्यते, केवलिगम्यत्वात्तन्निर्णयस्येति'' आव० वृत्तिटिप्पन्यां द्वि० वरवरिकायां, ''साधनारंभश्च वृषभस्य चन्द्रप्रभस्य वर्द्धमानस्य वा जन्म-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कल्याणकदिने ज्ञानकल्याणके वा" सूरिमंत्रकल्पे इति कल्याणिकतीर्थकरदीक्षाद्यालम्बनविचित्रप्रकीर्णकतपोविचारः २३
**रोहिण्यादितपः**—अण्णोऽवि अत्थि चित्तो तहा तहा देवयानिओगेण। मुद्धजणाण हिओ खलु रोहिणिमाई मुणेयव्वो ॥१॥ अन्यदपि अस्तिविद्यते चित्रं—विचित्रं, तप इति गम्यते, तथा तथा—तेन तेन प्रकारेण लोकरूढेन देवतानियोगेन—देवतोद्देशेन मुग्धजनानां—अव्युत्पन्नबुद्धिलोकानां हितं खलु—पथ्यमेव विषयानुष्ठानरूपत्वात्, रोहिण्यादिदेवतोद्देशेन यत्तद्रोहिण्यादि, मुणेयव्वो॥ देवता एव दर्शयन्नाह—'रोहिणि अंबा तह मंदउण्णिया सव्वसंपया सुक्खा। सुय संति सुरा काली सिद्धाईया तहा चेव ॥१॥ रोहिणी अंबा तथा मंदपूर्णिका सर्वसंपत् सर्वसौख्या श्रुतदेवता शान्तिदेवता चेत्यर्थः, सुयदेव संतिसुरा इति पाठान्तरं व्यक्तं, काली सिद्धायिका इत्येता नव देवताः, तथा चैवेति समुच्चयार्थः। ततः किमित्याह—'एमाइदेवयाओ पडुच्च अवऊसगा उ जे चित्ता। नाणादेसपसिद्धा ते सव्वे चेव होइ तवो ॥१॥ एवमादिदेवताः प्रतीत्य, एतदाराधनायेत्यर्थः, अवऊसगत्ति—अपवसनानि अवजोषणानि वा, तुः पूरणे, ये चित्रा नानादेशप्रसिद्धास्ते सर्वे चैव भवन्ति तप इति स्फुटमिति। तत्र रोहिणीनक्षत्रदिने एव सप्तमासाधिकसप्तवर्षाणि यावत्, तत्र च वासुपूज्यजिनप्रतिमायाः प्रतिष्ठा पूजा च विधेयेति, तथा अंबातपः पंचसु पञ्चमीष्वेकाशनादि विधेयं, नेमिनाथांबिकापूजा चेति, तथा श्रुतदेवतातपः एकादशस्वेकादशीषूपवासो मौनव्रतं श्रुतदेवतापूजा चेति, शेषाणि तु रूढितोऽवसेयानीतिगाथार्थः॥ अथ कथं देवतोद्देशेन विधीयमानं यथोक्तं तपः स्यादित्याशंक्याह—'जत्थ कसायनिरोहो बंभं जिणपूयणं अणसणं च। सो सव्वो होइ तवो विसेसओ मुद्धलोयंमि ॥१॥ यत्र तपसि कषायनिरोधो ब्रह्मचर्यं जिनपूजनमिति व्यक्तं, अनशनं च—भोजनत्यागः, 'सो'त्ति तत्सर्वं भवति तपो, विशेषतो मुग्धलोके, मुग्धलोको हि तथाप्रथमतया प्रवृत्तः सन्नभ्यासात्कर्मक्षयोद्देशेनापि प्रवर्तते, न पुनरादित



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





एव तदर्थं प्रवर्तितुं शक्नोति मुग्धत्वादेवेति'' पंचा० ९ वृत्तौ। कृष्णेन चन्दनभेर्यर्थं अभयकुमारेणैकस्तंभधवलगृहाद्यर्थमष्टमादितपः श्रीवैरस्वाम्यादिभिः अवग्रहार्थं कायोत्सर्गो व्यधायीत्यागमे श्रूयते, सांप्रतमपि साध्वादिभिः क्षेत्रदेवतादिकायोत्सर्गः क्रियते इत्यतो यथोक्तदेवतोद्देशेनापि तपः सम्यग्दृशां नाकल्प्यमिति। इहलोकार्थिनामपि वांछितसिद्ध्ये आगमे तप उपदिष्टं दृश्यते, तथाहि— 'ममं पुण उवायं साहिउं पसीयह जेण अहं विभवं पावामि, अवितण्हकामभोगो इहलोइयसुहाइं इच्छामित्ति, तओ तेण लवियं-अत्थि जिणसासणे बहवे उवाया दिट्ठा विज्जाफलदेवयप्पसाया य, तत्थ देवयाउ उववासेहिं भत्तीए य आराहियाओ जहाचिंतियं फलं दिंति, विज्जाओ य पुरच्चरणबलिविहाणेहिं सिज्झंति, उववासविहीओ य बहुविहप्पयारा उ जा इहलोए परलोए य फलं दिंति, तत्थ पुण अमोहो उववासो, साहुणो भणंति—जो छम्मासे आयंबिलं करेइ तस्स इहलोइया इच्छियफलसंपत्ती होइत्ति' अगडदत्तकेवली धम्मिलाग्रे इदं प्रोवाच, वसु० प्रथ० खंडे, आव० चूर्णौ च, कथमिति चेदुच्यते, जहा वसुदेवहिंडीए इत्यालापकेन धम्मिल्लोदाहरणस्य वसुदेवहिंडिनिर्दिष्टस्य तत्र संगृहीतत्वात्। एमेव य अनियाणं वेयावच्चं तु होइ कायव्वं। कइपडिकईवि जुज्जइ न कुणइ सव्वत्थ तं जइवि ॥१॥ व्यव० भा० उ० १ नवांगवृत्तिकारकश्रीअभयदेवसूरिकृतायां नवतत्त्वभाष्यवृत्तौ श्रीवासुपूज्यचरित्रादिषु च रोहिण्यादितपः प्रोक्तमस्ति मुग्धबुद्धीनां तपःप्रवृत्त्यर्थमिति **रोहिण्यादितपोविचारः २४ ॥**

२५ श्रावकमुखवस्त्रिकाः—अथाह कश्चित्—श्रावकाणां मुखवस्त्रिकारजोहरणे क्वागमे स्तः इति, उच्यते, यत्रानुयोगद्वारवन्दननिर्युक्तिवृत्तिचूर्ण्यादौ षड्विधावश्यकवन्दनविधिरुपदर्शितोऽस्ति तत्रस्थ इति, 'से किन्तं लोउत्तरियं भावावस्सयं ?, जंनं समणो वा समणी वा सावओ वा साविया वा तच्चित्ते तम्मणे तल्लेसे तदज्झवसिए तदज्झवसाणे तदट्ठोवउत्ते तदप्पियकरणे अणत्थ कत्थइ मणं अकुव्वमाणे



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





उभओ कालं आवस्सयं करिंति'' अनु०सूत्रे, एतद्धृत्त्येकदेशो यथा–तदर्पितकरणः करणानि–तत्साधकतमानि देहरजोहरणमुखवस्त्रिकादीनि, पुणोवि गुरुं वंदित्ता पडिलेहित्ता निविट्ठो पुच्छइ पढइ वा'' आव० चूर्णौ सामायिकाधिकारे,पोतशब्देन च मुखवस्त्रिकाप्युच्यते, यथावासत्ताणावरिया निकारण ठंति कज्जि जयणाए। हत्थच्छंगुलिसन्नाए पुत्तावरिया व भासंति ॥१॥''निष्कारणे–कारणाभावे वर्षात्राणं–कम्बलमयः कल्पस्तेन सौत्रिककल्पान्तरितेन सर्वात्मना आवृतास्तिष्ठन्ति, कामपि लेशतोऽपि चेष्टां न कुर्वन्ति, कार्ये तु समापतिते यतनया हस्तसंज्ञया अक्षिसंज्ञया अंगुलिसंज्ञया वा व्यवहरन्ति, पोतावरिता वा भापन्ते, ग्लानादिप्रयोजने वर्षाकल्पावृता गच्छन्ति' व्यव० भाष्यवृत्ती उ०७ पत्र १९०,अत औपग्रहिकरजोहरणाभावे कार्यं मुखवस्त्रिकावस्त्रप्रान्तादिनापि विधेयमिति पूर्वसूरयः, तथा ''इह प्रमार्जनं शय्यादेरासेवनकाले वस्त्रोपान्तादिनेति'' आव० वृत्तौ पौपधाधिकारे, अत्राप्यादिशब्देन रजोहरणाद्युक्तं द्रष्टव्यं, अत्रादिशब्दसूचनार्हस्यान्यस्यागमेऽश्रूयमाणत्वात्, एवं च सति ''क्वाप्यागमे उत्तरीयपरिहारेण क्वापि च रजोहरणाद्यंगीकारेण कानि कान्यपि कृत्यानि नामग्राहं दर्शितानि सन्ति तत उत्तरासंगमुद्रैव सर्वानुष्ठानेषु श्रावकाणा''मिति यदुक्तं तत् आगममार्गविरुद्धमिति ज्ञेयं, किं च–कृतोत्तरासंगस्य हस्तगृहीतांचलस्य वा श्रावकस्य सामायिकवंदनावश्यकाद्यन्यतरानुष्ठानमपि क्वाप्यागमे विहितं चरितं वा न दृश्यते, पंचविधाभिगमस्य साधूपाश्रयादिप्रवेशे प्रथमकृत्यतयोक्तत्वात् ,अन्यथा अंजलिमोचनमपि साध्वन्तिके कदापि न कार्यमिति प्रसज्यते, तथा च सति वन्दनावर्ताद्यपि कर्तुं न शक्यते इति, किंच–साधूपाश्रयादौ प्रविशन् श्रावक उत्तरासंगं करोतीत्यागमे दृश्यते, न पुनः प्रविशन्नपि वस्त्रांचलं हस्ते गृह्णाति तेन प्रमार्जनवन्दने तदुपरि वन्दनावर्तादि वा करोतीति मूलसूत्रनिर्युक्तिभाष्यचूर्ण्यादौ क्वापि दृष्टं श्रुतं वेति, ततः पंचविधाभिगमान्तर्गतोत्तरासंगमात्रबलात् वन्दनादि वस्त्रांचलेनैव वि-



For Private And Personal Use Only

धेयमिति यत् केनाप्युच्यते तन्निर्मूलमिति ज्ञेयम् ॥ तथा–खित्ते समाणदेसे कालंमि य इक्ककालसंभूओ। पवयण संवेगयरो लिंगे रयहरणमुहपत्ती ॥१॥ देस ससिहागा सावय पवयण साहम्मिया न लिंगेणं। लिंगेण उ साहम्मिय नो पवयण निण्हगा सव्वे ॥२॥ पिंडनिर्युक्तिवचनादेकादश्याः प्रतिमायाः अर्वाक् साधोः श्रावको न लिंगसाधर्मिकः,ततः कथं श्रावकस्य रजोहरणमुखवस्त्रिकाग्रहणे सति न लिंगसाधर्मिकत्वं ?, उच्यते, मुखवस्त्रिकारजोहरणे साधोर्लिंगतयोक्ते, ते चानुयोगद्वारावश्यकनिशीथभाष्यादिषु श्रावकाणामपि निर्दिष्टे, अतः श्रावकस्यौपग्रहिकत्वात् ते लिंगं न भवत इति बहुश्रुता आहुः, अवश्यंग्राह्यस्यौघोपधेर्लिंगत्वेनोपदेशात्, तथाहि–'ओहोवही'ति ओघः–संक्षेपः स्तोकलिंगकारकः अवश्यं ग्राह्यः उवग्गहोवही औत्पत्तिककारणमपेक्ष्य संयमोपकरणमिति गृह्यते'' निशी० चू० उ० २, रजोहरणमुखपोतिके च श्रावकाणां नौघोपधिः, कारणमपेक्ष्येत्वरकालग्रहणेनौपग्रहिकत्वात्, यदुक्तं–''अह घरे तो से उवग्गहियं रयहरणं अत्थि'' आव० चूर्णिः, लिंगं तदुच्यते यल्लिंगिनं न व्यभिचरति, व्यभिचरति चौपग्रहिकं रजोहरणादि श्रावकं, इत्वरकालग्रहणात् ,यद्वा ''से णं खुरमुंडए वा लुत्तसिरए वा गहियायारभंडगनेवत्थे''निशी० सूत्रे, गहियं आयारभंडगं साधुलिंगं रजोहरणपात्रादि विभासा, नेवत्थं–साधुरूपसरिसं दशा अध्य० चूर्णौ. रजोहरणपात्रादि साधुलिंगमुक्तं,नतु रजोहरणमुखवस्त्रिकामात्रं, तेन पात्राद्यभावात् साधोः श्रावकस्य च दशमीप्रतिमां यावत् न लिंगसाधर्मिकत्वमिति, तथा 'इह पुव्वी हारवणे' इत्यादि श्राद्धातिचारविषयजीतात् पौषधादिव्रतो मुखपोतिकाप्रायश्चित्तादौ प्रायश्चित्तमुक्तमस्ति, श्राद्धजीतकल्पोऽप्यागमानुमत एव, जीतलक्षणोपेतत्वात् साधुजीतवत्, तथाहि 'धीरपुरिसपन्नत्तो पंचमओ आगमो विउपसत्थो। पियधम्मवज्जभीरू पुरिसज्जायाणुचिण्णो य ॥१॥ धीरपुरिसा–तित्थयरा तेहिं पन्नत्तोत्ति, विउणो–चउदसपुव्वाइणो तेहिं कालं पडुच्च पसंसिओ, न निंदिओ, पिय-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





धम्मादीहिं अणुचिन्नो, तेण पच्चओ भवति सत्यमेतदिति, अथवा छेयसुयं–निसीहाई अत्थो अगतो तं छेदसुत्तादी मंतनिमित्तो-सहिपाहुडे य गाहेति, अन्नत्थ निसीहमादियस्स छेयसुत्तस्स जो अत्थो अगतो सुत्तं वा मोक्कलाणि वा पच्छित्तविहाणाणि मंतादि वा जोणीपाहुडं वा गाहिंतो अन्नत्थ वा गाहेइ अन्नत्थ वा तेसिं गच्छे विज्जइ'' निशीथ० भाष्यचूर्णी उ० १४, मुत्कलप्रायश्चित्त-विधानसंग्रहाद्वाऽस्य प्रामाण्यमिति, न च मुखपोतिकाविपयं प्रायश्चित्तमर्वाचीनमित्याशंकनीयं, चिरंतनजीतकल्पेषूपलंभात् ,आप्तप-रंपरागतत्वात् प्रमाणमेव, तत् प्रामाण्यमस्वीकृत्य श्रावकाणां येन प्रायश्चित्तं प्रदीयते तस्य महाशातना, यदुक्तं–''अप्पच्छित्ते उ पच्छित्तं, पच्छित्ते अइमत्तया। धम्मस्सासायणा तिव्वा, मग्गस्स य विराहणा॥१॥ निशी०भा०उ०१० तथा सुयकरणं दुविहं–लोइयं च लोउत्तरियं च, इक्किकं दुविहं–बद्धं अबद्धं च, बद्धं नाम जस्स सत्थेसु उवनिबंधो अत्थि, अबद्धं जं एवं चेव पराति, नत्थि उवनिबंधो, तत्थ बद्धसुत्तरकरणं दुविहं–सद्दकरणं निसीहकरणं च,सद्दकरणं नाम जं सद्देहिं पगडत्थं कीरइ,न पुण गोविअं असंकेइणं, तं जहा उप्पन्नेइवा धुवेइवा विगएइवा परिणामेइवा उदात्ताः अनुदात्ताः प्लुताश्च, निसीहं जं पच्छन्नं गोवियं संकेतितत्थं, सुत्ते अत्थे तदुभएण य जहा निसीहं नामं अज्झयणं भवति''इत्यादि। आरिहए पवयणे पंच आदेससताणि, इत्थ एगं मरुदेवा, नवि अंगे नवि उवंगे पाढो अत्थि एवं अणादिवणस्सइकाइया अणंतरं उव्वट्टित्ता सिद्धत्ति, तहा सयंभूरमणमच्छाण पउमपत्ताण य सव्वसंठाणाणि वलयसंठाणं मोत्तुं, करडउक्कुरडा य कुणालाए'' आव० चू०अध्य० १, बद्धमबद्धं तु सुयं बद्धं तु दुवालसंग निद्दिट्ठं। तव्विवरीयमबद्धं निसीहमनिसीह बद्धं तु ॥३८॥ एवं बद्धमबद्धं आएसाणं हवंति पंच सया। जह एगा मरुदेवा अच्चंतं थावरा सिद्धा॥४१॥ आव० सूत्रे, आरुहे पवयणे पंचाएससयाणि जाणि अणिबद्धाणि, तत्थेगं मरुदेवा, बितियं सयंभुरमण, ततियं विण्हुस्स सातिरेगं



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





जोयणसयसहस्सविउव्वणं, चउत्थं करडुउकुरुडा एवमादि पंचादेससयाणि अबद्धाणि'' आव० चूर्ण्येकदेशः, एवं श्रुतस्वरूपे सति वर्तमानश्रुतमध्ये संविग्नजनसंप्रदायागतं किमप्येकं कृत्यं केनापि स्थूलमतिना नोपलभ्यते तथाप्येवं न चिन्त्यं, यत्—इदं कृत्यमागमे नास्तीति, द्वादशांगरूपबद्धश्रुतस्य पञ्चादेशशतरूपाबद्धश्रुतस्य चानवगमात्, तथा रजोहरणस्य सद्भावे असद्भावे वा मुखपोतिकया द्वादशावर्तवन्दनादानं, प्रावरणमोक्षेण सामायिकग्रहणादि, कृतोत्तरसंगेनैवोपासकेन जिनपूजादिकरणं, श्राविकया तु न तथा, श्रावकाणां सामायिकादौ मुखपोतिकादिमुद्राया जिनपूजादावुत्तरासंगमुद्राया ईर्यापथप्रतिक्रमणादावुभयमुद्रायाः करणं, श्रमणादीनां चतुर्णां व्रतप्रतिपत्तौ पृथक् पृथक् मुद्राकरणमित्यादीन्यपि प्रमाणतया प्रतिपत्तव्यानि, पञ्चादेशशतादिदर्शितादीनां पूर्वबहुश्रुतैः सम्यग्ज्ञातानामधुना नामग्राहमनवगमे तत्संप्रदायागतत्वात्, तओ सो पणओ, सामि! करिस्सं जत्तति, उवगओ सिवकुमारसमीवं, निसीहियं काऊण इरियाए पडिकंतो बारसावत्तं कितिकम्मं काऊण पमज्जिऊणं अणुजाणह मेत्ति आसीणो, सिवकुमारेण चिंतियं—एस इब्भपुत्तो अगारी साहुविणयं पउंजिऊण ठिओ, पुच्छामि ताव णं, तेण भणियं—इब्भपुत्ता! जो मया गुरुणो सागरदत्तस्स समीवे साहूहिं विणओ पजुञ्जमाणो दिट्ठो सो तुमे पयत्तो, तं तु नेह किह विरुज्झति?,दढधम्मेण भणिओ—कुमार! आरहए पवयणे विणओ समणाणं सावयाणं च समाणो, जिणवयणं सद्धंति जा दिट्ठी सावि साधारणा''इत्यादि वसुदेवहिंडीप्रथमखंडे पत्र ३१, ''ताहे सव्वे साहुणो बारसावत्तेणं वंदणएणं वंदइ, रायाणो परिस्संता ठिता'' आव० चू०,इह दढधर्मवासुदेवयोर्द्वादशावर्तवंदने मुखपोतिका साक्षान्नोक्ता ततः कथं तस्या ग्रहणं तयोरनुमीयते?,उच्यते,यथा द्वादशावर्ताः शेषाणि त्रयोदशावश्यकानि द्वात्रिंशद्दोषवर्जनं च साक्षादनुक्तान्यपि तत्रानुमीयन्ते तथा, तथा चात्रावश्यकान्तर्गतं मुखवस्त्रिकाग्रहणमप्यनुमीयते, अ-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न्यथा शेषावश्यकादीन्यपि तयोर्नानुमेयानि,साक्षादनुक्तत्वस्य समानत्वात् , तथा नतु वंदनप्रतिक्रमणादिकरणे श्रावकाणामेव केवलानां,तस्मिन्–आवश्यके यथोचितव्यापारनियोगेनार्पितानि–नियुक्तानि तानि येन स तथा,सम्यक् यथास्थानन्यस्तोपकरण इत्यर्थः,एकार्थिकानि वा विशेषणान्येतानि प्रस्तुतोपयोगप्रकर्षप्रतिपादनपराणि, अमूनि च लिंगविपरिणामतः श्रमणीश्राविकयोरपि योज्यानि, तस्मात् तच्चित्तादिविशेषणविशिष्टाः श्रमणादयः उभयकालं–उभयसन्ध्यं यदावश्यकं कुर्वन्ति तल्लोकोत्तरिकं भावमाश्रित्य, भावश्रावावश्यकं, अत्राप्यवश्यंकरणादावश्यकत्वं, तदुपयोगपरिणामस्य च सद्भावत्वं,मुखवस्त्रिकाप्रत्युपेक्षणरजोहरणव्यापारादिक्रियालक्षणदेशस्यानागमत्वान्नोआगमत्वं भावनीयं" पत्र २० अनुयोगद्वारवृत्तौ मलधारिश्रीहेमचंद्रसूरिकृतायां, तथा तदर्पितकरणः, इह करणानि–रजोहरणमुखवस्त्रिकादीनि तस्मिन्नावश्यके यथोचितव्यापारनियोगेनार्पितानि येन स तथाविधः, द्रव्यतः स्वस्थानन्यस्तोपकरण इत्यर्थः" अनु०वृत्तौ हारिभद्रीयायां,"तस्माहणे जाणि सरीररओहरणमुहणंतगादियाणि दव्वाणि ताणि किरियाकरणत्तणओ अप्पियाणि"अनु०चूर्णौ०अवणामा दुन्नहाजायं, आवत्ता बारसेव य । सीसा चत्तारि गुत्तीउ, तिन्नि दो अ पवेसणा ॥४१॥ एगनिक्खमणं चेव, पणवीसं वियाहिया । आवस्सएहिं परिसुद्धं, किइकम्मं जेहिं कीरई ॥४२॥ किइकम्मंपि करिंतो न होइ किइकम्मनिज्जराभागी । पणवीसामन्नयरं साहू ठाणं विराहंतो ॥४३॥" वन्दननिर्युक्तौ, कतिओणयंति दारं, जाए वेलाए पढमं वंदति जाहे व निप्फिडिऊण पुणो वंदति, अहाजायं सामण्णे रयहरणं मुहपुत्तिया चोलपट्टो य, जोणिनिक्खमणे अंजलिं सीसे काऊणं णीति" आव० चू० पत्र ३५५, इहानुयोगद्वारेषु नोआगमतो भावावश्यके मुखवस्त्रिकाप्रत्युपेक्षणरजोहरणव्यापारादिक्रिया वन्दननिर्युक्तौ च यथाजातावश्यकं रजोहरणमुखवस्त्रिकाऽविनाभूतं दर्शितं, तत्र स्थानद्वयेऽपि साधुवत् श्रावका अप्यधिकारिणो निर्विशेषं निर्दिष्टाः,



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



'समणेण सावएण य' इत्याद्यनुयोगद्वारवचनात्, ननु वन्दननिर्युक्तौ यथाजातावश्यकं श्रमणत्वमाश्रित्योक्तं तत् कथं श्रावकाणां योज्यते इति चेत्, श्रावकाणां यथाजातस्य क्वाप्यागमे पृथगश्रवणात्, नन्वेवं श्रावकाणां चोलपट्टोऽपि प्रसज्यते तत्रैवोक्तत्वात्, उच्यते, यथाजातावश्यकं सामान्येनोक्तमपि साध्वादीन् चतुरोऽप्याश्रित्य विभागेनैव ज्ञेयं, अन्यथा श्रमण्या अपि मुखवस्त्रिकावत् चोलपट्टोऽपि प्रसज्यते इति, अयं च यथाजातविभागोऽपि क्वाप्यागमे विशेषेण न दृश्यते, अतः पूर्वपूर्वतरबहुश्रुतक्षुण्णः संप्रदायागत एव तद्विभागः सतां प्रमाणं, नापरः, स्वमतिकल्पितत्वेन निर्मूलत्वात्, न च श्रावकाणां मुखवस्त्रिका निर्मूलेत्यपोद्यं, आगमोक्तत्वात् संप्रदायागतत्वात् अज्ञायमानप्रवर्तकत्वात् तां विना नामग्राहमपरकरणेन भावावश्यकादिकृत्यानां क्वाप्यागमेऽनभिधानाच्च, एवं सति यः संप्रदायगतं यथाजातविभागमुच्छिद्य आगमे संप्रदाये चादृश्यमानसंवादं तद्विभागं कल्पयति सोऽपि चेत् प्रमाणं तदा व्यक्तं गोष्ठामाहिलादीनामपि प्रमाणत्वप्रसंगः, कश्चिदाह–श्रावकाणां सर्वानुष्ठानेषु उत्तरासंगमुद्रैवेति, तदयुक्तं, आगमे संप्रदाये च तथानुपलंभात्, तथाहि–तुंगियाए नयरीए मज्झंमज्झेणं निग्गच्छंति, थेरे भगवंते पंचविहेणं अभिगमेणं अभिगच्छंति, तं०–सचित्ताणं दव्वाणं विउसरणयाए अचित्ताणं दव्वाणं अविउसरणयाए एगसाडिएणं उत्तरासंगकरणेणं चक्खुप्फासे अंजलिपग्गहेणं मणसो एगत्तीकरणेणं जेणेव थेरा भगवंतो तेणं उवागच्छंति, तिक्खुत्तो आयाहिणपयाहिणं करेंति जाव तिविहाए पज्जुवासणाए पज्जुवासिंति' भग० शत० २ उ० ५ प० १२ अभिसेकाओ हत्थिरयणाओ पच्चोरुहति अभिसिका २ त्ता अवहट्टु पंच रायककुहाइं तं०–खग्गं छत्तं उप्फेसं वाहणाउ वालवीयणिं, जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ २ त्ता समणं भगवं महावीरं पंचविहेणं अभिगमेणं अभिगच्छति, तंजहा–सचित्ताणं दव्वाणं विउसरणयाए अचित्ताणं दव्वाणं अविउसरणयाए एगसा-





For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





डियउत्तरासंगकरणेणं चक्खुप्फासे अंजलिपग्गहेणं मणसो एगत्तभावकरणेणं समणं भगवं महावीरं तिक्खुत्तो आदाहिणपदाहिणं करेइ २ वंदति नमंसति वंदित्ता नमंसित्ता तिविहाए पज्जुवासणाए पज्जुवासति, तंजहा—काइयाए वाइयाए माणसियाए" औपपातिके पत्र १७, इत्यादिग्रन्थेषु श्रावकाणां साधूपाश्रयादिप्रवेशे उत्तरासंगः साक्षादुक्तोऽस्ति, न तु नामग्राहं प्रवेशानन्तरविधेयकृत्येषु, श्राविकाणां तु प्रवेशेऽपि न दृश्यते, तथाहि—ततेणं सा देवाणंदा माहणी धम्मियाउ जाणप्पवराउ पच्चोरुभति २ बहूहिं जाव चिलातेहिं महतरवंदपरिखित्ता समणं भगवं महावीरं पंचविहेणं अभिगमेणं अभिगच्छति, तं०—सच्चित्ताणं दव्वाणं विउसरणयाए अचित्ताणं अविमोयणयाए विणयोणताते गायलट्ठीए चक्खुप्फासे अंजलिपग्गहेणं मणस्स एगत्तीभावकरणेणं जेणेव समणे भगवं महावीरे तेणेव उवागच्छइ २ समणं भगवं महावीरं तिक्खुत्तो आयाहिणप० २ वंदंति नमंसंति" भग० शत० ९ उ० ३३, कोणिकभार्याः सुभद्राप्रमुखाः समणं भगवं महावीरं पंचविहेणं अभिगमेणं अभिगच्छंति, तंजहा—सच्चित्ताणं दव्वाणं विउसरणयाए अचित्ताणं दव्वाणं अविउसरणयाए विणओणयाए गायलट्ठीए चक्खुप्फासे अंजलिपग्गहेणं मणसो एगत्तीकरणेणं समणं भगवं महावीरं तिक्खुत्तो आयाहिणपयाहिणं करिंति २ वंदंति नमंसंति" औपपातिके पत्र १८, तथा 'तएणं से कुंडकोलिए समणोवासए अण्णया कयाइ पुव्वावरण्हकालसमयंसि जेणेव असोगवणिया जेणेव पुढविसिलावट्टए तेणेव उवागच्छति नाममुद्दगं च उत्तरिज्जगं च पुढविसिलावट्टए ठवेइ २ समणस्स भगवओ महावीरस्स अंतियं धम्मपन्नत्तिं उवसंपज्जित्ताणं विहरइ" उपा० अध्य० ६, धम्मपन्नत्तित्ति—श्रुतधर्मप्ररूपणा दर्शनं—मतं, सिद्धान्त इत्यर्थः उपा० १० वृत्तौ अध्य० ६, कामदेवश्चात्रैव द्वितीयाध्ययने एवं निर्गतो, यथा—तएणं से कामदेवे सम० इमीसे कहाए लद्धट्ठे समाणे एवं खलु समणे जाव विहरति, तं सेयं खलु ममं समणं भगवं महा-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वीरं वंदित्ता नमंसित्ता तओ पडिनियत्तस्स पोसहं पारित्तएत्तिकट्टु एवं संपेहेइ'इत्यादि, इह कुंडकोलिकेन तदैवान्यदा वा प्रतिपन्नपौषधेन परिमुक्तोत्तरीयेण श्रुतधर्मप्ररूपणारूपानुष्ठानं कृतं, तथा 'एवं सामाइयं काउं पडिकंतो वंदित्ता पुच्छइ, सो य किर सामाइयं करिंतो मउडं अवणेइ, कुंडले नाममुद्दं पुप्फतंबोलं पावरणमादी वोसिरइ'' आव० वृ० अध्य० ६, पुस्तकांतरे पाठान्तरगमा इति पाठः, उत्तरियं नाम पाउरणं, निशी० १४ 'सो य किर सामाइयं करिंतो मउडं अवणेइ कुंडलाणि नामसुद्दं पुप्फतंबोलपावारगमादि वोसिरति'' आव० चू० अध्य०६ पत्र ५०१, प्रावारशब्दश्च सलोमपटउत्तरासंगवाचकत्वात् द्व्यर्थः, तथाहि–पण्हवि१कोयव२पावार३नवतए४तहय दाढिगाली५ य । दुप्पडिलेहियदूसे एयं वितियं भवे पणगं ॥१॥ नि०भा० उ० १२ खरडो तह पूरट्ठी सलोमपडओ तहा हवइ जीणं । सदसं वत्थं पल्हविमाईणमिमे उ पज्जाया ॥१॥ प्रवचनसारे,' वैकक्ष्ये प्रावारोत्तरासंगो बृहतिकापि च'' हेमनाममालायां, एवं प्रावारशब्दस्यार्थद्वये सति य एव वृत्तिगतप्रावरणमादीयत्तिपाठानुकूलः बहुश्रुतैराचीर्णः स एवाचरणीयतया प्रमाणं, आदिशब्दाच्च सलोमपटादीनां परिहारो भविष्यति, अपरं चौपग्रहिकरजोहरणमपि श्रावकाणामस्ति, तथाहि–'पाउंछणं तु दुविहं वितिउद्देसे उ वण्णितं पुव्विं । सागारिसंतियं तं गिण्हंताणादिणो दोसा ॥१॥ नत्थट्ठहियविसरिते अणप्पिणंते य होइ वोच्छेदो । कम्मप्पवहण धुयावण वा तदट्ठस्स भिक्खादि ॥२॥ अह तस्स पडितं नट्ठं तेण गहितं सज्झायभूमिं गतस्स कतोवि विस्सरियंति. एतेहिं कारणेहिं अणप्पिणंतस्स तदन्नदव्वस्स तदन्नसाधुस्स वा वोच्छेदो होज्जा, गिहत्थो वा अन्नं पाउंछणं करिज्ज पच्छाकम्मं, ठवितं वा जं अच्छति तस्स पवहणं करिज्ज धुयावणं, दवावणं तदट्ठस्स पाउंछणस्स अन्नट्ठं वा मुल्लं दवाविज्ज,तम्हा पाडिहारियं न गिण्हिज्जा'' निशी० भाष्यचूर्णी उ० ५ 'माहूणं मगामाओ रयहरणं निसिज्जं वा मग्गति, अह घरे तो से उवग्गहियं रय-



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हरणं अत्थि, तस्स असति पुत्तस्स अंतेणं, पच्छा इरियावहियाए पडिक्कमति, पच्छा आलोइत्ता वंदति आयरियादि जहारायणियाए, क्कापि मूलसूत्रनिर्युक्तिचूर्ण्यादौ मुखवस्त्रिका न दृश्यते, ततः कथं तां ते गृह्णन्ति ?, उच्यते, भगवदागमत्वेन निर्धारितग्रन्थेषु क्कापि केवलान् श्रावकानाश्रित्य वन्दनादिविधिर्न दृश्यते, तथापि ते वन्दनादीनि साधूद्देशेन दर्शित(न्या)वश्यकतत्कारणदोषपरिहारादि(दीनि) बहुविधानि कुर्वते, एवं तद्विध्यन्तर्गतं मुखपोतिकादिग्रहणमपि श्रावकाणामागमोक्तमेव तद्विधिरिव प्रतिपत्तव्यमिति। तथा वंदनं कर्तुकामेन प्रथमं मुखपोतिका प्रतिलेखनीया, यदुक्तं—"विणयमूलो धम्मोत्तिकाउं वंदिउंकामो गुरुं संडासयं पडिलेहित्ता उवविट्ठो मुहणंतयं पडिलेहेइ, ससीसं कायं पमज्जित्ता परेण विणएण तिकरणविसुद्धं कितिकम्मं कायव्वं, तत्थ सुत्तगाहा—आलोयणा [वा] गणस्सा पुच्छणा पूयणा य सज्झाये। अवराहे य गुरूणं विणओ मूलं च वंदणयं ॥१॥ आव० चू० अध्य० ३, इह मुखानंतकप्रतिलेखनं वन्दकस्यापि कर्मतयोक्तं दृश्यते, 'वंदिउकामो' इत्यनन्तरं कथनात्, न चायं विधिः प्रतिक्रमणान्तर्गतवन्दनस्यैवेति वाच्यम्, अन्येषामपि वन्दनानामिहैकप्रकारैरेव भणनात्, अपराधालोचनादिवन्दनानि श्रावकैर्यथोक्तविधिना विधेयानीति श्रावकाणां **मुखवस्त्रिकारजोहरणग्रहणविचारः** ॥

सर्वश्लाघ्यतपागणांबरतले यः पुष्पदन्तप्रभः, श्रीसोमप्रभसूरिसोमतिलकानुचानचूडामणिः। रूढप्रौढतदीयपट्टकमलाशृंगारहारोपमो, विश्वाश्चर्यविधायिनिर्मलगुणग्रामाभिरामोदयः ॥१॥ निस्सीमातिशया जयन्ति सततं सौभाग्यभाग्याद्भुताः, सूरिश्रीगुरुदेवसुन्दरवरास्तेषां विनेयाणुकः। सूरिः श्रीकुलमंडनोऽमृतमिव श्रीआगमांभोनिधिश्चक्रे चारु **विचारसंग्रहमिमं** रामाब्धिशक्राब्दके (१४७३) ॥२॥ 

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति अनेकसंशयसानुप्रविदारपविप्रभभ्रमान्धकारभेदभास्करायमान
युगप्रधानोत्तम श्रीदेवसुन्दरश्रीकुलमंडनसूरिभिरुद्धृतो
विचारसंग्रहः समाप्तः

For Private And Personal Use Only